ॐकारस्वरूपं यन्मात्रात्रयार्धमात्रात्मकसमस्तस्वरूपवाचकं यदक्षरं परापरस्वरूपं संस्थानमाकारो यस्य तत् स्थिरास्थिरं मात्रात्रितयवाच्यं स्थिरम
क्षरत्वाद्ब्रह्मतत्त्वाख्यं विश्वादिकं अस्थिरं क्षरात्मकतया व्याहृतत्वाज्जाग्रदादि तत्र प्रणवे यन्मात्रात्रयं व्यस्तसमस्तमकारादिकमेव सर्वं विश्वमव
ति तत्र हे देवि निर्विशेषचिदात्मकप्रकाशरूपे तव चिदात्मिकाया मात्रानुगतत्वादस्तित्वमवलम्ब्य तेन नास्तिवचनेभ्यस्तव व्याहृतत्वादस
वं हत्वा इति तत्प्रसिद्धौ सत्त्वासत्त्वात्मकादक्षरादक्षरोभयरूपस्य परमस्वभावाया अस्तङ्गतरूपिण्याः प्रवृत्तिरूपा पादे वा स्तनो व्यतिरिक्तमानत्व
मनेन सूचितं ॥ ३८ ॐकारस्य मात्रात्रितयस्याकारादेर्वाचकस्य वाच्यं प्रपञ्चयति त्रयो लोका इत्यादिना त्रयो लोका भूर्भुवःस्वारूपाः त्रयो
देवा ब्रह्मविष्णुरुद्रात्मकाः त्रयो विद्यास्त्रैविद्यं ऋग्यजुःसामस्वभावं पावकानां वह्नीनां गार्हपत्याहवनीयवैश्वदेवानां त्रयं ज्योतिज्यो

एतस्मात्त्रयं देवि रूपं तव सरस्वति विभिन्नदर्शना चाद्या ब्रह्मणो हि सनातना ॥ ३९ सोम
संस्था हविःसंस्थाः पाकसंस्थाश्च ये द्विजाः ता नक्षत्राणि हे देवि क्रियन्ते ब्रह्मवादिभिः ॥ ४०
अनिर्देश्यं तथा चान्यदर्धमात्राश्रितं परम् अविकार्यक्षयं दिव्यं परिणामविवर्जितम् ॥ ४१

तींषि सूर्यवह्निचन्द्रास्त्रयः वर्णा ब्राह्मणक्षत्रियवैश्यास्त्रयः धर्मादयः धर्मार्थकामाख्याः ॥ गुणाः सत्त्वरजस्तमांसि शब्दाः उदात्तानुदात्तस्वरि
तास्त्रयः वेदा वेदप्रतिपाद्याः कर्मोपासनाज्ञानानि त्रीणि आश्रमा ब्रह्मचारिगृहस्थवानप्रस्थाख्यास्त्रयः कालाः भूतं भविष्यद्वर्तमानं च
त्रितयं अवस्था जाग्रत्स्वप्नसुषुप्त्याद्याः पितरः पितृपितामहप्रपितामहास्त्रयः अहर्दिनं निशा रात्रिरित्यादिना संध्यारूपं त्रितयम् पूर्वश्लो
६५ कस्य अकारोक्तसमुच्चयार्थो बोद्धव्यः ॥ ३८ तवरूपं तदात्मकं स्वरूपमेतत् यात्वं ब्रह्मणोर्धमात्रा वाच्यत्वसनातना नित्यसमवा
श्री यिनी आद्या सर्वकारणं सेव त्वं सेत्थं या त्रिमात्रा वाच्येन विभिन्नं विविधभेदयुक्तं दर्शनं यस्यास्तादृशी तदक्षरोभयोर्नीर्णापि सर्वज
४७ गत्कारणं भवसीत्यर्थः ॥ ३९ सोमहविःपाकात्मकं त्रिविधं कर्म विताचमात्रात्रितयस्य वाच्यं तव स्वरूपमेवेत्याह सोमसंस्था इति सो

मा प्र
टी
९२

मेनित्यकर्मणि संस्थाः स्थितिर्येषां ते हविर्दर्वीहोमेनाभीष्टयमानेनं तमित्यस्थितिर्येषां पाके पाकप्रधाने यज्ञे आज्यादिश्च संस्था येषां ये हि
जात्यैव वर्णिकाः तैर्ब्रह्मचार्यादिभिर्वेदाध्ययनशीलैस्ता मात्रास्थितः स्वः स्वः स्वाराणान्मात्रात्रयरूपायास्तपो ह्यारात्क्रियाः क्रियन्ते यद्वा पाठा
न्तरे याः सोमादीनां संस्था व्यवस्थाः द्विजैर्ब्रह्मचार्यादिभिः क्रियन्ते मा व्यवस्थास्तैस्तत्त्वमात्रात्रितयात्मिकाया उच्चारणात्क्रियन्ते सर्वेषां सो
मादिरूपाणां कर्मणां वेदाश्रयत्वाद्वेदस्य च मात्रात्रितयात्मकत्वात्तस्य च विशुद्धात्तरूपत्वादिति परम्परया तदुच्चारणादेव क्रियन्ते
कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवमिति गीतास्मृ ४ एवं मात्रात्रितयस्य चराचरवाचकत्वमभिधाय तदुत्तीर्णं परमर्धमात्रावाच्य
माह अनिर्देश्यमिति जातिगुणक्रियायदृच्छाभिः शब्दप्रवृत्तिनिमित्तकैर्निर्देष्टुमशक्यं तत्र हेतुः परं श्रेष्ठतरादपि परमोत्तीर्णं

102

नैवं च परं रूपं यन्न शक्यं मयेरितम् न वास्येन च वा जिह्वा ताल्वोष्ठादिभिरुच्यते ४२
इन्द्रोऽपि वसवो ब्रह्मा चन्द्रार्कौ ज्योतिरेव च विश्वावासं विश्वरूपं विश्वेशं परमेश्वरम् ४३

प्रपञ्चयतीति किं प्रदर्शितेभ्यो लोकादिभ्यो भिन्नं ओंकारस्यार्धमात्राश्रितं अविकारिविकाराभाववत्कूटस्थत्वात् अत एवाव्ययं नाश
हीनं द्विविधो ततनस्वभावे तुर्यं भवं द्विधं तत्र प्रकृतिसमाश्रित्य पराक्रमवर्णलोकादिविपरिणामेन तत्तद्भूतभौतिकभावव्यवहरण
रूपेण विशेषेण वर्जितं यत्तत्त्वरूपं परमसत्त्वोत्कृष्टमेतद्रूपं तदाद्यन्ताभ्यां विनिष्क्रान्तं भवतीत्यन्तरेणान्वयः ४१ तदेतद्रूपाद्युत्तीर्णं
यत्तत्त्वरूपं मयेरितं लोके न शक्यं अवाङ्मनोगोचरत्वात् आस्यादिभिरकारादिवर्णेनोच्यते अतस्तन्मयागदितुं न शक्यते ४२ एवं
परं रूपं विश्वोत्तीर्णं तया वाङ्मनोविषयाभावादशक्यनिरूपणं प्रतिपाद्यास्यैव कथंचिद्विश्वात्मकतया स्वरूपं निरूपयति इन्द्रश्चादि ९२

इंद्रादयस्त्वयि स्थिमिव्यापकाधिकारणरूपायां मनीषिभिर्भाव्यंते प्रकटीक्रियंते अन्यथा त्वतेनार्किं विदित्यर्थः तत्रेन्द्रो मायोपहितः सृष्ट्यादि
कारी परमेश्वरो नानाभूतः वसवोशेषभूतस्तत्त्वाग्नीश्वराधिष्ठितमायाकार्याणि जगत्प्रपंचोपादानानि तेषामेव स्थूलत्वावस्थापादको ब्र
ह्माहिरण्यगर्भः सूत्रात्मा जगदाप्यायनप्रकाशनपवनादिक्रियाप्रयुक्तं वह्न्यादि तदेतद्विश्वकारणं त्वयि निर्विभागं संविद्रूपायां प्रक
टीक्रियते इति चतुर्थेन सम्बन्धः यच्चेदमस्ति यच्चाग्रे तत्तेजो विद्धि मामकं गामाविश्य च भूतानीत्यादिगीतास्व विशेषनिर्देशेन निद
र्शनया सर्वात्मत्वं प्रोच्य सामान्येनाप्याह विश्वावासमिति विश्वमावासयति स्थापयति विश्वस्मिन्वावासो यस्य तत् विश्वानि रूपाणि
शरीराणि यस्य विश्वेषामीशं नियंतारं परमेश्वरं ईश्वराणामपीश्वरं त्वा त्वां स्मरामि ४३ तस्य च त्वा तेन सांख्यशास्त्राद्यमेव कारणमित्याह
सांख्येति सांख्ये चतुर्विंशतितत्त्वप्रतिपादके पंचविंशतितद्रूप पुरुषपर्यवसाने उक्तं वेदांतवादे च सर्वं खल्विदं ब्रह्म तज्जलानिते

सांख्ये वेदांतवादोक्तं बहुशाखास्थिरीकृतम् अनादिमध्यनिधनं सदसच्च सदेव यत् ४४ एकं
त्वनेककार्येष्वभवभेदसमाश्रितम् अनाख्येयगुणाख्यं च वर्गाख्यविश्वगणाश्रयम् ४५

मित्येतदक्षरमिदं सर्वं तत्त्वमसि अयमात्मा ब्रह्मेत्यादिके वेदांतवादे च प्रतिपादितं तदेव चान्येषु शास्त्रेष्वपि फलतयानिष्पादितं
इत्याह बहुभिः शाखाभिः शास्त्रोपनिषन्मन्त्रवादिभिः स्थिरीकृतं एकस्य शुद्धस्य परब्रह्मात्मकस्य फलस्य लेशोपलेशादिभिः प्रतिपा
दितं तदुक्तं सारस्वते स्तोत्रे त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च रुचीनां वैचि
त्र्यादृजुकुटिलनानापथजुषां नृणामेको गम्यस्त्वमसि पयसामर्णव इवेति शास्त्रेषु निरूपितं प्रतिपादयति अनादीत्यादि विश्व
स्यादिमध्यतयास्वछादिरहितं गगनादिवत्तज्जनिमन्मादियोगि यस्मज्जगत्तो यो निभूतमक्षरात्मकं न वासत्त्वानुविद्धतया शुद्धत्वाज्जी
वोपि यत्र भवति न वा सत्त्वरात्मकं प्रकृत्यादि यच्च सदेव कालत्रयेप्यबाधितं वा रितात्स्वरूपान्यथाभावयोगि सत्त्वं परमा
र्थसद्रूपं तद्रातत्वोभयोर्निर्णीतत्वात् ४४ एकं सजातीयादिभेदरहितं त्वामुख्ये महितीयं च स्फटिकतटमिव सर्वोपाधिप्रति

मा त्र
टी
१०३
103

त्वायासहिमलमाद्यनेकैव अविद्यावद्भिर्मलिनहृदयैः अकृतमप्यद्वैतब्रह्मात्मतत्वं असंभावनाद्याक्रांतचित्ततया न श्रद्धीयते अत उक्तं ना
पेक्ष्यमिति अपि रेकार्थे मोहनिद्राया उत्थेयत्वमेवार्थः तत्र हेतुः भवे संसारे भेदैः समाश्रिते तदाश्रयणं विहाय भेदानामसत्वात् वा
द्यसंवेदनोज्झिततया स्वस्वभावनिरूपहितपरब्रह्मात्मतयावस्थानादविद्यमानाख्योविशेषनिर्देशो यस्य तत् फलव्याप्ति
निषेधेमात्मतानिवृत्तिप्रयोजनपरिशिष्टमाणायां हमेषसांगुणानां सर्वतत्वादीनामाख्यो विशेषनिर्देशो यस्य तत् तदुक्तं सर्व
ततातलिरनादिबोधः स्वतंत्रतानित्यमलुप्तशक्तिः अनंतशक्तिश्च विभोर्विधिज्ञाः षडाहुरंगानि परमेश्वरस्येति वर्गः समता ब्रह्मा
दिकीटांतेषु एकरूपता यस्य यदुक्तं यैव चिद्गगनाभोगे स्त्रवणे भाति भास्करे यथा विवरकोशस्थे सैव चिकीटकोदरेष्विति वर्गः सहायः

नानाशक्तिमत्वमेकं शक्तिवैभवभाविकम् सत्वोत्तमं महासौख्यं रूपं तत्वविभाव्यते ४९
एवं देवि त्रयाभावं सकलं निष्कलं च यत् अद्वैतावस्थितं ब्रह्म यच्चाद्वैतव्यवस्थितम् ५०

आवर्तमानेषु अनुहृतो वा एवंरूपो विशिष्टनिर्देशो यस्य तत् त्रयाणां गुणानां सत्वरजस्तमसां प्रकृतिस्वरूपाणां साम्यमाधारः ४५
नानाशक्तिमत्वं सृष्ट्यादिनिर्माणेः त्वं ब्रह्मांतेषु कानां ब्रह्मादीनामेकं प्रधानं ईशानं सर्वशक्तिमत् अत्र हेतुः शक्तीनां वैभवं अनंत
सम्यग्दृशिमत्वं तत्स्वभाविकं प्रकटयत् स्वतंत्रत्वात् तस्य मुख्यस्वभावमाह सत्वोत्तमपरमानंदः सार्वभौमाद्यानंदानां शततमगुणोत्कृष्टा
नां विश्रांतिस्थानम् अत एवाह महासौख्यमिति निर्विशेषं महानंदमित्यर्थः अस्यानंदस्यान्ये मात्रामुपजीवंतीत्यादिश्रुतेः एवं स
गुणं निर्गुणं च ब्रह्मपरमार्थं निर्विभागं तत् विद्रूपया देव्या परामर्शात्रूपया इति तं प्रतिपादितम् ४९ उक्तमुपसंहरति एवमिति सक
लं तत्समस्ता जीवितं अद्वैतं जीवः निष्कलं उपाध्युपशीर्णं ब्रह्म तदेवाह अद्वैतावस्थितमिति द्वैतेप्रपंचे ५० १०३

उक्तं स्तोत्रार्थसंग्रहकृत् शब्दात्मिकाया भगवत्याः सरस्वत्याः सर्वोपलम्भपरमकारणत्वं दर्शयति येऽर्था इति येऽर्था योगिप्रमत्ताः पर
माणवादयो नित्याः पदार्थाः ये चान्ये तेभ्यो विलक्षणा अनित्या भूम्यादयः स्थूलाः पदार्थाः विलयादौ विनश्यन्ति कारणात्मना तिष्ठन्ति
ये च स्थूला विराडादयो नार्या इति स्थूला महाविराडादयोऽपि बोध्याः ये च सूक्ष्माः प्रकृतिप्रधानादयः अतिसूक्ष्मं च निरूपयिष्यते निर्वि
शेषं परं ब्रह्मतत्त्वं ये वा भूमौ लोकालोकान्तायां विप्रकृष्टाः पदार्थाः अन्तरिक्षे भुवो लोके अन्यतः स्वरादिसत्यान्तेषु लोकेषु भूमिग्र
हणेन यामलानामपि ग्रहणं तेन चतुर्दशभुवनान्तर्वर्त्ति यत्किंचित्पदार्थजातं समस्ति तेषां सर्वेषां हे देवि ततत्पदार्थस्य सन्नि
कृष्टविप्रकृष्टदेशकालनानाकारिकारितशब्देन सर्वव्यापकेन वेदशास्त्रादिना परिगृहीतमूर्त्तिना काशवचनसंघर्षजनितेन

येऽर्था नित्या ये विनश्यन्ति चान्ये येऽर्थाः स्थूला ये च सूक्ष्मा निसूक्ष्माः ये वा भूमौ येऽन्तरिक्षेऽन्यतो वा तेषां देवि त्वत्त एवोपलब्धिः ४८ यच्चामूर्तं यच्च मूर्तं समस्तं यद्वा भूतेष्वेकमेकं च किंचित् यद्दिव्यास्ति क्ष्मातले खेऽन्यतो वा तत्सम्बद्धं त्वत्स्वरैर्व्यञ्जनैश्च ४९

व्यवहरणशीलत्वेन एव पराद्रूपाया उक्तरीत्या पश्यन्त्यादिषड्हृन्माया उपलब्धिः प्रतीतिर्भवतीत्यर्थः यदुक्तं न सोऽस्ति प्रत्ययो लो
के यः शब्दानुगमादृते अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते इति वाक्यपदीये एवकारेणान्ययोगव्यवच्छेदकेन देव्याः परमका
रणत्वं प्रदर्शितम् ४८ त्वत्त एवोपलब्धिरित्युक्तं तत्स्पष्टयति यच्चेति हृदये चैतन्यमात्रसत्ताकं स्वयंज्योतीरूपं तत्तत्परामर्शात्मनाप
रारूपये त्वया स्वात्मानमविभक्तमपि विभागयुक्तमिव चिकीर्षुरकामयत सोऽकामयत बहु स्यां प्रजायेयेति श्रुतेः ततश्च मूला
धारादिचक्रेषु विश्रम्य गगनसंघर्षितेन श्वसनेन तेषु तेषु अस्थानेषु कण्ठादिष्वाहत्य विषक्रमात्रेयं वर्णानामभिव्यंजकं
करणविहृतम् वर्णाश्च पदवाक्यादिकल्पनयार्थसंकेतपरिच्छिन्नतामापन्ना एवं क्रमप्रसूता इमे वं तदपि त्वद्रूपः शब्दः

मा पु
टी
१४

पदं वाक्यं वाक्यमित्याद्युच्यते तथा च श्रुतिः चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः गुहा त्रीणि निहिता नेंग
यंति तुरीयं वाचो मनुष्या वदंतीति अत्र वाचस्तुरीयं चतुर्थमंशं वैखर्याख्यमित्यर्थः अकारो वै सर्वा वाक्सैषा स्पर्शोष्मभिर्व्यज्यमाना
बह्वी नानारूपा भवति मितममितं स्वरः सत्यानृते एष तद्भावभौतिको विकारो वाचः वदन्वाक्प्रोवाच मंतरो यमयतीत्यादि च
वाजसनेयके सा वाक्य यया समे भाषितः सा हि वक्तुर्नित्या नाकृचे तस्य ज्योतिः स्वरूपा तेन नित्यसमवायिनी नहि वक्तुर्वक्तेर्विपरि
लोपो विद्यते विनाशित्वादिति श्रुतेरितिरर्थः पदार्थस्तु अमूर्तं ब्रह्म व्याकृताकाशवाय्वादिकं मूर्तं ततो विलक्षणं तेजोब
न्नभूतभौतिकादिकं समस्तं समष्टिरूपं व्यष्टिरूपमाह यद्वांतर्याम्यादिभूतेष्वाकाशादिष्वेकमेकं प्रत्येकं द्व्यष्टभूतं परमार्थ
त एकमेव किंचिद्रूपं शक्तिदिवि स्वर्गे अंतराले स्यांतरिक्षे अधस्तात् पातालादिषु तत्सकलं तत्त्वैः स्वरैः सम्यग्व्याप्तिभिः स्वरैरकारादिभि
र्व्यंजनैः ककारादिभिः ऊष्मादिभिः स्पर्शैः सम्बद्धः शब्दार्थयोर्नित्यसमवेतत्वात्सम्यक्फलपर्यवसायि वद्धमित्यर्थः अभिव्यक्त
वाकं चात्र यास्यामि त्रावरुणां मदनाइत्वरं तीत्रिषष्टिं वर्णात् ततः प्रकटकरणैः प्राणसंगात्प्रसूते तां पश्यंतीं अथ मनुदितां मध्य
मां बुद्धिसंस्थां वा चं वक्त्रकरणविघटितैर्वैखरीं च प्रपद्ये इति स्वराद्वाविंशतिश्चैव स्पर्शानां पंचविंशतिः यादयश्च स्मृता ह्यष्टौ चत्वा
रश्च यमाः स्मृताः अनुस्वारो विसर्गश्च ᳵक ᳶप इति पराश्रयौ एते गदिता वर्णास्त्रिषष्टिरिति सूरिभिः एतैर्वर्णैरिदं जगत्सर्वं चरित्रं स्या
त्तु एवेत्यादि शिक्षाशास्त्रे अत्रायं विभागः अ इ उ ऋ वर्णाश्चत्वारो ह्रस्वदीर्घप्लुतभेदाद्द्वादश लृकारस्य दीर्घाभावात् ह्रस्वप्लुत
भेदाद्द्विधा संध्यक्षराणां ह्रस्वाभावाद्दीर्घप्लुतभेदादष्टविधानि तान्येवं द्वाविंशतिः स्वराः कादयो मांताः
पंचविंशतिः स्पर्शाः अंतस्था ऊष्माणश्च चत्वारः यमाश्चत्वारः कुं खुं गुं घुं इति सदृशो
वर्णाः अनुस्वारविसर्गजिह्वामूलीयोपध्मानीयाश्चत्वार इत्यादि

104

सप्तस्वरूपतद्वन्तं कुञ्जवासिनी दन्धनीतियादेवी मद्दयांवंदशाद्दरीमावतानगा जिज्ञातदायिश्रीवागीशायमवदनेशतिद्वजः ५५। गीत
सप्तहायस्वर्वकतयाचमत्कारितान्यसहायं वंप्राप्यते सहायमितिमेमज्ञेनोभावयोः ५२ सप्तस्वरानिषादर्षभगान्धारषड्जमध्यमधैव
ताः पंचमश्चेत्यमी सप्ततंत्रीकण्ठोत्थिताः स्वराइति तेषांच मूर्छनार्थग्रामाः सन्निधापनं ग्रामस्त्रामं त्रयोणि इतिभुरादौ तेचस्वरसप्तस्वास
प्ततयारागाः स्थानेशंचरणंगेयस्य यदूर्ध्वं हृदयग्रंथेः कपोलफलकादयः प्राणसंचारणस्थानंस्थानमितिमभिधीयते इतितेचसप्तस
रसंबंधात्सप्तैवरागाभैरवोमेघमल्लारो दीपकोमालकोसकः श्रीरामश्चापिहिंदोलोरागाः सप्तप्रकीर्तिताः इतिगीतशास्त्रे तेषांच
नियतस्वरव्यंजनवशानिगीतकानि गाथाश्च सप्तैवस्वराणांसप्तानांश्रेणीनायां सप्तैवमूर्छनाः षड्जंग्रंयेप्रवस्तुः स्वराः श्रेणीमूर्छनासे
जड उवाच एवंस्तुता तदा देवी विष्णोर्जिह्वा सरस्वती प्रत्युवाच महात्मानं नागमश्वतरं ततः ५० सरस्वत्युवाच
वरं ते कम्बलभ्रातः प्रयच्छाम्युरगाधिप तदुच्यतां प्रदास्यामि यत्ते मनसि वर्तते ५१ अश्वतर उवाच सहायं दे
हि देवि त्वं पूर्वं कम्बलमेव मे समस्तस्वरसम्बन्धमुभयोः संप्रयच्छ नौ ५२ सरस्वत्युवाच सप्तस्वरा ग्रामरागाः स
प्तपन्नगसत्तम गीतकानि च सप्तैव तावतश्चापि मूर्छनाः ५३ तानाश्चैकोनपंचाशत् तथा ग्रामत्रयं च यत् एतत्स
र्वं भवान्गाता कम्बलश्चैव तेऽनघ ५४ ज्ञास्यते मत्प्रसादेन भुजगेन्द्रापरं तथा चतुर्विधं पदं तालं त्रिप्रकारं लयत्रयं
सुदाहृतेति ५५ तेषां च स्वराणां प्रत्येकं सप्त सप्त तानाः एकोनपंचाशत् तत्र लयः सहचारी तालमृदंगवेणावेणहस्तामितयातो
सप्तकाले विरामो लयः निषादर्षभगांधारास्त्रयोग्रामत्रयं षड्जमध्यमधैवतं वापंचमश्च सामान्यं विश्रांतिस्थानं याश्रूर्छनेत्युच्यते तदुक्तं
षड्जं मयूरो वदति सचमतश्च पंचमं ऋषभ साधारणे काले पिकः कूजति पंचमं रेभंति ऋषभं गावस्तेचमताश्च पंचमम् अजाविकश्च
गान्धारं सचमतश्च पंचमम् मध्यमं क्वणति क्रौंचः सच मतश्च पंचमम् धैवतं हेषते वाजी सच मतश्च पंचमं हस्ती गर्जति नैषादं स
चमतश्च पंचममिति केचिन्निषादर्षभगांधारास्त्रिविधं ग्राममाहुः तदुक्तं निषादर्षभगांधारं भेदं ग्रामत्रयं स्मृतमिति ५८

मा ३ टी १०५ अपरमन्यत्पदंस्थानंउरःकण्ठःशिरोदन्ताहृदयकपोलादयश्चेतिचतुर्विधंस्थानंतालंकालक्रियामानंददातिएतत्सप्तस्वरास्तेषांनिसामंम
त्रंमध्यंतारमितित्रिप्रकारंतेषांचव पाणांमंद्रादीनांलयंचत्रिविधम् ५५ पतिःतेषांमंद्रादीनांविच्छित्तिःतत्ताहस्वर्यात्तच्चत्रिप्रकारंश्रोतो
यंवादित्रंतच्चचतुर्विधंततंश्रानद्धंसुषिरंघनंचततंवीणादिकंवाद्यमानद्धंमुरजादिकंवंशादिकंतत्सुषिरंकांस्यतालादिकंघनमित्यमरः अ
परमितिरागाणांषड्जादिस्वरविश्रान्तीनांगमकस्वभावानांश्रुत्येरागपरिपोषकाणांरसात्मकांगहारागेयानुभावहावभावादीनांतानं
प्रबंधश्छन्दोर्थगुणानाशक्तिरूपम् यदुक्तं गतिस्तुरागःसंगीतेसच्चालापःप्रकीर्तितः गमकोश्रुत्येरागस्यपरिभावोरसा

पतिस्त्रयंतथातोद्यंमयादत्तंचतुर्विधं एतद्भवान्मत्प्रसादान्नागेंद्रापरंचयत् ५६ यस्योनगीतमायत्तंस्वर
व्यंजनयोश्चयत् तदशेषंमयादत्तंभवतःकम्बलस्यच ५७ यथानान्यस्यभूलोकेपातालेवापिपन्नगे प्रणे
तारौभवंतौचसर्वस्यास्यभविष्यतः पातालेदेवलोकेचभूलोकेचैवपन्नगा ५८ जडउवाच इत्युक्त्वासातदा
देवीसर्वजिह्वासरस्वती जगामादर्शनंसद्योनागस्यकमलेक्षणा ५९ तयोश्चतथयथाहृतंप्रज्ञाश्रेसर्वम
जायत विज्ञानमुभयोरग्र्यंपदतालस्वरादिकं ६० इतिमार्कंडेयपुराणेकुवलयाश्वीयेसरस्वतीस्तुतिर्नाम

मकः गीतिःप्रबंधश्छन्दोर्थगुणानाशक्तिविषयत्वइति अत्रचस्वराणांदेशकालक्रियादिभेदेनानंत्यंविज्ञेयम् यदुक्तंदेशका
लादिभेदेनक्रिययास्वरमिश्रयाभेदाश्चषट्पंचाशत्कोटयोगीतस्यकीर्तिताइत्यादि ५६ अपरमितस्यविषयमाह यस्येति
ति यस्यगाथादेःगीतमालापःआयत्तमधीनंस्वरव्यंजनयोश्चयदधीनं ५७ प्रणेतारौगायकौशिक्षाकारकौच अस्योक्त
स्यस्वरादेःलोकस्यार्थिनश्च ५८ ५९ ६० मार्कंडेयभावप्रदीपेषड्विंशोध्यायः ॥

105

१ संहतया त्वस्मयावाचा कलौ मधुरस्फुटध्वनी २ २ ४ ५ ६ जातिं पूर्वजन्म स्मरतीति तथा यास्मात् तद्वत् पूर्ववत् योगिनी योगयुक्ता योगमाता योगोपदे

जड उवाच ततः कैलासशालेंद्रशिखरस्थितमीश्वरं गीतकैः सप्तभिर्गीतैस्तंत्रीलयसमन्वितौ १ आरिराध
यिषू देवमनंगांगहरं हरम् प्रचक्रतुः परं यत्नमुभौ संहतवाक्कलौ २ प्रातर्निशायां मध्याह्ने सन्ध्ययोश्चापि
तत्परौ तयोः कालेन महता स्तूयमानो वृषध्वजः ततोथ गीतकैस्तोषं प्राह हे श्वो व्रियतां वरः ३ ततः प्रणम्याश्व
तरः कम्बलेन समं तदा व्यज्ञापयन्महादेवं शितिकण्ठमुमापतिं ४ यदि नौ भगवान्प्रीतो देवदेवस्त्रिलोचनः
ततो यथाभिलषितं वरमेतं प्रयच्छ नौ ५ मृता कुवलयाश्वस्य पत्नी देवमदालसा तेनैव वयसा साद्य दुहि
तृत्वं प्रयातु मे ६ जातिस्मरा यथा पूर्वं तद्वत्कान्तिसमन्विता योगिनी योगमाता च मद्देहे जायतां भव ७ म
हादेव उवाच यथोक्तं पन्नगश्रेष्ठ सर्वमेतद्भविष्यति मत्प्रसादात्समस्तं च शृणु चेदं भुजंगम ८ कामं वेदम
भिध्यायन्कुरु त्वं पितृतर्पणं श्राद्धावसाने शान त्वं मध्यमं पिण्डमात्मना ९ भक्षिते तु ततस्तस्मिन्भवतो म
ध्यमात्फणात् समुत्पत्स्यति कल्याणी तथा रूपा यथा मृता १० जड उवाच एतच्छ्रुत्वा ततस्तौ तु प्रणि
पत्य महेश्वरम् रसातलं पुनः प्राप्तौ परितोषसमन्वितौ ११

पुत्री ७ चकार उपायविशेषद्योतकः ८ अशान भक्षय अभिध्यायन् चिंतयन् श्राद्धस्यावसाने समाप्तौ पितृणां स्नानं तर्पणे ९ फणा

१२ १३ गुप्तां गोपितां रक्षितां श्वेतगृहे रहःस्थाने १४ नागपतेरश्वतरस्य पुरं १५ १६ देवत्सौ मानदः मानकृत् १७ १८ अब्रूतां प्रकथयतां प्रणयोपेते

मा पु
टी
१०६

106

तथा चक्रतवास्याइंस नागः कम्बलानुगः पितरंच मध्यमं तद्यथावदुपजग्मिवान् १२ तमभिध्यायतः
कामं ततः सा तनुमध्यमा जज्ञे निःश्वासतः सद्यस्तद्रूपा मध्यमा फणात् १३ नचापि कथयामास कस्यचि
त्स भुजंगमः श्वेतगृहे तां सुदंतीं सखीभिर्गुप्तामधारयत् १४ तौ चात्रदिनमागम्य सुतौ नागपतेः पुरम् ऋत
ध्वजेन सहितौ विक्रीडाते मराविव १५ एकदा तु सुतौ प्राह नागराजो मुदान्वितः यन्मया पूर्वमुक्तं न क्रि
यते किं न तत्तथा १६ स राजपुत्रो युवयोरुपकारी ममांतिकं कथं नानीयते वत्सावुपकाराय मानदः
१७ एवमुक्तौ ततस्तेन पित्रा स्नेहवता सुतौ गत्वा तस्य पुरं सख्ये रेमाते तेन धीमता १८ ततः कुवलयाश्वं तौ
कृत्वा किंचित्कथान्तरम् अब्रूतां प्रणयोपेतं स्वगेहागमनं प्रति १९ तावाह नृपपुत्रोसौ नन्विदं भवतोर्गृहम्
धनवाहनवस्त्रादि यन्मदीयं तदेव वाम् २० यद्यस्ति वांछितं दातुं धनं रत्नमथापि वा तद्दीयतां द्विजसुतौ य
दि वां प्रणयो मयि २१ एतावतापि दैवेन वंचितोस्मि दुरात्मना यद्युवाभ्यां ममत्वं नो मदीये क्रियते गृहे २२
यदि वा मत्प्रियं कार्यमनुग्राह्योस्मि वा यदि मद्धने मम गेहे वा ममत्वमुपकल्प्यताम् २३

तेसख्ये हे १९ नन्वित्यनुज्ञायां वां युवयोः २० अस्य भवतोः पितुः वां युवाभ्यां वां युवयोः २१ एतावतापि युवाभ्यां मामके गृहादौ वक्रतं ममताभ्यां पतेन वंचित

देवतनयाद्यहवयोरिति ॥ इत्यादिकार्यमपिक्रियतां २२

१०५

मत्स्वकं मम संयतने स्वकं आत्मीयं युवां विजानीतं अत्रोपपत्तिमाह सत्वेतिमित्रं २४ शापितौ कृतशपथौ युवां २५ २६ अस्मयाविभिन्नवं २८ २९

युवयोर्यन्मदीयं तन्मत्स्वकं युवयोः स्वकम् एतत्सत्यं विजानीतं सत्यो प्राणो बहिश्चरः २४ पुनर्नैवं विभिन्नौ हे
वक्तव्यौ द्विजसत्तमौ मत्प्रसादपरौ प्रीत्या शापितौ हृदयेन मे २५ ततः स्नेहार्द्रवदनौ तावुभौ नागनन्दनौ
ऊचतुर्नृपतेः पुत्रं किंचित्प्रणयकोपितौ २६ ऋतध्वज न सन्देहो यथैवाहमवादिदम् तथैव चास्मन्मनसि
नात्र चिन्त्यमतोऽन्यथा २७ किं त्वावयोः स्वयं पित्रा प्रोक्तमेतन्महात्मना द्रष्टुं कुवलयाश्वं तमिच्छामीति पुनः
पुनः २८ ततः कुवलयाश्वोऽसौ समुत्थाय वरासनात् यथाह तात तस्मै का प्रणाममकरोद्भुवि २९ कुवल
याश्व उवाच धन्योऽहमति पुण्योऽहं कोऽन्योऽस्ति सदृशो मया यत्तातो माममि द्रष्टुं करोति प्रवणं मनः ३० त
दुत्तिष्ठत गच्छामस्तामात्तां क्षणमप्यहम् नातिक्रान्तुमिहेच्छामि पद्भ्यां तस्य शपाम्यहम् ३१ जड उवाच
एवमुक्त्वा ययौ सोऽथ सह ताभ्यां नृपात्मजः प्राप्य च गोमतीं पुण्यां निर्गम्य नगराद्बहिः ३२ तन्मध्येन ययु
स्ते वै नागेन्द्रनन्दनाः मेने च राजपुत्रोऽसौ पारे तस्यास्तयोर्गृहम् ३३ ततश्चाकृष्य पातालं ताभ्यां नीतो
नृपात्मजः पाताले ददृशे चोभौ सपन्नगकुमारकौ ३४

प्रणवं दृष्टवान् तस्यं ३० अतिक्रान्तं व्यावर्तयितुं पद्भ्यामिति चतुर्थी ३१ ३२ तस्या गोमत्या मध्येन पारे तीरे अस्मिन् तस्या नद्याः ३३ आकृष्य हस्ताभ्यां

गृहीत्वा उभौ विप्रकुमारौ पन्नगकुमारकौ ददृशे ३४

मा पु
टी
१०७

फणेतितस्याभिज्ञानमाह फणामणिभ्यांकृतउद्योतःप्रकाशोययोस्तौव्यक्तःस्वस्तिकोरेखाविशेषस्तस्यलक्षणंययोस्तौसुरूपांगौसुंदरांगौ
तौविलोक्यविस्मयेनोत्फुल्लेलोचनेयस्यतादृशोभवदितिशेषः ३५ ३६ माननीयंपूज्यंदिवौकसांदेवानां ३७ ३८ ३९ अन्यत्रपरस्मिन्देशेमृदं

फणामणिकृतोद्योतौव्यक्तस्वस्तिकलक्षणौ विलोक्यतौसुरूपांगौविस्मयोत्फुल्ललोचनः ३५ विहस्यचा
ब्रवीत्प्रेम्णासाधुभोद्विजसत्तमौ कथयामासतुस्तौचपितरंपन्नगेश्वरं ३६ शांतमश्वतरंनागंमाननीयं
दिवौकसां रमणीयंततोपश्यत्पातालंसनृपात्मजः ३७ कुमारैस्तरुणैर्वृद्धैरुरगैरुपशोभितं तथैवनाग
कन्याभिःक्रीडंतीभिरितस्ततः चारुकुण्डलहाराभिस्ताराभिर्गगनंयथा ३८ गीतशब्दैस्तथान्यत्रवेणु
वीणास्वनानुगैः मृदंगपणवातोद्यहारिवेश्मशताकुलं ३९ वीक्षमाणःसपातालंययौशत्रुजितःसुतः
महतात्मानमभीष्टंयंपन्नगाभ्यामरिंदमः ४० ततःप्रविश्यतेसर्वेनागराजनिवेशनं ददृशुस्तेमहात्मा
नमुरगाधिपतिंस्थितम् ४१ दिव्यमाल्याम्बरधरंमणिकुंडलभूषणं स्वच्छमुक्ताफललताहारिहारोपशो
भितम् ४२ केयूरिणंमहाभागमासनेसर्वकांचने मणिविद्रुमवैडूर्यजालांतरितरूपके ४३

गादिभिरातोद्यैर्वादित्रैर्हारीणिमनोहराणिवेश्मनांशतानितैराकुलंसंकुलं ३९ ४० उरगाधिपतिमश्वतरं ४१ स्वच्छाभिर्मुक्ताफ
ललताभिर्हारिणामनोहरेणहारेणोपशोभितं मण्यादीनांजालैरंतरितंविचित्रंरूपकंयत्रतत्रसर्वकांचनेऽआसनेऽआसीनमितिशेषः ४३

तस्य श्रुतध्वजस्य ४४ परिषस्वजे आलिलिंग ४५ उपाघ्राय शिंघित्वा अमित्रवर्गस्य निहंता भव ४६ ते प्रसिद्धा भवतो गुणाः असामान्या विशि
ष्टा ४७ ततस्मात् एतान् गुणान् वर्त्तयंथा वर्त्तयस्व तवहेतः जीवितमिति अगुणो गुणहीनः ४८ निर्वृतिः सोख्यं विश्वासं महाजने सज्जने

सतोम्यो दर्शितस्तस्य जातेः साकमसाविति वीरः कुवलयाश्वोथ पित्रे चासौ निवेदितः ४४ ततोननाम
चरणौ नागेंद्रस्य ऋतध्वजः तस्य पाप्य बलाक्रांतं स नागः परिषस्वजे ४५ मूर्ध्नि चैनमुपाघ्राय चिरं जीवेति
पुत्रक निहंतामित्रवर्गस्य पित्रोः शुश्रूषणं कुरु ४६ वत्सधन्यस्य कथ्यंते परोक्षस्यापि ते गुणाः भवतोम
मपुत्राम्याम सामान्या निवेदिताः ४७ तदेतानेव वर्त्तयंथा मनोवाक्कायचेष्टितैः जीवितं गुणिनः साध्यं जी
वन्नेवमृतो गुणः ४८ गुणवान्निर्वृतिः पित्रोः शत्रूणां हृदयज्वरः करोत्यात्महितं कुर्वन्विश्वासं च महाजने
४९ देवताः पितरो विप्रा मित्रार्थि विकलादयः बान्धवाश्च तथेच्छंति जीवितं गुणिनश्चिरम् ५० परिवाद
निहृमानां दुर्गतेषु दयावताम् गुणिनां सफलं जन्म संश्रितानां विपन्नतैः ५१ जउउवाच एवमुक्त्वा स तं
वीरं पुत्राविदमथाब्रवीत् हृष्टः कुवलयाश्वस्य कर्त्तुकामो भुजंगमः ५२ स्नानादिकं क्रमात्कृत्वा सर्वमे
व यथाक्रमम् मधुपानादिसंभोगमाहारं च यथेप्सितम् ५३ ततः कुवलयाश्वेन हृदयोत्सवभूतया क
थया स्वल्पकं कालं स्थास्यामो हृष्टचेतसः ५४ ॥

५१ अर्थितो वनपकाः विकला रोगिणः जीवितमायुः ५० परिवादानिंदाया निहृमानां विमुखानां दुर्गतेषु दरिद्रेषु विपन्नैस्तैरापन्नैः संश्रिता

नामसंगीतौ ५५

मा॰ पु॰
टी॰
१०८

108

अपचितिंशक्त्रौ ५५ आत्मवानजितचित्तः उपजोषमित्यव्ययं स्वतोऽर्थे यथोपजोषं स्वस्वत्वमनतिक्रम्येत्यर्थः ५९ मार्कण्डेयभावप्रदीपे सप्तविं
शोऽध्यायः पवनाशी भुजंगः उपासांचक्रिरे सिषेविरे १ अन्तर्दृपाभिर्योग्याभिः पुत्रयोः सख्येर्मित्र स्पष्टं ऋतध्वजस्य २ तव भद्रस्य शर्माश्रय सप्तम

अन्ये मे नेच तन्मौलीवचः शत्रुजितः सुतः तथा च कारापचितिं पन्नगेशोऽस्तु दारथीः ५५ समेत्य तेनात्म
जभूपनन्दनैर्महोरगाणामधिपः ससत्यवाक् मुदान्वितोऽन्नानि मधूनि चात्मवान्यथोपजोषं बुभुजे स
भोगभुक् ५९ इति मार्कण्डेयपुराणे मदालसोपाख्याने ऋतध्वजपातालयानं नाम सप्तदशोऽध्यायः २२
जड उवाच कृताहारं महात्मानमधिपं पवनाशिनं उपासांचक्रिरे तौ भूपालतनयस्तदा १ कथा
भिरन्तरूपाभिः स महात्मा भुजंगमः प्रीतिं संजनयामास पुत्रसख्येरुवाच च २ तव भद्रस्य किं ब्रूहि गे
हमभ्यागतस्य यत् कर्तव्यमुरस्तन्माशंकां पित्रीव सतो मयि ३ हिरण्यं वा सुवर्णं वा वस्त्रं वाहनमा
सनं यच्चाभिमतमत्यर्थं दुर्लभं तद्वृणीष्व मां ४ कुवलयाश्व उवाच भवत्प्रसादाद्भगवन्सुवर्णादि गृहे
मम पितुरस्ति मम याप्यपि न किंचित्कार्यमीदृशैः ५

गेहमभ्यागतस्य च कर्तव्यमस्ति तत् शंकां संत्यज्य विहाय यथायं पुत्रो मयि पितरि त्यक्त्वा वश्यकर्तव्यं ब्रवीति तथा त्वमपि मम सुत इव तत्
ब्रूहीत्यन्वयः एवं सामान्यकर्तव्ये चोदितो नागेश्वरेण राजपुत्रः ३ विशेषतश्चोदयति हिरण्यं वेति ४ ईदृशैर्हिरण्यादिभिः कार्यं मोपयोगः ५
१०८

वर्षसहस्राणि ये सहस्रवर्षायुषि शासति रक्षति सति याज्ञोन्मुखे याज्ञासंमुखे ९ जीवति सञ्जीवे सति येच तरुणाय वसंतस्य कोटिनामं तत्स्य
नं तारुण्याद्दुन्नादिसद्भावात् विप्राणां विद्यादिषु निष्ठातानां ब्राह्मणानां कोटिषु प्रतिपाद्येनेतीति शेषः तथैव सभाग्या इत्यर्थः ७ तारुण्यं स
द्भावरूपं यस्मिन्स्मभावयन्नाह मित्राणीति तत्स्यानि विस्मसदृशानि शिष्टानि च श्रेष्ठानि अनामयं नीरोगं स्वजनेन वित्तं धनमाद्रियते आद्री
यते तन्मित्रादिसद्भावरूपं यौवनं मे मम किं तन्नास्तीत्यर्थः ८ सर्वस्य विद्यमानत्वेऽस्य याज्ञानुपयोगमाह अस्तीति अविद्यमाने

ताते वर्षसहस्राणि येशासतो मां वसुन्धरा तथैव वसुधा पातालेन मे याज्ञोन्मुखे मनः ९ ते सभाग्याः स
पुण्याश्च येषां पितरि जीवति तरुणकोटिसमं वित्तं तारुण्याद्द्विजकोटिषु ७ मित्राणि तुल्यशिष्टानि
तद्वद्देहमनामयं जनेनाद्रियते वित्तं यौवनं किं तन्नास्ति मे ८ असत्यर्थे तृणो याज्ञाप्रवणा जायते म
नः सत्यशेषे कथं याज्ञां मम जिह्वा करिष्यति ९ येषां स्वतनये किंचिन्मम गेहेऽस्ति नास्ति वा पितृबा
हुतरुच्छायां संस्थिताः स्वापिनो हिते १० ये त्वबाल्यात्प्रभृत्येव विना पित्रा कुटुम्बिनः ते सशोकाद्वि
भ्रष्टा मन्ये यात्रैव वंचिताः ११ तेषु यत्नप्रसादेन धनरत्नादिसंचयान् पितृसक्ताः प्रयच्छामः काम

याज्ञायां प्रवणं तत्परं अर्थे धनादौ अशेषे सति विद्यमाने मम जिह्वा याज्ञां कथं करिष्यति न कथमपीत्यर्थः ९ एवं स्वस्याधिताभावं प्रद
र्शितदेवाद्वयेन द्रढयति येषामिति हि रेवार्थे तथैव स्वाविन इत्यर्थः १० एतदेव व्यतिरेकेणाह ये त्विति पित्रा विना पितृहीनाः कुटुम्बिनः
कुटुम्बधारिणः विभ्रष्टाः पतिताः धात्रा दैवेन ११ संचयान् राशीन् पिता सन्विद्यमानो येषां प्रयच्छामः ददामः कामतः स्वेच्छया
णटं पित्रासक्तान् पारितोषिकीकृतान् धनराशीन् १२

मा पु
टी
१९

109

स्पलाभमर्वत्संगृह्णाति तत्सर्वमितितत्सर्वं लाभमावनयालोचितं थनादिकं चूडामणिनाशिरोरत्नेन चुंबं स्पृष्टं श्रृंगस्य पादादेः स्पर्शः १२ प्रसन्नेति निः
छन्दवत्प्रसृतं उक्तोराजपुत्रेण १४ प्राप्तमिष्टं न भवेत् मनःसंकल्पः प्रयत्नादेर्व्यतिरेकि १५ एतत् श्रुत्वा तथैव प्रार्थयन्नागेश्वरोपरोधं सफलय
न्नाह भगवन्निति विशेषेणाधिकेन १६ कृतकृत्योतिराकांक्षः तत्कृतकृत्यत्वमाह यदितिपद्यस्मात् श्रृंगेन शरीरेण संश्लेषमाश्लिषं ततः प्राप्त

तत्सर्वमिदं संप्राप्तं यदङ्घ्रियुगलेन च मच्चूडामणिना चुम्बं यच्चाङ्घ्रिस्पर्शमामवान् १३ जडउवाच शृणे
वेप्रसन्नं वाक्यमुक्तः पन्नगेश्वरः प्राहराजसुतं प्रीत्या पुत्रयोरुपकारिणं १४ यदिष्टं तत्सुवर्णादिम
तो वाञ्छतेन मनः यदस्मत्तनयः प्रीतिं तत् सर्वं हि ददाम्यहं १५ कुवलयाश्व उवाच भगवंस्तत्प्रसादेन
प्रार्थितं गृहे मम सर्वमस्ति विशेषेण संप्राप्तं तव दर्शनात् १६ कृतकृत्योस्मि चैतेन सफलं जीवि
तं मम यदङ्गसंश्लेषमितस्तव देवस्य मानुषः ७ ममोत्तमाङ्गे नृपादरजसा यदिहास्पदं कृतं तेन
वनप्राप्तं किं मया पन्नगेश्वर १८ यदि त्ववश्यं परानन्दो वरो मम यथेप्सितः तत्पुण्यकर्मसंस्कारो हृदया
न्मापैतु मे १९ सुवर्णमणिरत्नादि वाहनं गृहमासनं स्त्रियोन्नपानं पुत्राश्च चारुमाल्यानुलेपनं २०
एते च विविधाः कामाः गीतवाद्यादिकं च यत् सर्वमेतन्मम मतं फलं पुण्यवनस्पतेः २१

प्ररं मानुषोमर्त्यधमाराजसः देवस्यसात्विकस्य ७ उत्तमाङ्गे शिरसि त्वदाक्लिप्ममाशिरसि प्राप्तस्पदं प्रतिष्ठा तेनैव किं त्र प्राप्तं कान्तं सर्वमेव प्राप्तं
१८ यद्यपि महात्मनो वचनमनिवार्यं तथाप्येतदस्तित्याह यदिविति संस्कारो भावनात्रूपः मा न्मापैतु मापगच्छतु १९ सर्वं च भोग्यसम
त्वादिकं तत्फलमेवेत्याहद्वाभ्यां २० पुण्यस्य वनस्पतेः पुण्यवृक्षस्य २१

तन्मूलः तस्य स्ववर्णादेर्मूलः यत्नः पुण्योपार्जनमनुमना नापरपर्यायं तिरुपसंहरति पुण्यसकामानामिति पुण्येन त्वराणां २२ एतत् स्वर्गा
दिकं २३ नागेश्वरस्त्वमदालसाप्राप्त्येयेत्तनश्चोदयति तथापीति यद्यपि धर्मस्यैव तत्फलात्तेन प्रार्थनीयं किंचित् याद्येऽसीकर्तव्यं देवादिस
मीपान्नैवेद्यादिवत् २४ राजपुत्रस्तु नागेश्वरेणाथ मे प्रार्थनयाहृतीतार्थोपि पानः पुण्येन चोदितस्तदभिप्रायमविदन्नाशंकनागेश्वरनन्द

तस्मान्नरेण तन्मूलः कार्यो यत्नः कृतात्मना कर्तव्यः पुण्यमुक्तानां न किंचिद्भुवि दुर्लभं २२ अश्व
तरउवाच एवं भविष्यति प्राज्ञस्त्वन्नवधर्माश्रितामतिः सत्यं चैतत्फलं सर्वं धर्मस्यैकं यथात्वया २३ त
थाप्यवश्यं मद्गेहमागतेन त्वयाधुना ग्राह्यं यन्मानुषे लोके दुष्प्रापं भवतो मतं २४ जडउवाच तस्य
तद्वचनं श्रुत्वा स तदा त्वपत्येदनः पुत्रावलोकनं चक्रे पन्नगेश्वरपुत्रयोः २५ ततस्तौ प्रणिपत्योभौ राज
पुत्रस्य यन्मतं तत्पितुः सकलं वीरो कथयामास तत्स्फुटं २६ पुत्रा ऊचतुः तातास्य पत्नी दयिता श्र
वेमं विनिपातितं अमजद्दयिता प्राणान्विप्रलब्धा दुरात्मना २७ केनापि कृतवैरेण दानवेन कुबुद्धि
ना गन्धर्वराजस्य सुता नाम्ना ख्याता मदालसा २८ कृतज्ञोयं ततस्तात प्रतिसंकृतवानिमां नाममात्रा
योभविष्यामेवर्जयित्वा मदालसां २९ दृष्टुं तां चारुसर्वांगीमयं वीरऋतध्वजः तातवांछति यद्येतत्कि
एतत्तासि तंमेवेत ५

नयोर्मुखमवलोकयन्प्रार्थिताभिप्रायमिवचोदयति तस्यैतदिति २५ स्फुटं स्पष्टं राजपुत्रे निजहृद्गतं गोपितमपि ऊचतुः २९ विप्रल
ब्धा वंचिता दुरात्मना दैत्येन २७ २८ अन्याः परास्त्रियो या २९ यद्येतत्तमदालसादर्शनं क्रियते तत्सर्वं कृतं उपकृतं भवेदित्यर्थः ३०

मा॰पु॰
टी॰
१८

110

अश्वतरस्त्वराजपुत्रपरीक्षार्थं तद्दर्शनमसंभाव्यमिवव्रदन्नाह भूतैरिति भूतैर्भूम्यादिभिस्तादृशैरन्योन्यं तद्भवनस्वभावैर्वियोगिनः तद्भव
वनस्वभावस्यपुरुषस्ययोगः सम्बन्धस्तादृशएवतद्भवनस्वभावएवेतिमरणादिकालेवियुक्तस्यभूतात्मकशरीरस्यरूपादियोगोपितादृ
शएवेतिनत्वानेनरूपेणदर्शयितुंशक्यतेतनमद्भुतरूपादियोगोपिचिन्तसर्वंद्रष्टव्यान्तनानुवेयेनस्वप्नादौदृष्टतएवेतिभावः तदाह कथमे

अश्वतरउवाच भूतैर्वियोगिनोयोगस्तादृशैरेवतादृशः कथमेतद्धिनासम्यङ्मायांवाशम्बरोदि
तां ३१ जडउवाच प्रणिपत्यभुजंगेशंपुत्रः शत्रुजितस्ततः प्रत्युवाचमहात्मानंप्रेमलज्जासमन्वि
तः ३२ मायामयीमपश्यंतामममतातमदालसां यदिदर्शयसेमह्यंपरंकृतमनुग्रहं ३३ अश्वतर
उवाच तस्मात्पश्यैवत्सत्वंमायांचेद्द्रष्टुमिच्छसि प्रणयाद्योभवेद्गेहेबालोप्यभ्यागतोगुरुः ३४
जडउवाच आनयामासनागेंद्रोगूढांगेहेमदालसां तेषांसंमोहनार्थायजजल्पचततःस्फुटं ३५
दर्शयामासचततोराजपुत्रायतांशुभां सेयंनवेतितेभार्याराजपुत्रमदालसा यानष्टामयाऽ
ऽहंमतामहंदर्शयामिनाम ३६

तदिति शम्बरेणमायाचार्येणोदितामुक्तामपदिशाम ३१ मदालसाविषयेणप्रेमणाग्रहोस्वतरस्यभार्यादर्शनप्रार्थनाविषयणालज्जया
चसमन्वितः समनुगतः ३२ अपिशब्दस्तादृशोदेहरूपसङ्गावेसंभवंद्योतयति मायामयींमायाप्रकृतिकांपरंगत्वाइदं ३३ प्रणयाद्योद
यनीयः बालोपिगृहेभ्यागतःप्राप्तोगुरुर्भवेत ३४ स्फुटंजजल्पपश्यतामहंमदालसांदर्शयामीत्येवंकथयामासेत्यर्थः ३५ स्फुटंवाक

मार्कण्डेय १८

विगतत्रयो निर्लज्जः त्वरन्संभ्रमं कुर्वन् ३७ मास्प्राक्षीः मास्पृशः प्रागेव सर्वमेव श्रुतं तथा न मद्दर्शनं ३८ ३९ अत्र भज्जस्तत्तांत येव पक्षपल्वित
कं पतति मोहः इति ममेदं मता या मदालसा या दर्शनं मोहो वा तेन नायं मोहो मम यतो हं अलं सम्यक् प्रमयवान् तानवान् तद्वेहतः यतो हं अरी
णां घातनो नाशको प्रियेन मोहेन शास्त्रेण विनेव पातितः पाठांतरे मदालसा मुं मोहितं दृष्ट्वाह अहो स्नेहो हा स्मत्पतेर्ममोपर्यचलेमनश्येना

नृपउवाच सदृष्ट्वातां तदापत्नीं तत्क्षणाद्विगतत्रपः प्रियेति नाम भिक्षुस्तं यथौ वाचमुदीरयन्
निवारयामास च तं नागस्यास्य न तस्तरन् ३७ अश्वतरउवाच मायेयं पुत्र मास्प्राक्षीः प्रागेव कथि
तं तव श्रुतं तथा न स्पृश्यास्याः मायासंस्पर्शनादिभिः ३८ ततः पपात मेदिन्यां सतु मूर्छापरिप्लुतः
हा प्रियेति विवदन्नोथ चिंतयामास भाविनी ३९ मोहो मम मायेनेवेति नालेमस्य यवानहं येनाहं शात
नैरीणां विनाशहेनापातितः ४० मायेति दर्शिता तेन मिथ्या वा यदि वा स्फुटं वायग्न्यंबुतेजसां भ्रमे
राकाशस्य च चेष्टया ४१ ततः कुवलयाश्वं स समाश्वास्य भुजंगमः कथयामास तत्सर्वं मृतसंजीव
नादिकं ४२ ततः स दृष्टः प्रतिलभ्य कांतां प्रणम्य नागं निजमाजगाम सशोभमानः स्वपुरं तमश्व
मारुह्य संचिंतितमभ्युपेतं ४३ इति मार्कंडेयपुराणे मदालसोपाख्याने मदालसाप्राप्तिर्नाम

येपातनेरीणां विनाशहेनापातितइति अहो अस्मत्पतेर्ममोपरि मयि विषयभूतानां स्नेहः अचलं चास्थिरमनो मयि येन स्नेहेन ४०
तेनाश्वतरेण मायेति दर्शिता सेयं मिथ्या माया वा स्फुटं अमाया वा इयं च मायास्फुटं वाय्वादीनां चेष्टया स्पंदनेन दर्शिता वा ऽन्नसमेवे
सर्थः ४१ ४२ प्रतिलभ्य पुनर्लब्ध्वा निजमात्मीयं पुरं संचिंतितं चिंतासमकालमभ्युपेतमभ्युपस्थितमसंततरंगं ४३ अष्टाविंशतितमोध्याः

१ स्वजनं वंधुजनं २ ३ ४ यावज्जीवस्थितत्वात् कामोपभोगतत्तैः प्रारब्धकर्मवेगवशोपगतैः पुत्रपौत्रांकर्मसामान्यात्तांस्तयर्थं वोढुमानावोढुंतीतिवे
क्रांतेनरम्याखशुमिषुरेमे ५ कालधर्ममरणंउपेयिवान्प्राणः ६ । ८ सर्वगोव्यापकेपुरुषेक्रांतस्परस्परूपापन्नस्याचभावाद्विक्रांतइतिनामधे
यस्यनिरर्थकत्वात् यद्वदस्ति वदंतिपुरुषान्प्रात्ताव्यापिनंपुरुषंयतः क्रांतिश्चगतिर्हदिष्टादेशाद्देशांतरेतया सर्वगोनप्रयातीतिव्यापी

जडउवाच आगम्यस्वपुरंसोथपित्रोःसर्वमशेषतः कथयामासतन्वंगीयथाप्राप्तमदालसा
१ ननामसापिचरणौश्वश्वश्वशुरयोःशुभा स्वजनंचयथापूर्वंववन्देनाभिवादितैः २ रमयामास
तन्वंगीयथान्यायंयथावयः ततोमहोत्सवोजज्ञेपौराणांतत्रवैपुरे ३ ऋतध्वजस्यसचिरंतयारेमेसमम
ध्यया कन्दरेषुचशैलानांनिम्नगापुलिनेषुच काननेषुचरम्येषुतथैवोपवनेषुच ४ पुण्यक्षयंवोढु
मानासापिकामोपभोगतः सहतेनातिकांतेनरेमेरम्यास्वभूमिषु ५ ततःकालेनमहताशत्रुजित्स
नराधिपः सम्यक्प्रशास्यवसुधांकालधर्ममुपेयिवान् ६ ततःपौरामहात्मानंपुत्रंतस्यऋतध्वजं अ
भ्यषिंचन्नराजानंसदाचारानुचेष्टितं ७ तस्यकालयतस्तस्यप्रजाःपुत्रानिवौरसान् मदालसायांसं
जज्ञेपुत्रःप्रथमजस्ततः ८ तस्यचक्रेपितानामविक्रांतइतिधीमतः ततस्तेनैवेशुस्माजहासचम
दालसा ९ सावैमदालसापुत्रंबालमुत्तानशायिनं उल्लापनच्छलेनाहरुदमानमविस्वरम् १०

देहेस्वरोयतः ततोविक्रांतसंज्ञेयंमतामममनिरर्थकेति अतउक्तंजहासचमदालसेति ९ उत्तानशायिनं उर्ध्वमुखोदरपादंशेतेर
तिबालस्यशायनस्वभावः अविस्वरमितिविरुद्धस्वरस्यदर्शनंनोत्पन्नादृश्यमर्थः उच्चैर्बालस्यविश्रमार्थंभाषणंगीतिकाकथनं लोरीत

श्रीमार्कंडेयपु १८

१११

तदेवाह शुद्धोसीति तातेति वात्सल्यद्योतकं संबोधनं रेत्यर्धबाल शुद्धोस्यलिप्तोसि भातिप्रियस्वभावोसि नामेति सहचरस्य रूपमाक्षिपति तेन नाम
रूपे देहाद्याश्रये ते निरुपाधेर्न स्तः अग्रासत्यादिकं याद्वत्त्वेन नामरूपपरिहेयत्वेन प्रतिपादितम् तदुक्तं अस्ति भाति प्रियं रूपं नाम चेत्यंशपंचकम्
आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयमिति तयोर्नामरूपयोर्मायामयत्वात्काल्पनिकत्वमाह कृतमिति हि यस्मात् तन्नामास्मिन्नधुनैव
जन्मकाल एवास्माभिर्मातापित्रादिभिः कल्पनया देहेऽत्र तयाभिमनेहकृते नियमितं काल्पनिकस्य नामादेस्तादृशे भूतपंचकात्म
के देहे कल्पितत्वेनासत्तामसत्वेन सनातननिरत्ययसद्रूपेणात्वया संबंधो नास्तीत्युपदिशति पंचात्मकं पांचभौतिकं इदं देहं अस्य
लक्षणादि नामरूपास्पदं ते प्रतीचो नास्ति न वा च त्वं पंचात्मकोसि मायाकारणकपंचभूतात्मको देहो नास्ति अतस्त्वं सर्वतः षड्भिर्भ्यो
व्यतिरिच्यमानः कस्य देहाद्यावेशानंतस्य रिपोषणार्थं प्रार्थ्यमानस्य कस्माद्धेतोः रोदिषि विलापं करोषीत्यर्थः ॥ सर्वकारणस्य परमे

शुद्धोसिरे तात न तेस्ति नाम कृतं हि ते कल्पनयाधुनैव पंचात्मकं देहमिदं न तेस्ति नैवासि त्वं
रोदिषि कस्य हेतोः ॥ नो वा भवान्रोदिति वै स्वजन्मा शब्दोयमासाद्य महीशसूनुं विकल्प्यमाना वि
विधैर्गुणार्थैर्गुणाश्च भौताः सकलेंद्रियेषु ॥१२॥

श्वरस्यानकामस्य रोदनायोगपन्नमेवतवत्स्यायदित्याह नो वा इति भवान्सत्यात्मको विश्वस्य मायादेः प्रपंचस्य जन्मोत्पत्तिर्यस्मात्सतां
दृशस्त्वं नैव विवेकदृष्ट्या रोदिषि विश्वजन्मादिमहाविभूतिमतो न स्वल्पद्रविषयस्य खलु प्रार्थनमनुचितमेव तत इत्यर्थः अथ कोयं
रोदितीत्याशंक्य तस्या विरूपादिविषयव्रातस्य भौतिकत्वबद्धौतिकत्वमेवेत्याह शब्दोयमिति अयं शब्दो गगनगुणो विगुणमायांश
तमोगुणकार्यं महीशसूनुं मद्यादीनां संघमासाद्य तदाधारतयाश्रित्यारोपितः अन्नमयादि त्रिकोशोपाधि गृहीत्वेन षड्भिर्निवर्तना
र्थं तदध्यास्यारोदितीति तदाह विविधैरनेकप्रकारैर्गुणानामिंद्रियाणामर्थैर्विषयैर्हेतुभूतैः प्रार्थ्यमानैर्विकल्प्यमानः शब्दोयं रोदनक्रि
ययात्वय्यारोपितः अतस्त्वमस्माच्छब्दात्पृथक्स्व नाम कामः कथं रोदिषीत्यर्थः न च ते प्रार्थ्यमाना इंद्रियार्थाः सारभूता इत्याह गुणा इति
सकलेष्वेकादशसु करणेषु येगुणाः शब्दादयस्ते भौता भूतविकारा एवाक्रमस्यायतस्त्वत्तत्प्रार्थनया स्वात्मनो रोदनकदर्थनानुचितेति

भा०पु
टी
११२

ननु देहस्य हानिवृद्ध्यादिमत्त्वात्कथं तस्य जात्वमंगीक्रियते इत्याशंक्य तस्य तावतात्मत्वपारमार्थ्यं न घटते इति सदृष्टान्तमाह भूतानीति
यथा इह लोके भूतानि वृद्धादीनि परिदुर्बलानि कृशानि अन्नमयत्वात्तन्मयानी तैः वृद्धादिभिः फलगडैरेव भ्रियमाणो वृद्धिं उपचयं यांति
प्राप्नुवंति तथा इह देहे भूतानि देहस्थान्यारंभकाणि रसादीनि उपवासानशनादिवशात्कृशानि संति अन्नाम्बुपानादिभिर्वृद्धिं यांति
न तावता तस्य पारमार्थ्यं घटते इत्यर्थः आत्मनस्तु सर्वदा सर्वत्र सर्वथा गगनस्येवोपचयापचयाभावात्तत्त्वस्य तमाह एककस्येति तत्र
देहस्थोऽपि ते तव एककस्य सजातीयादिभेदात्तस्य दस्य निर्विकारस्य न वृद्धिर्न वा हानिरपचयो भवति अतस्त्वयाऽविनाशिनाऽकस्य
हेतोः शयते इत्यर्थः केचित्त्वत्र भूतैः स्थितैरन्नाम्बुपानादिभिः परितो दुर्बलानि भूतानि वृद्ध्याद्यहं इह अन्यानि यथा वृद्धिं समायांतीत्यर्थात्
भूतैरन्नादिभिस्तानि हानिं यांतीति तथैककस्योदासीनस्यात्ममयस्य तेन वृद्धिर्न च हानिरिति निरोदनं निषेधे हेतुरयम् ।२३ न चायं देह

भूतानि भूतैः परिदुर्बलानि वृद्धिं समायांति यथेह पुंसाम् अन्नाम्बुपानादिभिरेककस्य न तेऽस्ति
वृद्धिर्न च तेऽस्ति हानिः ।२४ त्वं कंचुके शीर्यमाणे निजेऽस्मिन्नस्मिन्देहे मूढतां माव्रजेथाः शुभाशु
भैः कर्मभिर्देहमेतं मदादिमूढैः कंचुकस्ते निबद्धः २५

त्वं स्वस्वाभाविकोऽस्य शीर्यमाणे तया शरीराभिधानत्वात्कर्मपरवशतया उदितत्वान्न वै तेन तस्माद्विपरीतस्य सद्भावान्नित्ये तेन संबन्धः इत्या
ह त्वं कंचुक इति अस्मिन्निदं भावास्पदे निजे स्वत्वेनाभिमते कंचुके स्थूलाद्यावरणे शीर्यमाणे विनाशोन्मुखेऽपचितिं याते देहे उप
चीयमाने त्वं च तस्माद्व्यतिरिच्यमानेनानाहतोऽविनाशित्वादिधर्मो मूढतामहंकाररूपतापह्रलितस्वभावतां माव्रजेथाः अतः शुभाशुभैः
कर्मभिः पुण्यपापैरेतं इत्यर्थो मदादिदोषदुष्टस्याप्यदोषपरिग्रहार्थमन्वादेशेन निर्देशः देहमुपचयं प्राप्तं शरीरं माव्रजेथाः शुभाशु
भकर्मणोः सुखदुःखफलकानां देहाश्रयाणां तादात्म्याध्यासेनाहं सुखी दुःखी वेति तदभिमानं मालम्बस्वेत्यर्थः कंचुकबन्धने नि
मित्तमाह मदादीति मदोऽहंकारः आदिना ममतापरिग्रहः मदादिभिर्मूढत्वहेतुभिः तेन यः कंचुकः शरीराद्यावरणं निबद्धः ग्रथितः

112

११२

मातापित्रादिदेहानां भौतिकत्वे समानेनत्र प्रतियोगिधियानामांतरकल्पनेनत्वयार्थमेवेत्याह तातेतीति भौतं भूतविकारात्मकं संघं संघातरूपं देहं सर्वत्राविशिष्टमेव तं बहुधा अनेकनामप्रकारकल्पनया मालयेथाः मा कथय कथम् अविशिष्टे देहे नामांतरकल्पनमिति तद्दर्शयति तातेतीति पुत्रस्य प्रतियोगिधियायं देहो मम पितेति किंचिद्भागकल्पनाकथ्यते तस्मिन्नेव भार्यया भर्तृत्वारोपात् भागकल्पनं तथा पितुः प्रतियोगिमस्यपेत्तयायं देहो मम पुत्र इति किंचिदभिधीयते एवं पुत्रस्य प्रतियोगित्वापेतयानेकस्यारोपितेति अम्बा मातेत्युच्यते सैव भर्तृपेत्तया दयितेति किंचिदभिधीयते किंचिच्च होमिथानस्य कल्पकथनाभावे नतस्यान्याभिधानेन व्यभिचार द्योतकः नच स्वरूपतो मात्रादिदेहेषु व्यभिचारो लक्ष्यते तदुक्तं भार्यास्नुषाननंदा च याता मातेत्यनेकधा प्रतियोगिधियायोषिद्विद्यते न स्वरूपत इति ज्ञानवैलक्षण्यमस्तेयवैलक्षण्या विनाभूततत्वात्तेयाकारभेदो न कर्तव्य इत्याशयः देहादिष्वहंममास्पदेषु नामांत

तातेति किंचिन्नयेति किंचिदम्बेति किंचिद्दयितेति किंचित् ममेति किंचिन्नममेति किंचिद्धि
तं संघं बहुधा मालयेथाः २५ दुःखोनिदुःखोपशमाय भोगान्सुखाय जानाति विमूढचेताः ता

रकल्पनावैयर्थ्यं वक्ततो व्यतिरिच्यमानेषु बाह्यार्थेष्विदं तवेदं ममेति कल्पना व्यर्थेत्याह ममेवेतीति इदं वस्तु ममास्ति अर्थादिदं तवेति किंचित्कथ्यते तन्मा कथय तस्य स्वालीयत्वेनाभिमतस्य वस्तुनः परेणास्वीकारान्ममताव्यभिचारः इदं वस्तु न मम स्वत्वानि भवति अर्थात्तवेदमिति किंचिद्धितं संघातबहुधा मालयेथास्तु कम् २५ नच प्रयाससाध्येषु विषयोपभोगेषु तया विवेकिनास् कदापि नभाव्यमित्यस्य निर्वादेनाह दुःखोनीति विमूढचेताः अत्ता नमोहितचित्तः अतस्मिंस्तद्बुद्धिमान् दुःखोनिदुःखस्याध्यान्विषयान् शब्दादीन् भोगा इतोः दुःखोपशमाय दुःखोनामुपशमफलकाय सुखाय इतयेजानाति सर्वस्याप्यादिमध्यावसानेषु दुःखप्रायत्वात् प्रयाससाध्यत्वसाध्यविषयेषु भोगेन सुखमिति प्रीतिं विभातीति विमूढचेतस्त्वमेवात्र हेतुः तदुक्तं भागवते विमोहितो यं जनईशमायया त्वदीयया त्वान भजत्यनर्थदृक् सुखाय दुःखप्रभवेषु सज्जते गृहेषु योषित्पुरुषश्च वंचित इति ।

113

पुनः शङ्कः पूर्वस्मादतिरेके अविमूढचेतास्तु विवेकदशाशारदचन्द्रकिरणोत्करधवलीकृतहृदयो यतो विद्वान्विज्ञानवान्मनीषी तावे
वस्तूनामनित्यपभोगेन रतिकरणोद्दुःखमेवजानाति परिणामपरितापादिना दुःखमेव यायेवमन्यते तदुक्तं पातञ्जले परिणामपरिता
पसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिन इति १९ पूर्वश्लोकार्थं द्रढयितुमियोग्यानित्यानित्यानिनोः क्रमेणयोषितिरागो वि
रागश्च हेतव इति निर्वेदरागपार्थं सम्यगस्माह हा सेति योषिता या हासः शारदसुधांशुकौमुद्या इवोल्लास इति कविभिर्वर्ण्यते सोस्थीनां दं
तादीनां केकसानां संदर्शनमेवेति बीभत्सतादवर्णनीयएव तथा यदतोर्नेत्रयोर्युगमद्वयं अम्बुजतुलमतिशयेनोत्पलं शृङ्गारिविकासि
तस्य रसिद्धेनोपसेयं तद्वसायाः तृतीयार्थे षष्ठी वसया शोणितमांसादिद्रवेण कलुषमाविलमिति बीभत्सतया परिपादनीयमेव त
याकुचौ कांचनघटाविवेति वर्णितौ आदिना ऊर्वोः परिग्रहः तौ च रंभास्तम्भकाण्डेनोपमितौ तत्सर्वं पीनं स्थूलं च तदुच्चं पिशितमांसम

हा सोऽस्थिसंदर्शनमप्यलिप्सु यममस्तुज्जलेन कलुषं वसायाः कुचादि पीनं पिशितं घनं तत्स्थानं र
तेः किं नरकं न योषित् ७ यानं क्रियां यानस्तं च देहं देहे पिचास्यः पुरुषो विनष्टः ममत्ववुद्धि
नैतथा यथास्मिन्देहेति मात्रं तव मूढ नैषा १८

व इत्थं यां प्राणान्तरमणीयां योषिन्नारी रतेः स्थानमास्पदं अभिमन्तासाव स्तविचारदृश्याविचार्यमाणा नरकं प्रति विकृताऽश्रयाऽङ्गलो
स्वदा च किं न भवतीति सर्वस्य जनस्य तासां नारायणरूपा नारी प्रसूतेः सततं परिमाजैवेति नार्या पुरुषस्येव हि भोगेच्छानितरां भवति
यदुक्तं मोतापाये यस्य स्त्री तस्य भोगेच्छा निःस्त्रीकस्य न भोगभूः स्त्रियं त्यक्त्वा जगत्त्यक्तं जगत्त्यक्त्वा सुखी भवेदिति ८ स्त्रीपुत्रदेहाद्यनात्म
त्माभिमानोपनतं दुःखं भियातद्रूपएव एव दृष्टाः संसारवारिधिरत्वयाशोचनीयो न तत्परिमितस्पर्शलाभाभावभावनया नवरोदनं
विद्यात त्वमिन्नाशयेन परमात्माभिदेशनां सोपालम्भमुपदिशति यानमिति न वेति वेदादिषु यदुक्तमसमेरण वेदान्तकं पासं तो
एविस्मयामंत्रणो वत्रेति नयानाद्यविद्यावशोत्थापितक्रियाकारकादिलेपत्तनादिभेदस्य ।

तद्व्यवहारपरिगृहीतकाल्पनिककर्त्रादिनिर्देशस्य सम्बन्धिनी यथा यदा तया निर्दिश्यमाना विवेकिनो दृश्यमाश्चैवा पुनर्दर्शनपथमागताह्
ढता आत्मन्यतात्माध्यारोपरूपा अनात्मनि वात्माध्यासात्मिका एवं च स्वात्मनोपि विस्मृत्या योजनशतसहस्रेष्वपि तस्य गवेषणात्मिका च
मूर्खता त्वया शोचनीयेति शेषः किं न स्वात्मनो मूढतामात्मा विवेकभ्रममात्रसिद्धामनुशोचसीत्युपालंभः यदुक्तं श्रीभागवते त्वामात्मा
नं परं मत्वा परमात्मानमेव च आत्मा पुनर्बहिर्मृग्य अहो ज्ञजनताज्ञतेति तामेवमूर्खतां तन्निरासाय परमात्मनि श्रौमिताहंकारप
रिहारेण तत्कर्त्राभिमानोपायेन पराभिमानदार्ढ्याय स्वाभिमानं प्रदर्शयति यानमिति इदं तन्निजस्वभावस्यात्मनो व्यवहाराय घटयोगतिः
क्रियात्वं च तत्र क्रिया या स्वरूपप्राधान्येन गौणत्वानाभासात्मिकैका जानातीत्यादावन्तःकरणवृत्तिविशेषरूपा क्रियात्ता धात्वा
आत्माभासविशिष्टस्य तिङर्थाश्रयः परस्पराध्यासेनाभासत्वज्ञयोर्विवेकाग्रहात् तदुक्तमाचार्यैः आत्माभासस्तत्तिङ्बोधाव
र्थस्य धियः क्रिया उभयं चाविवेकेन जानातीत्युच्यते मृषा बुद्धेः कर्तृत्वमध्यस्य जानातीति तदुच्यते तथा चैतन्यमध्यस्य तत्त्वं बुद्धे
रिहोच्यते इत्यादि द्वितीयात्तु ज्ञानस्य प्राधान्येन गुणीभूतक्रियाया विवेकालोकनिर्मलीकृतधिषणानुगमेनापवर्गपर्यवसायि
नी गीतादिषु शास्त्रेषु प्रतिपदं प्रतिपाद्यतेति तथा च प्राणचिन्नेहितायतं कर्मत्वं नेच कर्मधीद्रियनिर्वाह्यमिति व्यवहारद्वयम
पविद्योपहितत्वरूपेणाश्रयं तत्र द्वयस्यापि उपायत्वापन्नस्याश्रपराभिमाननिरासाय पराभिमानं प्रतिपादयति यानं गमनक्रिया
गत्यर्था ज्ञानार्था इति नियमेन यानं ज्ञानमपि तदुभयं क्रियैवेति ज्ञातव्यं तत्र याने उक्तद्वयात्मके इतं स्वभावतस्त्वात्मसक्तं देहं स्थूल
सूक्ष्मात्मकं क्रमेण कर्मज्ञानसाधनं हेतुरूपं भवति तस्योभयस्यापि कर्तारमधिष्ठानमाह देहे इति देहेष्वेकरूपेणस्थः चिद्रूपत्वात्
तो व्यतिरिक्तः उभयोरप्याश्रयः न हि स्वतंत्रस्य कर्तृत्वभावेन स्थूलादिस्वात्मिकार्ये प्रगल्भते सुषुप्तिसमाध्यादिषु तथोपलभ्यमान
त्वात् पुरिशरीरद्वये शयनात्पुरुषः तदध्यासेन कर्ता भोक्ता च तथा चोक्तं श्रीभागवते भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्माय शेते यद
दमूषु पूरुषः भुंक्ते गुणान्षोडश षोडशात्मक इत्यादि स एव सर्वात्मतया सर्वतो व्यतिरिच्यमानत्वेन पराहं तथा च पुरुषः शरीरस्य

च्यते इति उपहितानुपहितरूपो द्विविध आत्मा पुरुषशब्देनोच्यते तथा चाश्रुतिः य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवतीति सोपाधिः सर्वात्मा पुरुषः प्रतिपादितः यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् विज्ञातारमरे केन विजानीयात् इति निरुपाधिः पुरुषः श्रूयते इत्युक्तः स्थित इत्यलोकेवितनमात्मानं लोकं चात्मनि पश्यतीति तमेव निर्दिशति अविनष्ट इति मरणादिषु देहस्य नाशेपि स्थूलदेहस्य च ब्रह्माहमस्मीति विमर्षेण नाशेपि अविनाशी आतिवाहिकात्मकस्य देहस्याभिमाननिर्हरणेनैव हि मोक्षोपलब्धिरिति बोध्यम् अविनाशिनेश्रुतिः अविनाशी वा अरे अयमात्मेति अविनाशि तु तद्विद्धीति च स्मृतिः अस्मिन् चिदानंदाकाशरूपे अप्यवलोक्यमाने अनंतरे अहंकारयोगेन यातादृशी विधा ह्रो मम त्वबुद्धिरिति अहं ब्रह्मास्मीति पराभिमानस्तत्र न भवति यथा यादृशी अभिमानं निविडं डम्बरमयमित्यर्थः देवी ह्येषा गुणमयी मम

इति मार्कण्डेयपुराणे मदालसोपाख्याने पुत्रोल्लापने नामैकोनत्रिंशोऽध्यायः २९ जड उवाच वर्धमानं सुतं तं सा राजपुत्रं दिने दिने तमुल्लापनादिना बोधमनयन्निर्ममात्मकं १ यथा यथा बलं लेभे यथा लेभे मतिं पितुः तथा तथात्मबोधं च सोवाप मातृभाषितैः २ इत्थं तया स तनयो जन्मप्रभृति बोधितः न चकार मतिं प्राज्ञो गार्हस्थ्यं प्रति निर्ममः ३

मायाउरत्यया इति गीतासु ममत्वबुद्धिरेव अंतरंगतयाभिमानिते देहे उपचयापचयादिदोषसहस्रभाजने अयमहं नाम गोत्रवर्णजात्यादि निबंधनं भवतीति तव मुखे परिदृश्यमानं गौणमनुभावतो शुद्धैव संसारारण्यभ्रमणमोहभयास्पदात्तव पर्यस्यतीति वेदादीनामत्रावधेयोर्थः स्वरूपमेव सुधीभिर्वेदितव्य इति अस्मिन् काष्ठके सद्धृदयहृदयपरिस्पंदिनोर्थाननेकोपायप्रयोजनाभवंती त्वपदेश सर्वस्मिन् तत् सो काष्ठकमिति विस्तरभयान्न विरम्यते २९ मार्कण्डेयभावदीपे एकोनत्रिंशोध्यायः निर्ममात्मकमिति ममतया निष्क्रांत आत्मा चिन्मय स तथा तं बोधं निर्विशेषात्मानुभवं १ बलं देहिकं पितुः सकाशान्मतिं शास्त्रादिगोचराम् २ प्राज्ञः मद्गुरुः ३

114

पुरुषस्यगगनस्येवामूर्तत्वात्स्वशोभनोवाकस्यस्येतिनैरर्थ्याभिप्रायेणात्रमदालसायाहासः यद्वक्ष्यत्यत्रपदमेवसुबाहुरितियासंज्ञाकृता
त्वस्यकृतस्येति निरर्थासाप्यमूर्तत्वात्पुरुषस्यमहीपतेइति ४ तथेतिविक्रान्तस्यभ्रातुःप्रकारेण ५ अतिचिरंसुबाहुदेवतिर्यङ्नरादिषुपुरुष
स्यात्मनएकत्वान्मूर्तानांभूतेभ्यएवविनाशदर्शनात् अमूर्तस्यगगनस्येवशस्त्रादिभिश्छेत्तुमशक्यत्वात् शत्रुमर्दनेत्यभिधानस्य
वैयर्थ्याभिप्रायेणात्रतस्याहासः यद्वक्ष्यति पुत्रस्ययत्कृतंनाममतत्तीयस्यारिमर्दनः मन्येतदप्यसम्बद्धंस्मरणेचाप्यत्रकारणम्

द्वितीयोस्याःसुतोजज्ञेतस्यनामाकरोत्पिता सुबाहुरयमित्युक्तेसाजहासमदालसा ४ तमप्येवंय
थापूर्वंबालमुल्लापवादिनी प्राहबाल्यात्सचप्रापतथाबोधंमहामतिः ५ तृतीयंतनयंजातंसरा
जाशत्रुमर्दनम् यदाहतेनसासुभ्रूर्जहासातिचिरंपुनः ६ तथैवसोपितन्वङ्ग्याबालत्वादवबोधि
तः क्रियाश्चकारनिष्कामोनकिंचिदुपकारकं ७ चतुर्थस्यसुतस्याथचिकीर्षुर्नामभूमिपः ददर्शतां
शुभाचारामीषद्धासांमदालसां ८ तामाहराजाहसतींकिंचित्कौतूहलान्वितः क्रियमाणेसकृन्नाम्निक १९
थ्यतांहास्यकारणं ९ विक्रान्तश्चसुबाहुश्चतथान्यःशत्रुमर्दनः शोभनानीतिनामानिमयामन्येकृता

एकएवशरीरेषुसर्वेषुपुरुषोयदा तदास्यराजन्कःशत्रुःकोवामित्रमिहेष्यते भूतैर्भूतानिमृद्यन्तेअमूर्तोमृद्यतेकथम् क्रोधा
दीनांपृथग्भावात्कल्पनेयंनिरर्थकेति ६ उपकारकंस्वर्गादिप्राप्तिकारणम् ७ ईषद्धासांमन्दस्मितांपूर्ववत्कल्पनायाहास
स्याविर्भूयमानत्वात् ८ राज्ञाअभिप्रायंज्ञातंकिंचित्कौतूहलेनान्वितः ९ शोभनानीतिस्वजातिसदृशानायोग्यानि १०

तदाहयोग्यानीति शौर्यस्यादीपोतिशयस्तेन युतानि अर्थवन्ति अर्थयोग्यानि ११ आत्थ कथयसि १२ कनीयान्कनिष्ठः १३ अलर्क इति नाम्नो योग
तो रूढितश्चार्थसम्बन्धाभावात् प्रहस्य उपहस्य १४ असम्बद्धं अनर्थकं १५ इयं नामरूपा व्यावहारिकी व्यवहारप्रयोजना नाम्नां विक्रान्तादीनां

योग्यानि त्वत्र वंश्यानां शौर्यादीपयुतानि च अर्थवन्त्येतानि चेष्टान्येव इति मे मनसि स्थितं तदस्य क्रियतां ना
म चतुर्थस्य सुतस्य मे ११ मदालसोवाच मयाज्ञा भवतः कार्या महाराज यथात्थ मां तथा नाम करि
ष्यामि चतुर्थस्य सुतस्य ते १२ अलर्क इति धर्मज्ञः ख्यातिं लोके प्रयास्यति कनीयानेष ते पुत्रो मतिमां
श्च भविष्यति १३ तच्छ्रुत्वा नाम पुत्रस्य कृतं मात्रा महीपतिः अलर्क इत्यसम्बद्धं प्रहस्येदमथाब्रवीत्
१४ भवत्या यदिदं नाम मम पुत्रस्य कृतं शुभे किमीदृशमसम्बद्धमर्थः कोस्य मदालसे १५ मदालसोवा
च कल्पनेयं महाराज कृता सा व्यावहारिकी त्वत्कृतानां तथा नाम्नां शृणु भूप निरर्थतां १६ वदन्ति पु
रुषाः प्राज्ञा व्याप्तिमन्तं पुरुषं यतः क्रान्तिश्च गतिरुद्दिष्टा देशाद्देशान्तरं तु या १७ सर्वगो न प्रयातीति व्या
पी देहेश्वरो यतः ततो विक्रान्तसंज्ञेयं मता मम निरर्थका १८ सुबाहुरिति या संज्ञा कृता न्यस्य सुत
स्य ते निरर्था साप्यमूर्तत्वात् पुरुषस्य महीपते १९

त्रयाणां १६ तत्र विक्रान्तसंज्ञाया निरर्थतामाह वदन्तीति प्राज्ञाः प्रबुद्धाः १७ सर्वगः सर्वत्र वर्तमानः देहस्यादि विषयेश्वरः प्रेरकः गतिसंक
ल्पस्य सर्वसिद्धत्वात् १८ अन्यस्य द्वितीयस्य सुबाहुत्वस्य मूर्ताश्रयत्वात् पुरुषस्य गगनादिवदमूर्तत्वात् देहद्वयाद्व्यतिरिच्यमानत्वात् १९

कारणं निमित्तं २० शरीरेषु देवतिर्यगादिषु अत एव गीतासु सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु साधुष्वपि च पापेषु समबुद्धिर्विशि-
ष्यते इति समबुद्धिर्वै विशिष्टेन निर्दिष्टम् २१ एवं नाम्नो भागं निरर्थीकृत्य मर्दनस्य द्वितीयस्य समर्थाश्रयस्य पदस्याल्लिनैरर्थ्यमा-
ह भूतैरिति मृद्यन्ते इह मूर्तानां भूतानां मूर्तैरेव भूतैर्मर्दनं प्रसिद्धं न त्वमूर्तस्य मूर्तेभ्यो मर्दनं भवति व्याघातात् अत एवाह अमूर्तो
मृद्यते कथं च कथमपि अत्र मदुपपन्नहेतुमाह क्रोधादीनामिति पृथग्भावात् आत्मव्यतिरिक्तचित्तधर्मत्वात् कामः संकल्पो वि-

पुत्रस्य यत्कृतं नाम मत्तीयस्यारिमर्दनः मन्ये तदप्यसम्बद्धं शृणु चाप्यत्र कारणं २० एक एव शरीरेषु स-
र्वेषु पुरुषो यतः ततोस्य राजन्कः शत्रुः को वा मित्रमिहेष्यते २१ भूतैर्भूतानि मृद्यन्ते अमूर्तो मृद्यते कथं
क्रोधादीनां पृथग्भावात्कल्पनेयं निरर्थिका २२ यदि संव्यवहारार्थमसन्नाम प्रकल्प्यते नाम्नि तस्मादल-
र्केति नैरर्थ्यं भवतो मतं २३ जड उवाच एवमुक्तस्तया साध्व्या महिष्या स महीपतिः तथेत्याह महाबुद्धि-
र्दयितां तथ्यवादिनीं २४ तं चापि सा सुतं सुभ्रूर्यथा पूर्वं सुतांस्तथा प्रोवाच बोधजननं तामुवाच स पार्थि-

चिकित्सा क्रीडीत्येवं सर्वं मन एवेति श्रुतेः २२ असदसम्बद्धं वस्तु तत्त्वमलर्क इति शब्दाकरस्तूच्यते यथा गवादीनां पञ्चत्वाच्छे-
कत्वमापन्नानां व्यवहाराय कल्पनामाश्रित्याभिधानं क्रियते तथास्यापि पूर्वमस्माकमविद्यमानत्वात्कर्मपारवश्येनास्मद्देहत्वा-
जन्मवासत्वरत्नदृष्टानामडित्यादिवदनर्थकमपि सार्थकमिव व्यवहारेण सम्पद्यते इति भावः २३ साधुसम्यक्प्रोक्तिं पुत्रकं महिष्याः
स्या महाबुद्धिः महती मदालसा प्रोक्तज्ञानपर्यवसायिनी बुद्धिर्यस्य तथ्यवादिनीं सत्यवदनशीलां २४ पूर्वसुतान्ज्येष्ठांस्त्रीन्प्रबोधितवं

मार्कण्डेयटी ५८

मा पु
टी
११६

अभावाय समुच्छेदाय संततेर्वंशस्य तुष्टः पित्रादीनामृणापनयनयेन न निवृत्तिमार्गतत्परस्य पुत्रस्य ऋणापाकरणाभावात् अवबोधो निवृत्तिमार्गेण स्वलभं ता
नेन स्वदानेन आदेशनेन २१ तेन त्वया प्रवृत्तिमार्गे पित्रादिसंतोषणरूपे मां नियोजय प्रवर्तयेत्यर्थः २२ एवं प्रवृत्तावस्मिन्प्रवर्तते सति कर्ममार्गः
पितृदेवादिसंतोषणरूपः समुच्छेदं लोपं न गमिष्यति एतदेव विशदयति पितृ पिण्डेत्यादि एवं पुत्रस्यावबोधने कृते पितॄणां पिण्डस्य श्राद्ध
दिदानस्य निवृत्तिरुच्छेदो न भविष्यति साधिता मंत्रणं दयालुनां समां हि सर्वजगदाप्यायककर्ममार्गप्रवर्तनायैव प्रशस्ता प्रवृत्तिः प्रसिद्धा
तत्त्वापियोगमात्रत्वादनादिसम्प्रदायप्रवृत्तं लोकसंग्रहायापि कर्ममार्गसंप्रदायप्रवर्तनमेव युक्ततरमिति सामिप्रायम् २३ किंच

करोषि किमिदं मूढे मम भावाय संततेः दुष्टावबोधदानेन यथा शर्वं मतेषु मे २१ यदि ते मत्प्रियं कार्यं
यदि ग्राह्यं वचो मम तदेनं तनयं मार्गे प्रवृत्तेः सन्नियोजय २२ कर्ममार्गः समुच्छेदं नैव गामिष्यति पितृ देवे
पिण्डनिवृत्तिश्च नैवं साधिभविष्यति २३ पितरो देवलोकस्थास्तथा तिर्यक्त्वमागताः तद्वन्मनुष्यतां याता
भूतवर्गे च संस्थिताः २४ सपुण्यान् सपुण्यान् स्वकर्मणा मत्या अपि संस्थितान् पिण्डोदकप्रदानेन नरः कर्मण्य
वस्थितः सदाप्याययते सम्यक् तद्वद्देवातिथीनपि २५ देवैर्मनुष्यैः पितृभिः प्रेतैर्भूतैः सगुह्यकैः वयोभिः त्रिभिर्विशिष्टैर्नागपक्षिभिः

कर्मोपजीविनः पित्रादयोपि तदनुष्ठानतत्परानेव मनुष्याननुपजीवंतीत्याह सार्धेस्त्रिभिः पितरः श्वसादिना भूतवर्गे कृमिपतंगादौ संस्थि
ता जाता ये पितरस्तेन रमेवोपजीवंतीति शेषः २४ एतदेव प्रपंचयति सपुण्यानिति धार्मिकान् तदितरकान् देवान् अविद्यमाने शोभने
स्वेदेहे तपुण्यं येषां तान्यापि नरकेतनकडंकरेन नरकादिस्थान् तथा वुभुतया तामात्कशान् तथापि पापया परिस्थिता नपडस्तान् पिण्डो
दकप्रदानेन श्राद्धेन आप्याययन्वर्धयति २५ वयोभिः पक्षिभिः नागपक्षिभ्य योगवच्छेदेन कर्मस्था प्राप्तासना सनस्थो मनुष्य एव न देवा
नापि तिर्यञ्चः उपजीव्यते तन्त्र वप्रेहिणो भवंतीत्यर्थः २६ ॥

११६

उक्तमुपसंहरति तस्मादिति यत्कार्यमावश्यकं कर्म तत्त्रयोनिभिः क्षत्रियजातिभिः ऐहिकफलं राज्यादिधर्मपरिपालनेन दृष्टं फलं आमुष्मि
कं पारलौकिकं स्वर्गादिफलं अदृष्टं च कर्तव्यं तत्कर्म मे मम पुत्रं कर्म सम्यक् अतिपादय पदे गतस्यार्थस्याप्येतस्य यः कर्मसङ्गो कर्मबोद्धव्यमिति
हिकर्मको गमयति दिश स्वर्गमित्यादिवत् ३२ ३३ दुर्हृदां रिपूणां ३४ यमः सहन्ती तस्याः श्वश्रुः पालनाद्धर्मतो रक्षणात् सुखोपभोग

तस्मात्त्वं गिपुत्रं मे यत्कार्यं तत्त्रयोनिभिः ऐहिकामुष्मिकफलं तत्सम्यक्प्रतिपादय ३२ तेनैव
मुक्ता सा भर्त्रा वरनारी मदालसा अलर्कं नाम तनयं स्ववाचोल्लापवादिनी ३३ पुत्र वर्धस्व मद्भर्तु
र्मनोनन्दय कर्मभिः मित्राणामुपकाराय दुर्हृदां नाशनाय च ३४ धन्योसि रे यो वसुधामशत्रुरेक
श्चिरं पालयितासि पुत्र तत्पालनादस्तु सुखोपभोगो धर्मात्फलं प्राप्स्यसि चामरत्वम् ३५ धरामरा
न्पर्वसु तर्पयेथाः समीहितं बन्धुषु पूरयेथाः हितं परस्मै हृदि चिन्तयेथा मनः परस्त्रीषु निवर्तयेथाः
३६ यज्ञैरनेकैर्विबुधानजस्रमर्थैर्द्विजान्प्रीणय संश्रितांश्च स्त्रियश्च कामैरतुलैश्चिराय युद्धैश्चारी
न्तोषयितासि वीर ३७ बालो मनो नन्दय बान्धवानां गुरोस्तथाज्ञाकरणैः कुमारः स्त्रीणां युवा सत्
कुलस्त्रभूषणानां वृद्धो वने वत्स वनेचराणाम् ३८

ऐहिको दृष्टफलः आमुष्मिकं चादृष्टफलं धर्माद्देवामरत्वं देवत्वं प्राप्स्यसि ३५ ननु कथं धर्मोनुष्ठातव्य इत्याशंक्य तदाह धरामरान्भूदेवा
न्ब्राह्मणान् पर्वसु पुण्यकालेषु धनादिना तर्पयेथाः समीहितं कांक्षितं परस्मै परार्थं परस्त्रीषु परस्त्रीभ्यः विषयभूताभ्यो वा मनो निवर्त
येथाः ३६ अर्थैर्धनैः प्रीणय तर्पय संश्रितानुपजीव्यान् ३७ किं च बाल इति कुमारः षड्वर्गः ३८

मा पु
टी
११७

117

किंचराज्यमिति प्रश्नस्मिमार्गोपदेश सर्वस्मिन्नलम्बभूतमसेवव्याख्यानत्रयपूर्वोग्रंथभागोभविष्यति २५ विंशोध्यायआदितः १ २ अत्रलोके
भारतेकर्मभूमौ प्रश्रयोविनयः ३ तत्रराजपुत्रत्वात्स्वभावभूतंराज्यपालनमेवमहान्धर्मस्तत्रनीतिरूपकारिणीत्यतस्तामेवोपदिशति वत्सेत्या
दिना प्रजानाममात्यादीनांरंजनंतोषस्त्वनुरागः आदितआदौ अविरोधेनस्वधर्मस्याविरोधेन ४ सप्तव्यसनानि अक्षपानस्त्रीसंगमस
क्तिमृगयादण्डपारुष्यवाक्पारुष्याणीति मूलंराज्यमूलंहरंतीतितथा रात्तश्चात्मरक्षणंमंत्रगुप्तिश्चकार्येत्याह आत्मेत्यादि ५ मंत्रगोप

राज्यं कुर्वन्सुहृदो नंदयेथाः साधून्रक्षंस्तात यज्ञैर्यजेथाः दुष्टान्निघ्नन्वैरिणश्चाजिमध्ये गोविप्रार्थे
वत्समृत्युंव्रजेथाः २५ इतिमार्कंडेयपुराणेमदालसोपाख्यानेअलर्कोल्लापनेनामविंशोध्यायः २०
जडउवाच एवमुल्लाप्यमानस्तु सतमात्रादिनेदिने ववृधे वयसाबालोबुद्ध्याचालर्कसंज्ञितः १ सकौ
मारकमासाद्यऋतध्वजसुतस्ततः कृतोपनयनः प्राज्ञः प्रणिपत्याहमातरं २ मयायदत्रकर्तव्यमै
हिकामुष्मिकायवै सुखायतद्वदस्वाशेषं प्रश्रयावनतस्यमे ३ मदालसोवाच वत्सराज्येभिषिक्तेनप्र
जारंजनमादितः कर्तव्यमविरोधेनस्वधर्मस्यमहीभृता ४ व्यसनानिपरित्यज्यसप्तमूलहराणिवैआ
त्मारिपुभ्यःसंरक्ष्योबहिर्मंत्रविनिर्गमात् ५ अष्टधानाशमाप्नोतिस्वपदत्साविरथोयथा तथाराजाप्यसं
दिग्धंबहिर्मंत्रविनिर्गमात् ६ दुष्टादुष्टांश्चजानीयादमात्यानरिदोषतः चारैश्चारास्तथाशत्रोरन्वेष्टव्याः

त्वेनर्थ्यसदृष्टांतमाह अष्टधेति यथाराजाअष्टधाक्रवाकारूप्यवान् स्वस्वपदस्यामात्यादिसहायसंपत्तेरचिरान्नाशमाप्नोतिपाठांतरेस्वच
क्रस्यसैन्यादेः तथाऽसंदिग्धं निःसंशयं बहिर्मंत्रविनिर्गमादपिनाशमाप्नोतीत्यन्वयः अपिर्भिन्नक्रमः ६ अरिदोषतः रिपुप्रयुक्तेभ्योमेदादिभ्योदो
षेभ्यो मात्यान्सहायानुष्टानुभयवेतनग्राहिणो दुष्टान्स्वामिभक्तान् चारैःप्रणिधिभिर्जानीयात् शत्रोश्चाराश्चचारैःकरणैरन्वेष्टव्याः ७

विश्वासोविश्रम्भःकार्यस्ययोगेनाप्यमित्रेपिनविश्वसेदित्यर्थः यदुक्तंमत्स्यपुराणे नविश्वसेदविश्वस्ते विश्वस्तेनातिविश्वसेत् विश्वस्ताद्भयमु
त्पन्नंमूलान्यपिनिकृन्ततीति ८ स्थानंदुर्गादिकंवृद्धिर्धनस्थानतःवृद्धितःकर्माष्टकेनधनादेर्वर्धनंतत्क्षयोधनादेर्विनाशःतद्यत्नेनभाव्यंषाड्गुण्ये
नसंधिविग्रहयानद्वैधासनाश्रयाख्येनगुणितंगुणयुक्तःकृतआत्मायेनतादृशेनभवितव्यं नचकामवशवर्तिनेत्युपलक्षणंसप्तानांव्यसनानां ९
शत्रूणांजयेक्रममाह प्रागात्मेति आत्मामनःपूर्वंअरिषड्वर्गजयेनजेतव्यःततोजितेन्द्रियत्वेनगुणिनामन्त्रिजयःभृत्यानपश्चाद्धनादिदानेनमा
नेन अनन्तरंचपौराणांरंजनया ततःसहायसंपत्तिलाभादरिभिर्विरुद्धेनयेनतज्जयःसेत्स्यतीत्यर्थः १० एवंजयक्रमाभावेशत्रुवशतया

विश्वासोनतुकर्तव्योराज्ञामित्रमवेक्ष्यतु कार्ययोगाद्ध्यमित्रेपिविश्वसेन्नराधिपः ८ स्थानवृद्धि
क्षयज्ञेनषाड्गुण्यगुणितात्मना भवितव्यंनरेन्द्रेणनकामवशवर्तिना ९ प्रागात्मानंविजित्यैवततो
भृत्यामहीभुजा जेयाश्चानन्तरंपौराविरुद्धेनततोरिभिः १० यस्त्वेतानविजित्यैववैरिणोविजिगीष
ते सोजितात्माजितामात्यःशत्रुवर्गेणबाध्यते ११ तस्मात्कामादयःपूर्वंजेयाःपुत्रमहीभुजा तज्ज
येहिजयोवश्यपराजावश्यपतितैर्जितः १२ कामःक्रोधश्चलोभश्चमदोमानस्तथैवच हर्षश्चशत्रवो
ह्येतेविनाशायमहीभुजां १२ कामप्रसक्तमात्मानंस्मृत्वादण्डंनिपातितं निवर्तयेत्तथाक्रोधाद
नुह्रादंहतात्मजं १३ हतमैलंतथालोभान्मदाद्वेनंद्विजैर्हतं मानादनायुषःपुत्रंहतंहर्षात्स्वजयं १४

नर्थमाह यस्त्विति एतानात्मादीन्वैरिणोरिपून्जेतुमिच्छति अजितात्माअजितामात्यश्चभृत्यादीनामुपलक्षणं बाध्यतेजीयते ११ तज्ज
येतेषांकामादीनांजये जयोरिपुपराभवः तैःकामादिभिर्जितोवशीकृतः १२ तानेवनिर्दिशति कामइति कामादिभिर्नष्टनृपानुदाहर
ति कामप्रसक्तमिति दण्डकनामराजानंकामप्रसक्तंसंतंनिपातितंस्मृत्वा आत्मानंकामान्निवर्तयेदितिसम्बन्धः एवमुत्तरत्रसम्बन्धः
अनुह्रादंनामस्वपंहतात्मजंस्मृत्वाततोनिवर्तयेत १३ ऐलंपुरूरवसंलोभाद्दुर्वर्षणः वेनमंगपुत्रं १४ ॥

पभिःकामादिभिःजितैर्वशीकृतैःमहत्त्वेनमहात्मनाताःसर्वंजितंप्राप्तंस्वत्वाविचिंत्यस्वीयान्स्वामीयात् १६ काकाच्चकोमलेभ्यःशंकांकुर्यात्
कोकिलान्मधुरभाषित्वंभृंगात्सारग्राहित्वंवकात्स्वार्थविचिंतनंव्यालादत्तान्नियतवासित्वंशिखंडिनस्त्रिग्धक्रमंहंसात्तुदुग्धमवंतीनीरविवेक
वत् सर्वसारार्थग्राहित्वंकुक्कुटात्कालज्ञत्वंलोहात्दृढत्वंतस्मिन्कार्ये १७ कीटकस्यक्रियांविपत्तेकुर्यात् यथाकीटकोयत्रविवरेतिष्ठतित
स्याविपत्तोदयेत्तमेस्थानेप्रतिवसेत् पिपीलिकानांवल्मीकानांचेष्टाविपत्तोदयेतातेमेघोदयेश्च यथापिपीलिकाअण्डानिसंचारयंतित
थाराजादुर्गंसर्वसामग्रीभिःश्रयेत् १८ यथाग्निविस्फुलिंगाश्चअग्निकणाअग्नेर्निर्गतायत्रपतितास्तत्रदहंतेएवंराजापिस्वप्रताग्निगता

**पभिर्जितैर्जितंसर्वंमत्तेनेनमहात्मना स्वत्वाविवर्जयेदेतान्दोषान्स्वीयान्महीपतिः १६ काककोकि
लभृंगाणांवकव्यालशिखंडिनां हंसकुक्कुटलोहानांशिक्षेतचरितंनृपः १७ कीटकस्यक्रियांकुर्या
द्विपत्तेमनुजेश्वरः चेष्टांपिपीलिकानांचकालेभूपःप्रदर्शयेत् १८ तथाग्निविस्फुलिंगानांबीजचेष्टाच
शाल्मलेः चंद्रसूर्यस्वरूपंचनीत्यर्थेपृथिवीक्षिता १९ बन्धकीपद्मशरभशीलिनीगुर्विणीस्तनात् प्र
सान्नरूपेणाचादेयान्नन्दगोपालयोषितः २० शक्रार्कयमसोमानांतद्वद्वायोर्महीपतिः रूपाणिपं
चकुर्वीतमहीपालनकर्मणि २१**

यत्रारिशस्यानेपतिततत्सर्वंनाशयमीत्यग्निविस्फुलिंगानांचेष्टा यथाशाल्मलेर्वीजंतच्छुतात्गगनेउड्डीनोदृश्योभवेत् तथाराजापिरिपुद
येस्वस्यनिर्बलत्वेज्ञातेनैवकुत्रचिद्रिपोःस्वात्मानंगोचरतयाप्रदर्शयेदितिशाल्मलिवृत्तवीजचेष्टाचंद्रस्यस्वरूपंप्रकृत्याह्लादकतयाह्लादक
त्वंसूर्यस्यस्वरूपंप्रतापवाहुल्यंदर्शयेदितिशेषः नीत्यर्थंदर्शयेदित्यर्थः १९ बंधकामंत्रगामिनी पद्माद्विकासितत्वाकार्येषुशरभात्परा
क्रांततास्शीलिनीशीलवतीतस्याःशुचिचरित्रतागुर्विणीगर्भवतीतस्याःस्तनात्तत्रततासर्वसंपत्तिभरितत्वाचैतेभ्योनृपेणप्रसत्तादे
याशिक्षितया तद्वन्नंदगोपालयोषितःसकाशात्प्रतिदिवसंदधिविक्रयादिवत्प्रतिगृहंकेनचिद्व्याजेनवार्तागवेषणंरूपा २० २१

118

एतानि पंचरूपाणि यथासंख्येनश्लोकैर्दर्शयति यथेंद्र इति तोयोत्सर्गेण जलवर्षणेन आप्याययेद्वर्धयेत् चत्वारो मासान्वार्षिकाण परिचारै
र्भृत्यैस्तत्तत्कार्येषु नियोजितैः ससस्यधनादिना तथा लोकान्वर्धयेत् इत्यर्थः पार्श्वांतरे परिहारैः पालितो विकादिप्रदानैरित्यर्थः २२ यथा सूर्योष्टौ
मासान्भूमिकान् सूक्ष्मेणोपायेन स्वैः रश्मिभिर्भुवोंतरप्रविश्य तोयं सर्वं रसजातं हरति पिबति तथा नृपः शुल्कादिकं चदादि देयं भागधेयं च
सूक्ष्मेणैवोपायेन बलिग्रहणनियमेन न हरतीत्यर्थः २३ यमस्य स्वरूपं दाण्डयितत्वं दर्शयति यथेति प्रियं वल्लभं द्वेष्यं प्रतिगतं क्रमेण धार्मिक

यथेंद्रश्चतुरो मासान्तोयोत्सर्गेण भागतान् आप्याययेत्तथा लोकान्परिचारैर्महीपतिः २२ मासा
नष्टौ यथा सूर्यस्तोयं हरति रश्मिभिः सूक्ष्मेणैवाभ्युपायेन तथा शुल्कादिकं नृपः २३ यथा यमः प्रि
यद्वेष्यौ प्राप्ते काले नियच्छति तथा प्रियाप्रियौ राजा दुष्टादुष्टौ विचारयेत् २४ शशांकमालोक्य यथा
प्रीतिमाप्नोति मानवः एवं यत्र प्रजाः सर्वा निर्वृतास्तच्छशिव्रतम् २५ मारुतः सर्वभूतेषु निगूढश्च
रते यथा एवं चरेन्नृपश्चारैः पौरामात्यादिबन्धुषु २६ न लोभाद्धनकामाद्वा नार्थाद्वा यस्य मानसं
प्रदार्थैः कृष्यते धर्मात्स राजा स्वर्गमृच्छति २७

मधार्मिकं च काले कर्मपरिपाके प्राप्ते नियच्छति स्वर्गनरकाभ्यां दण्डयति तथा प्रियाप्रियौ पवरिष्टदुष्टादुष्टौ स्वकृतदुष्कृतकारिणौ विचारये
दिचार्य च दण्डयेत् प्रत्रोदुष्टश्चेद्दाराहैः शत्रुदुष्टश्चेत्पालितो धिक्कयोग्य इति बोध्यम् २४ सोमस्य रूपमाह शशांकमिति यत्र यस्मिन्राज्ञि
सर्वाः प्रजाः निर्वृताः स्वाविताः सद्राज्ञः शशिनः सोमस्य व्रतं सर्वाह्लादकारित्वमित्यर्थः २५ वायोः स्वरूपमाह मारुत इति निगूढो गूढः प्राण
रूपेण चारैर्गूढपुरुषैः चारैः पश्यंति राजानः स्मृतत्वात् २६ सर्वनीतिसंग्रहमाह न लोभादिति धर्मात्कृष्यते अपकृष्यते स ऋच्छति प्राप्नोति २२

मा पु
टी
११९

119

उत्पथग्राहिणः अधर्ममार्गगामिनः शूद्रान् स्वस्मात् वर्णाश्रमनियमितात् धर्माच्चलितान्नरान् निजेष्प्रमाथ लोके करोति स्थापयति २८ वर्णानां
ब्राह्मणादीनां धर्मा न सीदंति न विशीर्यंते आश्रमा आश्रमधर्मा ब्रह्मचार्यादिषु नियमिताः शाश्वतं स्थिरम् २९ उक्तान्राजधर्मानुपसंहरति
एतदिति कृत्यं कार्यं परमं मम हृद्ध्येः सिद्धेश्च कारकं येन राज्ञः कुबुद्धिभिः पाखंडपदादेः स्वधर्माच्चाल्यंते ३० भूतानां जीवानामुपद्रवादिभ्यः
पालनेनैव राज्ञ एव कृतकृत्यः कृतार्थः स्यात् यतो यस्मात् सम्यक्पालयिता धर्मस्य षष्ठं भागं प्राप्नोति ३१ शक्रस्य सलोकतां स्वर्गमेति प्रा

उत्पथग्राहिणो मूढान्स्वधर्माच्चलितान्नरान् यः करोति निजे धर्मे स राजा स्वर्गमृच्छति २८ वर्णधर्मा
न सीदंति यस्य राष्ट्रे तथाश्रमाः राजंस्तस्य सुखं तात परत्रेह च शाश्वतं २९ एतद्राज्ञः परं कृत्यं तथैतद्वृ
द्धिकारकं स्वधर्मस्थापनं नृणां चाल्यंते ये कुबुद्धिभिः ३० पालनेनैव भूतानां कृतकृत्यो महीपतिः
सम्यक्पालयिता भागं धर्मस्याप्नोति वै यतः ३१ एवं वर्त्तते राजा चातुर्वर्ण्यस्य रक्षणे स सुखी विहर
त्येव शक्रस्यैव सलोकतां ३२ इति मार्कंडेयपुराणे मदालसोपाख्याने राजनीतिर्नामैकविंशोऽध्यायः
२१ जड उवाच तन्मातुर्वचनं श्रुत्वा सोऽलर्को मातरं पुनः पप्रच्छ वर्णधर्मांश्च धर्मांश्चैवाश्रमेषु च १
अलर्क उवाच कथितोयं महाभागे राज्यतंत्राश्रितस्त्वया मम धर्मोऽहमिच्छामि श्रोतुं वर्णाश्रमात्म
कं २ मदालसोवाच दानमध्ययनं यज्ञो ब्राह्मणस्य त्रिधोदितः नान्यस्तुर्यो धर्मोऽस्ति धर्मस्तस्यापदं

प्नोति ३२ आदितएकत्रिंशः सर्वाध्यायांते वर्णधर्मा न सीदंतीत्यादिना वर्णाश्रमधर्मरक्षणेनैव राज्ञः परं सौख्यमिह च परत्र चेत्युक्ता वर्णा
श्रमधर्मान्श्रोतुमुपक्रमते तन्मातुरित्यादिना १ अथ वर्णाश्रमात्मकं धर्मं श्रोतुमिच्छामीत्यन्वयः २ उदितः कथितः तस्य ब्राह्मण
स्य आपद्यापि तत्क्रियादेर्धर्मस्वीकरणं तस्य धर्मस्त्वर्थः ३ ॥

शुद्धे याजनाध्यापने योग्यस्यैव ब्राह्मणादेर्याजनमध्यापनं न तु त्रैवर्णिकबहिष्कृतस्य तथा शुद्धात् स्वधर्मवर्त्तिनः सकाशात् प्रतिग्रहश्च जीवि
काजीवनं ४ एवं क्षत्रियस्याप्याह दानमिति अयं धर्मः क्षितिरक्षणं शस्त्रग्रहणं चास्य जीविका ५ एवं विशोऽप्याह दानमिति वाणिज्यं पशुरक्षाया
शुपाल्यं कृषिर्भूमिकर्षणं इत्यस्य वैश्यस्य त्रिविधा जीविका ६ एवं शूद्रस्याप्याह दानमिति द्विजातीनां त्रैवर्णिकानां शुश्रूषा सेवा कारुकर्म शि
ल्पकरणं जीविकास्य ७ शूद्रस्य विशेषधर्ममाह द्विजातिसेवानिरता इति कुलपावनाः शूद्रकुलपावनाः ८ द्विजातीनां त्रैवर्णिकानां शुश्रू
षायाः सेवायाः पालनं रक्षणं तत्स्ववर्णानां पादान्ते तेनस्याः पोषणं प्रतिदिनं वर्धनं क्रयविक्रयौ वाणिज्यमिति तस्य जीविका उक्तान्वर्णधर्मा

श्रीपु ९२ याजनाध्यापने शुद्धे तथा शुद्धप्रतिग्रहः एषा सम्यक् समाख्याता त्रितयं चापि जीविका ४ दानमध्ययनं
यज्ञः क्षत्रियस्याप्ययं त्रिधा धर्मः प्रोक्तः क्षितेरक्षा शस्त्राजीवित्वमेव च ५ दानमध्ययनं यज्ञो वैश्यस्यापि त्रि
धैव सः वाणिज्यं पशुरक्षा च कृषिश्चैवास्य जीविका ६ दानं यज्ञोऽथ शुश्रूषा द्विजातीनां त्रिधा मया व्याख्या
तः शूद्रधर्मोऽपि जीविका कारुकर्म च ७ द्विजातिसेवानिरता मद्यमांसविवर्जिताः स्वधर्मनियता नित्यं ते
शूद्राः कुलपावनाः ८ तद्वद्द्विजातिशुश्रूषापालनं क्रयविक्रयौ वर्णधर्मास्त्विमे प्रोक्ताः श्रूयन्तामाश्रमाश्र
याः ९ स्ववर्णधर्मात् संसिद्धिं नरः प्राप्नोति न च्युतः प्रयाति नरकं प्रेत्य प्रतिषिद्धनिषेवणात् १० यावन्नो
पनयनं क्रियते वै द्विजन्मनः कामचेष्टोक्तिभक्षस्तावद्भवति पुत्रक ११ कृतोपनयनः सम्यग्ब्रह्मचा

उपसंहरति वर्णधर्मा इति आश्रमा ब्रह्मचार्यादयस्तेषामाश्रयायेषां धर्माणां ९ स्ववर्णधर्मपालने फलमाह स्ववर्णधर्मादिति संसिद्धिं स्वर्गं किं न
च्युतो न स्वधर्मादेतराभ्रष्टः तथा च गीतासु यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानव इति प्रतिषिद्धस्य स्व
र्णाश्रमाविहितस्य निषेवणात् १० तत्राश्रमधर्मसिद्ध्येमुख्यमंगमुपनयनमित्याह यावदिति कामः स्वेच्छाचेष्टा यस्य भक्ष्यमतिक्रांतस्त
तावद्भवति ११ तत्र ब्रह्मचारिणो धर्ममाह कृतोपनयन इति तत्र गुरोर्गृहे १२ ॥

मा।मु
टी
१२०

स्वाध्यायो वेदाध्ययनं तदर्थं गुरोर्निवेद्य तेन गुरुणानुज्ञातेन सति तदर्थं समर्थं भक्षणीयं न सर्वथा सर्वं भिक्षाहृतीनमन्नं न सर्वे स्वेनैव भक्षणीयं न स्वेच्छ
यावत्पर्यः १३ गुरोः सम्यक्प्रीत्युपपादकः प्रसन्नतापादकः आहूतश्चाकारितोऽध्ययनाय तत्परः पाठपरः नान्यमानसप्रकाशचित्तः १४ अनुज्ञा
तो गुरुणा तत्समः वरा शुल्कं दक्षिणां गुरुणा प्रार्थितां दत्त्वा ततोऽनन्तरं गृहस्थाश्रममध्यावसेत् १५ तदा स गार्हस्थ्याश्रमकाम इति चतुर्थस्याप्याश्रमे ब्र
ह्मचारी द्विविधः उपकुर्वाणो नैष्ठिकश्च यदि कामात् विरक्तचित्तः स्यात्तदोपकुर्वाणो गृहस्थाश्रमावासेन तदुर्मतन्यवतयास्वस्योपकारकः तत् य
दि नैष्ठिकः ब्रह्मचारी भवत तत्पवनयास्वात्मस्येव निष्ठा निष्पत्तिः प्रयोजनं यस्येति कामाद्यभावात्तृतीयं चतुर्थं वाश्रममावसेदित्यभिप्रायेणाह

120

स्वाध्यायो ध्याग्निशुश्रूषा स्नानं भिक्षाटनं तथा गुरोर्निवेद्य तच्चाद्यमनुज्ञातेन सर्वथा १३ गुरोः कर्मणि
सोद्योगः सम्यक्प्रीत्युपपादकः तेनाहूतः पठेच्चापि तत्परो नान्यमानसः १४ एकं द्वौ सकलान्वापि वेदा
न्प्राप्य गुरोर्मुखात् अनुज्ञातो वरं दत्वा गुरवे दक्षिणां ततः १५ गार्हस्थ्याश्रमकामस्तु गृहस्थाश्रममाव
सेत् वानप्रस्थाश्रमं वापि चतुर्थं वेच्छयात्मनः १६ तत्रैव वा गुरोर्गेहे द्विजो निष्ठामवाप्नुयात् गुरोरभावे
तत्पुत्रे तच्छिष्ये तत्सुते विना १७ शुश्रूषुर्निरभीमानो ब्रह्मचर्याश्रमं वसेत् उपाहूतस्ततस्तस्माद्गृहस्था
श्रमकाम्यया १८ ततो समानार्षिकुलात्स्वां भार्यामरोगिणीं उद्वहेन्न्यायतोऽव्यंगां गृहस्थाश्रमकारणा
१९ स्वकर्मणा धनं लब्ध्वा पितृदेवातिथीनपि सम्यक्संप्रीणयेद्भक्त्या पोषयेत्स्वाश्रितांस्तथा २०

वेच्छयात्मन इति १६ यदा ब्रह्मचर्याश्रममेवावसेदित्याह तत्रैव वेति निष्ठां निष्पत्तिं तत्पुत्रे गुरोः पुत्रे तत्सुते गुरोः सुते विना गुरुपुत्रस्याभावे १७
निरभीमानः अभिमानातिक्रान्तः उपसर्गस्तत्र स्वमनुष्येषु बहुलमिति दीर्घः ततोऽनन्तरं तस्मात्स्वयमाश्रमादुपाहूतः समाहूतः १८ असमानोऽनेक
ऋषिर्गोत्रकर्ता कुलं यस्यास्तां तस्यां स्वसदृशीं वयआदिना रोगहीनां अव्यंगां विकलांगतारहितां तत्र हेतुः गृहस्थाश्रमकारणं गृहस्य गृहिणी
मूलत्वात् १९ स्वकर्मणा याजनाद्येन प्रीणयेत् तर्पयेत् आश्रितान् भरणीयान् २०

आश्रितानिति प्रपंचयति भृत्यान्सजातीनिति ग्रामीन् भगिन्यादीन् पशवः पशून् २१ अन्त्येह्नकाले अभिगमो भार्यागमनं २२ उद्देशत इति निर्दे
शमात्रेण अवधार्यतां निश्चित्य २३ प्रस्थग्रहणकालमाह अपत्यसंततिमिति आर्तिमतो देहस्य दुर्बलताविकारात् आत्मनो मनसः शुद्धिकारणात् शुद्धेः
२४ तत्र वानप्रस्थाश्रमे अरण्ये वने भवं आरण्यं वन्यं फलादि तस्योपभोगात् तपोभिः शीतातपसहिष्णुतादिभिः आत्मकर्षणं देहशोषणं भूमौ स्थंडिले

भृत्यान्सजातींस्तथा ग्रामीन्दीनानाथपतितानपि यथाशक्त्यन्नदानेन वयांसि पशवस्तथा २१ एष धर्मो
गृहस्थस्यर्तावभिगमस्तथा पितृदेवातिथिज्ञातिभृत्यशेषं स्वयं नरः भुंजीत च समं शक्त्या यथावि
भवमात्मनः २२ एष तूद्देशतः प्रोक्तो गृहस्थस्याश्रमो मया वानप्रस्थस्य धर्मं ते कथयाम्यवधार्यतां २३
अपत्यसंततिं दृष्ट्वा प्राज्ञो देहस्य चानतिं वानप्रस्थाश्रमं गच्छेदात्मनः शुद्धिकारणात् २४ तत्रारण्योप
भोगाश्च तपोभिश्चात्मकर्षणं भूमौ शय्या ब्रह्मचर्यं पितृदेवातिथिक्रिया २५ होमस्त्रिषवणं स्नानं
जटावल्कलधारणं मौनादिकरणं चैव वन्यस्नेहनिषेवणं २६ इत्येष आत्मशुद्ध्यर्थं तपसश्चोपका
रकः वानप्रस्थाश्रमः प्रोक्तो भिक्षोर्हि चरमोऽपरः २७ चतुर्थस्य स्वरूपं तु श्रूयतामाश्रमस्य मे यस्तु ध
र्मोऽस्य धर्मज्ञैः प्रोक्तस्तान्महर्षिभिः २८ सर्वसंगपरित्यागो ब्रह्मचर्यमकोपता यतेंद्रियत्वमावासे नैकस्मि
न्वसतिश्चिरं २९ अनारंभस्तथाहारो भैक्ष्यान्नेनैककालिना आत्मज्ञानावबोधेच्छा तथा चात्मावलोकनं

शय्याशयनं २५ मौनादीनां करणमभ्यासः योगाभ्यासो वा वन्यानां वनोद्भवानां स्नेहानामिंगुदीतैलादीनां निषेवणं २६ आत्मशुद्ध्यर्थं मनसः शु
द्धिः भिक्षोः संन्यासिनः चरमः पाश्चात्यः २७ अस्य संन्यासाश्रमस्य २८ तदाह सर्वेत्यादिना आवासगृहे वसतिः स्थितिः चिरं दिदिनं २९ अनारंभः पा
कस्यानासेवनं भैक्ष्यान्नेन गृहस्थक्रमणलब्धेनान्नेनैककालिना एकवारं आहारः प्राणसंधारणमात्रं आत्मनश्चिदानंदस्वरूपस्य तापते

मा॰ पु॰
टी॰
१२१

121

नेनेतितानंतत्वमादिमहावाक्यं तेनावबोधेच्छाजितासातथाच सति उपायपूर्वकंतयात्मनोवलोकनमसीतिपदेनलक्ष्यस्याखण्डप्रत्यक्के
तन्यस्यावलोकनेऽभवणाधिकमेणासाक्षात्कारः ३० निवेदितउक्तः सामान्यंसाधारणंअन्यदुक्तेभ्योधर्मेभ्योभिन्नम् ३१ तदाह सत्यमिति
यथार्थभाषणं शौचंद्विविधंआभ्यंतरंबाह्यंचआभ्यंतरंप्राणायामभावशुद्ध्यादिकंद्वितीयंमज्जलस्नानादिकं अहिंसापरपीडावर्जनं अन
सूयागुणेषुदोषाविष्करणंतदभावोनसूया क्षमाद्वंद्वसहिष्णुता आनृशंस्यं अकौटिल्यं वंचनाभावः अकार्पण्यं औदार्यं संतोषो दैवलब्धे
र्थेप्रसन्नता ३२ एतेतेशेषगुणावर्णानामाश्रमाणांसाधारणोपेनाभिहिताः ३२ एतेषुप्रोक्तेषुसाधारणेषुसाधारणेषुसमंततः सम्यगंततो निश्च

वत्सर्थेनाश्रमेधर्मोमयायंतेनिवेदितः सामान्यमन्यद्वर्णानामाश्रमाणांचमेशृणु ३१ सत्यंशौच
महिंसाचअनसूयातथाक्षमा आनृशंस्यमकार्पण्यंसंतोषश्चाष्टमोगुणः ३२ एतेसंक्षेपतःप्रोक्ताध
र्मावर्णाश्रमेषुते एतेषुनिरस्यधर्मेषुसेष्वतिष्टेत्समंततः ३३ यश्चोल्लंघ्यपरंधर्मंस्ववर्णाश्रमसंविते
नरोमिथ्याप्रवर्तेतसदंड्योऽभृतोभवेत् ३४ येचस्वधर्मसंत्यागात्मापंकुर्वंतिमानवाः उपेक्षेतनरोता
न्पतेरिष्टापूर्तंविनश्यति ३५ तस्माद्राजाप्रयत्नेनसर्वेवर्णाःस्वधर्मतः प्रवर्तनीयोमिथ्यादंड्याःस्थाप्या
श्चैवस्वकर्मसु ३६ इतिमार्कंडेयपुराणेमदालसोपाख्यानेवर्णाश्रमधर्मानुकीर्तनंनामष्टाविंशो

यपर्यंतंतिष्ठेदित्यर्थः ३३ प्रोक्तानांवर्णाश्रमधर्माणामननुष्ठानेदोषमाह यश्चेति उल्लंघ्यपरमत्युत्तमं अन्यथापरधर्मानुष्ठानतत्परतया
प्रवर्तेत ३४ अदण्डयितूराज्ञोपिदोषमाह येचेति स्वस्यअसाधारणस्यधर्मस्यसंत्यागात् पापंपरधर्मानुष्ठानंपरधर्मोभयावह इत्यादिगी
तास्मृतोक्तात्पापात् उपेक्षतोदण्डयितूराज्ञइष्टापूर्तंवाङ्लकवाटीर्थः ३५ उपसंहरति तस्मादिति स्वधर्मतः स्वधर्मेसम्यक्स्थित्वासि प्रव
र्तनीयःतिष्ठंतोरक्षणीयाइतिशेषः अप्रमथ्यास्वधर्मत्यागेनतेदंड्याः स्वेषुकर्मसुस्थाप्याःस्थापयितव्याइत्यर्थः ३६ आदितोद्वाविंशतमोध्यायः

र्वाख्यायां तेरे गृहस्थस्य धर्मोप्युक्तस्तदधिकारितया तज्जिज्ञासया तद्धर्मान्पृच्छति यत्कार्यमित्यादिना वंधः प्रसवायः वंध इति पाठे नि
ष्फलः यस्य गृहस्थस्य क्रियायाः वक्ष्यमाणप्रकारेण सर्वलोकानामुपजीव्यत्वाडुच्छित्तिरोनत्तं भवति तस्य गृहस्थस्य धर्मान्वदेत्यन्वयः १ यच्च गृह
स्थस्योपकाराय यस्मान्मेघांवानरणां भवति गृहे सतां तिष्ठतां यच्च वर्ज्यं निषेधनीयं यथा यत्कर्म क्रियते यथावत्तन्मम वद २ तत्र सर्वेभ्य आश्रमेभ्यो
गार्हस्थ्यं सर्वोपजीवनात्स्तीतिवत्सेति आख्याय आदाय पुष्णाति प्रीणाति तस्य फलमाह तेन गार्हस्थ्याश्रमोक्तधर्मपालनेन लोकान् स्वर्गा

अलर्कउवाच यत्कार्यं पुरुषेणेह गार्हस्थ्यमनुवर्तता बन्धश्च स्यादकरणात्क्रियायां यस्य चोच्छितिः
१ उपकाराय यन्नृणां यच्च वर्ज्यं गृहे सता यथा च क्रियते तन्मे यथावत्पृच्छतो वद २ मदालसोवाच व
त्स गार्हस्थ्यमास्थाय नरः सर्वमिदं जगत् पुष्णाति सर्वलोकांश्च स जयत्यभिवांछितान् ३ पितरो मु
नयो देवा भूतानि मनुजास्तथा कृमिकीटपतंगाश्च वयांसि पशवोऽसुराः ४ गृहस्थमुपजीवंति
ततस्तृप्तिं प्रयांति च मुखं चास्य निरीक्षंते अपि नो दास्यतीति वै ५ सर्वस्याधारभूतेयं वत्स धेनुस्त्रयी
मयी यस्यां प्रतिष्ठितं विश्वं विश्वहेतुश्च या मता ६ ऋक्पृष्ठासौ यजुर्मध्या सामवक्त्रशिरोधरा इष्टापूर्त
विषाणा च साधुसूक्ततनूरुहा ७ शांतिपुष्टिशकृन्मूत्रा वर्णपादप्रतिष्ठिता उपजीव्यमाना जगतां सा

दीनभिवांछितान्मनोभिलषितान् जयति प्राप्नोतीत्यर्थः ३ लोकान्पुष्णातीत्युक्तं तत्प्रपंचयति पितर इति ४ उपजीवंति पुरवे प्रहिणो भवं
ति ततो गृहस्थात् उपजीवनमाह मुखं चेति अपि कश्चिदयं गृहस्थो नोऽस्मान्भागं दास्यतीति ५ तस्य सर्वोपकारायहेतुत्रयीसेवनमेवे
त्याह सर्वस्येति आधारभूता प्रतिष्ठा महिमानमाह यस्यामिति त्रयीयं वा विश्वस्य हेतुर्निमित्तं ६ तामेव धेनुं शरीररूपकेण दर्शयति ऋ
क्पृष्ठेति पृष्ठं देहस्य पश्चाद्भागः शिरोधरा कन्धरा विषाणे शृंगे साधुसूक्तानि वेदाभ्यासितानि यस्य शोभनः पावनानि तनूरुहाणि लोमानि यस्याः

पादास्तस्यां प्रतिष्ठिता मा चैवं येन जगतां उपजीव्यमाना आनीयमाना अपेक्षणीयेत्यर्थः सा चात्र यानस्थाने च लौकिकधेनुवदपचीय
ते कामदुग्धदोहनादिषु न क्लेशा भवतीत्यर्थः ८ स्तनचतुष्टयं दुग्धदोहस्थाने ९ स्तनानां प्रत्येकं देवादीनामुपजीवनीयत्वमाह स्वाहाका
रमिति स्वधामयं स्वधाकारं स्तनं नरादेत्याः १० आप्याययति वर्धयति ११ तदननुष्ठाननिरतस्य दोषमाह तेषामिति देवाद्युपजीवमाना
नां स्वाहाकारादीनां उच्छेदकर्ता अननुष्ठापकः १२ अनुष्ठानरतस्योदयमाह यस्त्विति तुशब्दः पूर्वस्माद्व्यतिरेके पाययति देवादीनि

स्वाहाकारस्स्वधाकारो वषट्कारश्च पुत्रक हन्तकारस्तथैवान्यस्तस्याः स्तनचतुष्टयं ९ स्वाहाकारं स्त
नं देवाः पितरश्च स्वधामयं मुनयश्च वषट्कारं देवभूतसुरेनराः १० हन्तकारं मनुष्याश्च पिबन्ति सततं स्तनं
एवमाप्याययत्येषा वत्सधेनुस्त्रयीमयी ११ तेषामुच्छेदकर्ता यः पुरुषोऽत्यन्तपापकृत् स तमस्यन्धतामि
स्रे तामिस्रे च निमज्जति १२ यस्त्वेतां मानवो धेनुं स्वैर्वत्सैरमरादिभिः पाययत्युचिते काले स स्वर्गायो
पपद्यते १३ तस्माद्वत्स मनुष्येण देवर्षिपितृमानवाः भूतानि चानुदिवसं पोष्याणि स्वतनुर्यथा १४
तस्मात्स्नातः शुचिर्भूत्वा देवर्षिपितृतर्पणं प्रजापतेस्तथैवाद्भिः काले कुर्यात्समाहितः १५ सुमनोग
न्धपुष्पैश्च देवानभ्यर्च्य मानवः ततोऽग्नेस्तर्पणं कुर्याद्देयाश्च बलयस्तथा १६ ब्रह्मणो गृहमध्ये तु विश्वे
देवेभ्य एव च धन्वन्तरिं समुद्दिश्य प्रागुदीच्यां बलिं हरेत् १७

वतः प्रेरयति उपपद्यते योग्यो भवति १३ अनुदिवसं प्रतिदिनं पोष्याणि वर्धनीयानि तेषां पोषणे दृष्टान्तमाह स्वतनुर्यथेति य
था स्वदेहं प्रयत्नपोषयति तथावश्यकमेतत्कर्तव्यम् १४ तेषां पोषणे विधानमाह तस्मादित्यादिना प्रजापतेर्हिरण्यगर्भस्यापि त
र्पणं कुर्यात् १५ सुमनः पुष्पं अग्नेस्तर्पणं हवनं १६ प्रागुदीच्यां ऐशान्यां १७

122

प्राच्यां पूर्वस्यां दिशि याम्यायां दक्षिणस्यां प्रतीच्यां पश्चिमायां उत्तरत उत्तरस्यां आहरेत् क्षिपेत् १८ अर्यम्णो पितृपतये सूर्याय वा ग्रहेभ्यः सूर्यादि
भ्यो नवभ्यः १९ नक्तंचरेभ्य इत्यनेन दिवाचरेभ्योपि आकाशात् आकाशे निर्वपेत् दद्यात् २०।२१।२२।२३ उत्सर्गं बलिशेषं आदद्यात् अद्भ्या २४

प्राच्यां शक्राय याम्यायां यमाय बलिमाहरेत् प्रतीच्यां वरुणायाथ सोमायोत्तरतो बलिं १८ दद्या
द्ब्रह्मविधाये च बलिं द्वारे गृहस्य तु अर्यम्णोथ बहिर्दद्याद्ग्रहेभ्यश्च समन्ततः १९ नक्तंचरेभ्यो भूतेभ्यो ब
लिमाकाशतो हरेत् पितॄणां निर्वपेच्चैव दक्षिणाभिमुखो स्थितः २० गृहस्थस्तत्परो भूत्वा सुसमाहितमा
नसः यक्ष्मायतनमुद्दिश्य बलिं दद्यात्ततस्तथा २१ ततोन्नमादाय पुनर्भूमिभागे शुचौ बुधः दद्यादशेष
भूतेभ्यः स्वेच्छया सुसमाहितः २२ ततस्तोयमुपादाय तेष्वेवाचमनाय वै स्थानेषु निक्षिपेत्प्राज्ञो नाम्ना
वोद्दिश्य देवताः २३ एवं गृहबलिं दत्वा गृहे गृहपतिः शुचिः आप्यायनाय भूतानां कुर्यादुत्सर्गमादरात् २४
चण्डालश्वपचेभ्यश्च वयोभ्यश्चावपेद्भुवि वैश्वदेवं हि नामैतत्सायंप्रातरुदाहृते २५ आचम्य च ततः कुर्या
त्प्राज्ञो द्वारावलोकनं मुहूर्तस्याष्टमं भागमुद्वीक्ष्योप्यतिथिर्भवेत् २६ अतिथिं तत्र संप्राप्तमन्नाद्येनो
दकेन च संपूजयेद्यथाशक्ति गंधपुष्पादिभिस्तथा २७ नाभिन्नमतिथिं कुर्यान्नैकग्रामनिवासिनं
अज्ञातकुलनामानं तत्कालेसमुपस्थितम् २८

२८

वयोभ्यः पक्षिभ्यः आवपेत् क्षिपेत् विश्वदेवानामिदं वैश्वदेवं नाम यज्ञः अतिथिरावेशिकः २६ २७ अतिथिविधाने नियममाह नाभिन्नमिति

बुभुक्षुं भोक्तुमिच्छन्तं श्रान्तं श्रमेण नाविन्नं २९ चरणं शाखा वो स्वाध्यायं वेदे ३० अतिथिपदं निर्वक्ति अनित्यं हीति न यस्तोस्यात् संग्रहणं यस्तो
न्नं वा दत्तवान् गृहाश्रमी गृहस्थः ३१ तस्मै अतिथये किल्बिषभुक् पापभोगी शरीरं विशतिं ३२ प्रतिनिवर्तते निर्गच्छति तस्मै प्रदाय ३३

123

बुभुक्षुमागतं श्रान्तं याचमानमकिंचनं ब्राह्मणं प्राहुरतिथिं स पूज्यः शक्तितो बुधैः २९ न पृच्छेद्गो
त्रचरणे स्वाध्यायं चापि पण्डितः शोभनाशोभनाकारं तं मन्येत प्रजापतिं ३० अनित्यं हि स्थितो यस्मा
त्तस्मादतिथिरुच्यते तस्मिंस्तमेनयत्तोस्यादृणान्मुच्येद्गृहाश्रमी ३१ तस्माप्रदत्तो यो भुङ्क्ते स ययेकि
ल्बिषभुङ्नरः स पापं केवलं भुङ्क्ते पुरीषं चान्यजन्मनि ३२ अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते
स दत्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति ३३ अप्यम्बुशाकदानेन यद्वाप्यश्नाति स स्वयं पूजयेत्तन्न
रः शक्त्या तेनैवातिथिमादरात् ३४ कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन च पितॄनुद्दिश्य विप्रांश्च
भोजयेद्विप्रमेव वा ३५ अन्नमग्रं समुद्धृत्य ब्राह्मणायोपपादयेत् भिक्षां च याचते दद्यात् परिव्रा
ड्ब्रह्मचारिणे ३६ ग्रासप्रमाणा भिक्षा स्यादग्रं ग्रासचतुष्टयं अग्रं चतुर्गुणं प्राहुर्हन्तकारं द्विजोत्त
माः ३७ भोजनं हन्तकारं वा अग्रं भिक्षामथापि वा अदत्वा तु न भोक्तव्यं यथाविभवमात्मनः ३८

स गृहपतिः ३४ विभवे सति बहून् विप्रान् दैवे एकमेव विप्रं भोजयेत् ३५ अग्रं ग्रासचतुष्टयं उपपादयेद् दद्यात् भिक्षा ग्रासप्रमाणा
परिव्राट् संन्यासी ३६ ग्रासादिपरिमाणमाह ग्रासेति अग्रं चतुर्गुणं षोडशग्रासा हन्तकारं ३७ ३८

२ष्टान्‌ प्रियान्‌ ज्ञातीन्‌ बान्धवान्‌ वंधून्‌ गोत्रिणः अर्थिनो याचकान्‌ विकलान्‌ व्यंगान्‌ आतुरान्‌ रोगिणः ३९ कुटुम्बिना गृहस्थेन समर्थे शक्तो
४० अवसीदति अकिंचनो भवेत्‌ सीदता दीनेन तेन यत्कृतं पापं स समर्थो बंधुः समश्नुते प्राप्नोति ४१ तत्र सायंकाले सूर्योढं अतिथिं भोजयेत सूर्येण चा

भोजयित्वातिथीनिष्टान्‌ ज्ञातीन्‌ बन्धूंस्तथार्थिनः विकलान्‌ बालवृद्धांश्च भोजयेच्चातुरांस्तथा ३९ वा
ञ्छते क्षुत्परीतात्मा यश्चान्योऽप्यममाकिंचनः कुटुम्बिना भोजनीयाः सामर्थ्ये विभवे सति ४० श्रीमंतं ज्ञा
तिमासाद्य यो ज्ञातिरवसीदति सीदता यत्कृतं तेन तत्पापं स समश्नुते ४१ सायं चैव विधिः कार्यः सूर्यो
ढं तत्र चातिथिम्‌ भोजयेत यथाशक्ति शयनासनभोजनैः ४२ एवं वहतः स्तात गार्हस्थ्यं भारमाहितं
स्कन्धे विधाता देवाश्च पितरश्च महर्षयः श्रेयोभिवर्षणाः सर्वे तथैवातिथिबान्धवाः पशुपक्षिगणा
स्मायेचान्ये सूक्ष्मकीटकाः ४४ गाथाश्चात्र महाभाग स्वयमत्रिरगायत ताः शृणुष्व महाभाग गृ
हस्थाश्रमसंस्थिताः ४५ देवान्पितॄंस्तथातिथींश्च तद्वत्संभज्य बान्धवान्‌ जामीर्लब्धाश्च गृहस्थो वि
भवे सति ४६ श्वभ्यश्च श्वपचेभ्यश्च वयोभ्यश्चावपेद्भुवि वैश्वदेवं हि नामैतत्कुर्यात्सायं तथा दिने ४७
मांसमन्नं फलं शाकं गृहे यच्चोपसाधितं न च तत्स्वयमश्नीयाद्विधिवद्यन्न निर्वपेत्‌ ४८ इति श्रीमार्कं
डेयपुराणे मदालसोपदेशे गृहस्थाश्रमकल्पो नाम त्रयोविंशतितमोऽध्यायः २३

स्तंगते आतः सूर्योढो अतिथिः स्मृतः तत्र स्मृतकं ४२ उद्वहतो धारयितः आहितं स्थीकृतं स्कन्धे अंसे ४३ अत्र गार्हस्थ्ये ४४ ४८ भावप्रदीपे त्रयस्त्रिंशो

मा पु
टी
१२४

पूर्वाध्याये कार्यादहरहः श्राद्धमन्नाद्येनोदकेन वा पितृनुद्दिश्य विप्रांश्च भोजयेदित्युक्तमेव वेति श्राद्धस्य कर्तव्यतां सामान्येनोक्त्वा तदेव विशेषतो नि-
र्देशेन वक्तुमाह नित्यं नैमित्तिकमित्यादिना नित्यं नैमित्तिकं नित्यनैमित्तिकमिति त्रिविधं गृहस्थस्य कृतं कर्मणि क्रमः कार्यं कर्म तन्निशामये-
त्यर्थः १ तत्र नित्यमाह पंचयज्ञाश्रितमिति पाठो होमश्राद्धातिथीनां सपर्या तर्पणं बलिरिति पंचसु यज्ञेषु आश्रितं यत्तन्नित्यं पूर्वाध्याये कथितं नै-
मित्तिकं च पुत्रजन्मादिषु जातेष्टिनान्दीमुखादिश्राद्धं निमित्तानां पुत्रजन्मादिकानां हेतोरागतमित्यर्थः २ तृतीयमाह नित्यनैमित्तिकं पर्वश्राद्धा-

124

मदालसोवाच नित्यं नैमित्तिकं चैव नित्यनैमित्तिकं तथा गृहस्थस्य कृतं कर्म तन्निशामय पुत्रक १
पंचयज्ञाश्रितं नित्यं यदेतत्कथितं तव नैमित्तिकं तथा चान्यत्पुत्रजन्मक्रियादिकं २ नित्यनैमित्तिकं
ज्ञेयं पर्वश्राद्धादि पंडितैः तत्र नैमित्तिकं वक्ष्ये श्राद्धमभ्युदयं तव ३ पुत्रजन्मनि यत्कार्यं जातकर्म स-
मं नरैः विवाहादौ च कर्तव्यं सर्वं सम्यक्क्रमोदितं ४ पितरश्चात्र संपूज्याः ख्याता नान्दीमुखास्तु ये पि-
ण्डांश्च दधिसंमिश्रान् दद्याद्यवसमन्वितान् ५ उदङ्मुखः प्राङ्मुखो वा यजमानः समाहितः वैश्वदेव-
विहीनं तत्केचिदिच्छंति मानवाः ६ युग्माश्चात्र द्विजाः कार्यास्ते च पूज्याः प्रदक्षिणं एतन्नैमित्तिकं वृद्धौ
तथान्यच्चौर्ध्वदैहिकम् ७

दिकं दर्शादेर्नित्यत्वान्नित्यत्वं महालयादिनिमित्तेनागतत्वान्नैमित्तिकमित्युभयात्मकं श्राद्धमित्यर्थः नित्यस्य पूर्वोक्तत्वान्नैमित्तिकं अभ्युदया-
ख्यं श्राद्धमभिधास्यामीति तच्छृणु ३ समं सर्वं सम्यक् क्रमेणोदितं कथितं ४ अत्र पुत्रजन्मादौ नान्दीमुखा नाम पितरः पूज्याः दध्ना संमिश्रा-
न् यवैः समन्वितान् पिण्डान् दद्यात् ५ वैश्वदेवं नाम क्रियाविशेषं पूर्वाध्यायोक्तं तेन विहीनम् ६ अत्र नान्दीमुखश्राद्धे एतन्नैमित्तिकं नाम वृ-
द्धिनिमित्तमाभ्युदयिकं श्राद्धम् अन्यदपरं नैमित्तिकपदोदितं पितृणामौर्ध्वदेहाद्भवमौर्ध्वदैहिकं नामैकोद्दिष्टं श्राद्धं वक्ष्यामीति शेषः ७

नदाहमस्तावहनीति एकमुद्दिश्य यात्क्रियते तदेकोद्दिष्टं दैवहीनं विश्वेदेवादिविहीने एकं पवित्रं विष्टरो यत्र ८ अग्नौकरणमष्टकादि तेन व
र्जितं प्रेतस्य मृतस्य उच्छिष्टसन्निधौ ब्राह्मणानां भोजनस्थानं नामोच्छिष्टं तस्य सन्निधौ समीपेन तदुच्छिष्टेन ९ अमुकस्यादक्षयमिति स्थाने विप्राणां
भोजनादौ विप्राणां विसर्जने अभिरम्यतामिति ब्रूयादिति द्वयोरन्वयः १० प्रतिमासं मासिके वत्सरांत आवत्सरं कार्यं ११ पूर्णे वत्सरे सपिं
डीकरणे समानसपिंडीकरणं द्वादशाहे च सपिंडनं कार्यमिति केषांचिन्मतमाश्रित्योक्तं यदा वेति १२ १४ प्रतिमासस्माहश्येपनविधिना

सपिण्डीकरणं तासां पुत्राभावे न विद्यते । प्रतीरेतिलकार्यमेकोद्दिष्टं श्राद्धमतन् दैवहीनं तथा
कार्यं तथैवैकपवित्रकं ८ आवाहनेन कर्तव्यमग्नौकरणवर्जितं । प्रेतस्य ममुकस्येति स्थाने विप्र
विसर्जनं । प्रेतस्य पिंडमेकं च दद्यादुच्छिष्टसन्निधौ । तिलोदके चापसव्येन नामस्मरणान्वितं । अभिर
म्यतामिति ब्रूयाद्ब्रूयुस्ते भिरताः स्म ह । प्रतिमासं भवेदेतत्कार्यमावत्सरं नरैः ११ अथ संवत्सरे पूर्णे
यदा वा क्रियते नरैः । सपिंडीकरणं कार्यं तस्यापि विधिरुच्यते १२ तत्रापि दैवरहितमेकार्घैकपवि
त्रकं । नैवाग्नौकरणं तत्र तच्चावाहनवर्जितं १३ अपसव्यं च तत्रापि भोजयेदयुजो द्विजान् । विशेष
स्तत्र चान्योस्ति प्रतिमासक्रियाधिकः १४ तं कथ्यमानमेकाग्रो वदंत्यामेनिशामय । तिलगन्धोदकै
र्युक्तं तत्र पात्रचतुष्टयं १५ कुर्यात्पितॄणां त्रितयमेकं प्रेतस्य पुत्रक । पात्रत्रये प्रेतपात्रमर्घार्थं च प्रसेचयेत् १६

सपिंडनस्य मासिकत्वापत्तौ ततो विशेषाभिधित्सयाह विशेष इति प्रतिमासक्रियायाः सकाशादधिकः १४ तत्र सपिंडने पितॄणां त्रि
पुरुषाणां पात्रत्रितयं एकं प्रेतस्य पात्रं कुर्यात् तत्पात्रत्रये प्रेतपात्रमर्घार्थं प्रसेचयेत् १६ तत्र मंत्रमाह ये समानाः समनसो जीवा जी
वेषु मामकाः तेषां श्रीर्मयि कल्पतामस्मिंल्लोके शतं समाः समाना व आकूतानि समानादृदयानि वः समानमस्तु वो मनो यथा वः सुसहासती

मा पु
टी
१२५

125

सर्ववन्मासिकक्रियावत् स्त्रीणामप्येवमेव सपिंडीकरणसहितमेकोद्दिष्टं कार्यमित्याह स्त्रीणामपीति मात्रादीनां १७ तत्रापि विशेषमाह पु
त्राभावे इति तदभावे प्रतिसंवत्सरं संवत्सरे संवत्सरेऽपि एकोद्दिष्टं कार्यं १८ मृताहनि मरणदिने वत्सरे वत्सरे नराणां पुरुषाणां यद्वत् तद्वदिह स्त्रियामपि का
र्यमित्यर्थः पुत्रसद्भावे विधिरयं पुत्राभावे सपिंडनेनैकेन कार्यमित्याह पुत्राभावे इति सपिंडाः सगोत्राः तदभावे सगोत्राभावे सहोदरा भ्रात
रः १९ मातुः सपिंडा मातामहसनाभयः मातुः सहोदरा मातुलाः एते विधिं सपिंडीकरणात्मकं सुताया दुहितुः सुता नप्तारः २० मातामहाय

सपिंडीकरणं तासां पुत्राभावेन विद्यते प्रतिसंवत्सरं कार्यमेकोद्दिष्टं नरैः स्त्रियः १८ मृताहनि यथा
न्यायं नृणां यद्वदिहोदितम् पुत्राभावे सपिंडास्तु तदभावे सहोदराः १९ मातुः सपिंडा ये च स्युर्ये च मा
तुः सहोदराः कुर्युरेनं विधिं सम्यगपुत्रस्य सुतासुताः २० कुर्युर्मातामहायैवं पुत्रिकातनयास्तथा
द्व्यामुष्यायणसंज्ञास्तु मातामहपितामहान् २१ स्त्वजयेष्वर्थयामाद्यं श्राद्धं नैमित्तिकेष्वपि सर्वाभा
वे स्त्रियः कुर्युः स्वभर्तॄणाममंत्रकं २२ तदभावे च नृपतिः कारयेत्तस्य कुटुम्बवत् तज्जातीयैर्नरैः सम्यग्दा
हाद्याः सकलाः क्रियाः २३ सर्वेषामेव वर्णानां बांधवो नृपतिर्यतः एतास्ते कथिता वत्स नित्या नैमि
त्तिकास्तथा क्रियाः श्राद्धाश्रितामन्यां नित्यनैमित्तिकीं शृणु २४ दर्शश्चात्र निमित्तं वै कालस्येन्दुक्षयात्म
कः नियतो नियतः कालस्तस्य संसूचयामथ २५ इति श्रीमार्कंडेयपुराणे मदालसोपदेशे नैमित्ति कश्राद्धकल्पो नाम त्रिंशोऽध्यायः ३०

मातुः पित्रे पुत्रिकातनया नप्तारः द्व्यामुष्यायणा तस्यापरस्य चामुष्यायणः द्वयोः पित्रोः श्राद्धादिसम्बन्धी द्व्यामुष्यायणः पुत्राभावे माता
महगोत्रं स्वगोत्रेण सहैकीकृत्य श्राद्धं यथायोग्यं नैमित्तिकैः सपिंडनादिभिर्मातामहपितामहास्तजयेष्वरिस्तत्परेण सम्बन्धः २१ सर्वो
ष्मानां सर्वेषां पुत्रादीनामभावे स्त्रियो भार्याः स्वभर्तॄणाममंत्रकं मंत्रहीनं सापिंड्यादिकं कुर्युरित्यर्थः २२ स्वकुटुम्बवत् स्वबंधुवत् तासां स्त्रीणा
मभावे तज्जातीयैर्नरैस्तत्सजातिभिर्वैः सह २३ तत्र हेतोः सर्वेषामिति यतो यस्माद्धेतोः

नैमित्तिकीं प्रोक्तां क्रियामुपसंहरति एता इति नित्यनैमित्तिकमुभयात्मिकाः २४ चंद्रक्षयात्मकः कालो यो दर्शो माख्येः सततश्राद्धक्रियायां
निमित्तहेतुः तस्य निमित्तत्वस्य दर्शकालस्य नियतः कालः पंचदशपाः तिथिर्नित्यता सर्वदेवहि चंद्रक्षयात्मकः कालो मावस्याख्येः श्राद्धोप
योगीत्यर्थः अस्मिन्दर्शाख्ये काले पंचदशपाः कलाया विनाशो षोडशपा समाख्या यां कलायां स चन्द्र उदयमुदेतीत्यर्थः अतोस्मिन्नित्यनैमि
त्तिकत्वं प्रसिद्धम् पाठांतरे स्पष्टोर्थः एतच्चहासमस्यादिश्राद्धकालोपलक्षणं बोद्धव्यमिति २५ इति मार्कंडेयपुराणव्याख्याने श्राद्धतत्त्व
त्रस्त्रिंशत्तमोध्यायः अथेदानीमव्यवस्थं सपिण्डनप्रेतमोचकत्वदर्शपर्वणाख्यं श्राद्धकल्पं प्रपंचयितुमाह सपिंडीकरणादिति यः
प्रेतरूपस्य पितुर्यः प्रपितामहस्तृतीयः पुरुषः स सपिंडीकरणार्थं सा पिण्डं निर्वर्त्य लेपंवसहरुद्रादित्यादिरूपमुपचयं शुनरो नराम भि
हृद्धिभुनक्ति पालयतीति लेपभुजः मूलविभुजादिना कः याति मुक्तिं इति शेषः सा पिण्डं निर्वर्त्य पितुः स्थाने प्रेतस्य स्थितत्वात् पितामहस्य

मदालसोवाच सपिण्डीकरणादूर्ध्वं पितुर्यः प्रपितामहः स तु लेपभुजो याति प्रलुप्तः पितृपिण्डतः
१ तेषामन्यश्चतुर्थो यः पुत्रलेपभुजामभुक् सोपि सम्बन्धतो हीनमुपभोगं प्रपद्यते २ पितापि
तामहश्चैव तथैव प्रपितामहः पिण्डसम्बन्धिनो ह्येते विज्ञेयाः पुरुषास्त्रयः ३ ॥

स्थाने पितुः स्थितत्वात् प्रपितामहस्य स्थाने पितामहस्य स्थितत्वात् यः पूर्वं प्रपितामहो वृद्धस्तदाप्रभृति मुक्तो भवति तदाह पितृणां
त्रयाणां पुरुषाणां पिण्डतः सकाशात्प्रलुप्तो यतोतो सो मुक्त इत्यर्थः १ एवं वृद्धप्रपितामहस्य मुक्तिं प्रदर्श्य प्रेतस्यापि सपिण्डनेन वृद्ध
पुरुषान्तर्भूतत्वादभ्युदयमाह तेषामिति पितामहप्रपितामहवृद्धानामन्यो यतिरिक्तश्चतुर्थः प्रेतरूपः पिता यः पुत्रस्य लेपभुजां पितामहा
दीनां वस्वादिरूपाणामन्नं भुनक्तीति तथा पुत्रेणैव मोचयित्वा वस्वादिरूपतां प्रापितत्वाद्भुक् पुत्रलेपभुजामभुगिति सोपि प्रेतरूपः पितास
म्बन्धतः पितामहादिषु विभागमेलनादहीनं शर्माणमुपभोगं पितृलोकप्राप्तिरूपं प्रपद्यते प्राप्नोतीत्यर्थः २ एवं सापिण्ड्यस्य प्रेताभ्युदयप्रदत्वं
निरूप्य सामर्थ्येोक्तं सापिण्ड्यं श्राद्धमिति यत्प्रसिद्धं तन्मतिपादयति पितेति द्वाभ्यां पित्रादयस्त्रयः पुरुषाः पतेत्रयाणां पिण्डानां सम्बन्धिनो यिशात्

मा पु
टी
१२९

एवं पित्रादीन्प्रदर्श्य लेपभुजानाह लेपसम्बन्धिन इति लेपस्य वस्त्रादिमयस्याभिवृद्धेः सम्बन्धिनो ये ख्याति रिक्ता स्त्रयः पुरुषाः पितामहप्रपि
तामहवृद्धप्रपितामहात्प्रभृतिभवेति अत्र वस्तुतः प्रपितामहस्य वृद्धस्य प्रपितामहस्य आदित्यात्मकस्य वृद्धस्य मोक्षरूपो मरीचरा
भिवृद्धिः क्रमादर्शिता पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपमिति कर्त्तारं विना क्रमस्यानुप
पत्तिरिति न्यायेन तेषां वत्सान्दर्शितानां पित्रादीनां यजमानो नाम सप्तमः पुरुषो ज्ञेयः तदेवोक्तं मत्स्यपुराणे त्रिभिः सपिण्डीकरणमेको
द्दिष्टे पिता यदा प्राप्स्यति कालेन तदा पुत्रे तत्वं धनात् अत्र सापिंड्यं यदा प्राप्स्यतीति योज्यं तथा लेपभाजश्चतुर्थाद्याः पित्राद्याः पिंडभागि

लेपसम्बन्धिनश्चान्ये पितामहप्रपितामहात् प्रभृत्यस्मात्त्रयस्तेषां यजमानश्च सप्तमः ४ इत्येष मु
निभिः प्रोक्तः सम्बन्धः साप्तपौरुषः यजमानात्प्रभृत्यूर्ध्वमन्ये लेपभुजास्तथा ५ ततोन्ये पूर्वजाः स्व
र्गे ये चान्ये नरकौकसः ये च तिर्यक्त्वमापन्ना ये च भूतादिसंस्थिताः ६ तान्सर्वान्यजमानो वै श्राद्धं कुर्व
न्यथाविधिः समाप्याययते वत्स येन येन शृणुष्व तत् ७ अन्नप्रकिरणं यत्तु मनुष्यैः क्रियते भुवि तेन
तृप्तिमुपायान्ति ये पिशाचत्वमागताः ८ यदम्बु स्नानवस्त्रोत्थं भूमौ पतति पुत्रक तेन ये तरुतां प्राप्ता
स्तेषां तृप्तिः प्रजायते ९ यास्तु गात्राम्बुकणिकाः पतन्ति धरणीतले ताभिराप्यायनं तेषां ये देवत्वं कु

नः पिंडदः सप्तमस्तेषां सापिंड्यं साप्तपौरुषमिति ४ सप्तभिः पुरुषैर्निर्वृत्तः साप्तपौरुषः सम्बन्धः तानेव गणयति यजमानादिति यजमानः प्रथ
मः पित्रादयस्त्रयः अन्ये लेपभुजाः पितामहादयस्त्रयश्चतुर्थाः ५ यजमानस्यैवमोचकत्वं दर्शयति ततोन्ये इति तत्स्तेभ्यः वृद्धोपेव्याति रिक्ताः पू
र्वजाः पुण्यापुण्यादिवशात्स्वर्गनरकादौ स्थिताः तान्सर्वान्येन येन द्रव्येण सम्यक्कृतश्राद्धपर्यन्तं आप्याययेत् तर्पयति तच्छृणुष्वेति द्वयोरन्वयः
नरकौकसो नरकवासिनः तिर्यक्त्वं पशुत्वं भूतादीनां योनिषु संस्थिताः ६ ७ प्रकिरणं प्रक्षेपः ८ स्नानवस्त्रस्य पीडनोत्थं तरुतां वृक्षत्वं ९ कणिका

१२९

उच्छिष्टेषु अन्तिमेषु ११ अदंताः अजातदंताः पावंतो ये अदग्धा वा बाला ये भूमौ जले वा निमाः यतः क्रियायाम् श्राद्धादिविषयोग्याः तत्र हेतुर्यतो असंस्कृता अ
शकरणादिसंस्कारहीना विपन्ना मृताः ते अन्नविकिरसम्मार्जनजलं चाश्नंतीति तथा १२ भुक्त्वा आचमतां आचमनं कुर्वतां ब्राह्मणानां यत्पादाद्
हिरन्नविकिरसहितं जलं यच्च अंघ्र्योः शोधने जलं भुवि पतितं तेन चूडादिसंस्कृता उपनयनादिहीनाश्चान्ये तृप्तिं प्रयान्ति १३ तेषां श्राद्धभोजिनां ब्राह्म

उच्छिष्टेष्वथ पिंडेषु यच्चान्नं पतितं भुवि तेन वाप्यायनं तेषां ये तिर्यक्त्वं कुले गताः ११ ये चादंताः कुले बा
लाः क्रियायोग्या असंस्कृताः विपन्नास्ते न विकिरसम्मार्जनजलाशिनः १२ भुक्त्वा चाचमतां यच्च
जलं यच्चांघ्रिशोधने ब्राह्मणानां तथैवान्ये तेन तृप्तिं प्रयान्ति वै एवं यो यजमानस्य यश्च तेषां द्विजन्म
नाम् कश्चिज्जलान्नविक्षेपः शुचिरुच्छिष्ट एव वा १४ तेनान्ये तत्कुले तत्र तत्तद्योन्यन्तरं गताः प्रयान्त्या
प्यायनं वत्स सम्यक्छ्राद्धक्रियावतां १५ अन्यायोपार्जितैरर्थैर्यच्छ्राद्धं क्रियते नरैः तृप्यन्ते तेन चंडा
लपुक्कसाद्यासु योनिषु १६ एवमाप्यायनं वत्स बहूनामेव बांधवे श्राद्धं कुर्वद्भिरन्नाम्बुविंदुक्षेपेण जा
यते १७ तस्माच्छ्राद्धं नरो भक्त्या शाकैरपि यथाविधि कुर्वीत कुर्वतः श्राद्धं कुले कश्चिन्न सीदति १८ तस्य
कालानहं वक्ष्ये नित्यनैमित्तिकात्मकान् विधिना येन च नरैः क्रियते तन्निबोध मे १९ श्राद्धं कार्यममावस्या

णानां विक्षेपः विकिरः १४ १५ अन्यायोपार्जितैरधर्मोपात्तैरर्थैर्धनैः चाण्डालाद्यासु योनिषु जाताः १६ अन्नविक्षेपेण अम्बुविंदुविक्षेपेण च १७ न
सीदति न नश्यति १८ कालान्नित्यनैमित्तिकान् पूर्वोपदिष्टान् १९ उडुपस्ताराणां पतिश्चंद्रस्तस्य क्षये अष्टकासु षट्सु तदुक्तं तिथिद्वयं पौषकृष्णे
अष्टमी नवमी तथा माघे च फाल्गुने कृष्णे अष्टकान्वष्टके क्रमात् अष्टम्यामष्टकाश्राद्धं नवम्यामन्वष्टकं पौषे माघे फाल्गुने षट् श्राद्धानि कीर्ति

मासि मासि उडुपतेः क्षये तथाष्टकास्वथ वत्स
मिच्छाकालं निबोध मे २०

तानि वै इति इच्छायाः खेच्छायाः कालस्तं निबोध २०

विशिष्टस्य श्रेष्ठस्य पंक्तिपावनादेर्ब्राह्मणस्य प्राप्तौ सूर्येन्दुग्रहणे सूर्योपरागे चन्द्रोपरागे च अयने उदग्दक्षिणागतिदिनद्वये विषुवे दिनरात्रिसाम्यरूपे
दिनद्वितये रवेः संक्रान्तौ राशेराश्यंतरे तरणदिने द्वादशविधे व्यतीपाते श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तके यद्यपातविहारेण व्यतीपातः स उच्य-
ते द्विपच्छाये गजच्छायायां यदाहुः पितृदेवत्येऽहं सर्वे मघाकरे स्थितः तिथिर्वैश्रवणी या च गजच्छायेति सा स्मृतेति २१ श्राद्धार्हस्य श्राद्धे योग्यस्य
तिलमधुफलादेर्द्रव्यस्य संप्राप्तौ जन्मर्क्षे जन्मनक्षत्रे ग्रहपीडासु च २२ पूर्वोद्दिष्टं विशिष्टं ब्राह्मणं दर्शयति विशिष्ट इत्यादिना श्रोत्रियो ब्राह्मणः
योगी ज्ञानकर्मोभयवान् ज्येष्ठं नाम साम गायतीति तथा नाचिकेताग्निर्नाम कठशाखायां प्रसिद्धं नचिकेतसः प्रसन्नीभूतयमवरदानेन तवै
वनाम्ना भविताऽयमग्निरिति तेन त्रिर्नाचिकेताग्निविधमग्निं संसेव्य त्रिर्नाचिकेतसंज्ञं नामवेदभागमधीते यः स उच्यते एवं त्रिमधुर्नामवेदभाग

विशिष्टब्राह्मणप्राप्तौ सूर्येन्दुग्रहणे तथा । विषुवद्विषसंक्रान्तौ व्यतीपाते द्विपच्छाये ॥ २१ ॥ श्राद्धार्हद्रव्यसं-
प्राप्तौ तथा दुःस्वप्नदर्शने । जन्मर्क्षे ग्रहपीडासु श्राद्धं कुर्वीत चेच्छया ॥ २२ ॥ विशिष्टः श्रोत्रियो योगी वेदवि-
ज्ज्येष्ठसामगः । त्रिनाचिकेतस्त्रिमधुस्त्रिसुपर्णः षडङ्गवित् ॥ २३ ॥ दौहित्रश्च ऋत्विग्जामाता स्वस्रीयः श्वशुर-
स्तथा । पंचाग्निकर्मनिष्ठश्च तपोनिष्ठश्च मातुलः ॥ २४ ॥ मातापितृपरश्चैव शिष्यसम्बन्धिबान्धवाः । एते हि
ज्ञानतमाः श्राद्धे समस्ताः केतनक्षमाः ॥ २५ ॥ अवकीर्णी तथा रोगी न्यूनाङ्गोऽधिकः पौनर्भवस्तथा का-

न्वयोऽधीते सः त्रिसुपर्णाख्यं व्रतं कृत्वा यस्तदाख्यमेव वेदभागमधीते यः स त्रिसुपर्णः शिक्षाकल्पो व्याकरणं निरुक्तं ज्योतिषं छन्द इति वेदस्यांगानि
वेत्तीति षडंगवित् २३ दौहित्रः नप्ता ऋत्विक् तद्याजकः जामाता दुहितुः पतिः स्वसुर्भगिन्या अपत्यं स्वस्रीयो भागिनेयः श्वशुरो भार्यायाः पिता
द्यौः पर्जन्यो योषित्कर्मा अग्निरावसथ्योऽग्निरिति पंचाग्नीनां कर्मसु निष्ठस्तत्परस्तया अनुष्ठानकृत् मातुलो मातुर्भ्राता २४ मातापितरौ परौ सर्वेभ्यो
ऽत्युत्कृष्टौ यस्य सः मातापितृसेवातत्पर इत्यर्थः द्विजस्य सम्बन्धी विवाहादिना सम्बन्धवान् बान्धवः स्वगोत्रः केतने निमन्त्रणे क्षमा योग्याः २५
अवर्ज्यानाह अवकीर्णी नष्टव्रतः रोगी दीर्घरोगवान् अंगैर्न्यूनो विकलः अंगहीन इत्यर्थः अंगैरधिको वा अधिकांगः पुनर्भ्वा अपत्यं पौनर्भवः
द्विरूढायाः पुत्रः कारुः शिल्पी भर्तरि सति जारजः कुण्डः भर्तर्यसति जारजो गोलः २६

127

मित्रध्रुक् मित्रद्रोही कुनखी स्वभावात्कुत्सितनखः क्लीवः षण्ढः श्यावदंतः निराकृतिः स्वाध्यायत्यागी तेन प्रत्यायितेन अभिशस्तः दत्तशापः पापं
तैरेताते न अभिशस्तः इत्थंकृतः स्तेनो वा चौरः पिशुनः सूचकः सोमविक्रयी दीक्षमध्यादिविक्रयकृत् २७ कन्यां विवाहहीनां बाला तस्या दूषयि
ता दूषकः तत्वकृत् वैद्यः चिकित्सकः गुरोः पित्रोश्च त्यक्तकस्त्यागी भृतकानां कर्मकराणामध्यापकः अपुत्रः संतानहीनः पतितो ज्येष्ठायाः
प्रेशल्याः पतिः २८ वेदमुज्झति त्यजति वेदोज्झः अग्निसंत्यागी अग्न्युद्वासकृत् वृषलागणिकायाः पतिश्च दूषितः पतितः विकर्मस्थो वि

मित्रध्रुक्कुनखी क्लीवः श्यावदंतो निराकृतिः अभिशस्तस्तथा स्तेनः पिशुनः सोमविक्रयी २७ कन्या
दूषयिता वैद्यो गुरुपित्रोस्त्यागोज्झकः भृतकाध्यापकोऽपुत्रः परिवेत्ता पतिस्तथा २८ वेदोज्झो थाग्निसं
त्यागी वृषलीपतिदूषितः तथान्ये च विकर्मस्था वर्ज्याः पित्र्येषु वै द्विजाः २९ निमंत्रयेत पूर्वेद्युः पूर्वा
कान्द्विजसत्तमान् दैवे नियोगे पित्र्ये च तांस्तथैवोपकल्पयेत् ३० तैश्च संयमिभिर्भाव्यं यश्च श्राद्धं
करिष्यति श्राद्धं दत्वा च भुक्त्वा च मैथुनं योऽनुगच्छति पितरस्तस्य तं मासं तस्मिन् रेतसि शेरते ३१
गत्वा च योषितं श्राद्धे यो भुंक्ते यश्च गच्छति रेतोमूत्रकृताहारास्तं मासं पितरस्तयोः ३२ तस्मात्
प्रथमं कार्यं प्राज्ञेनोपनिमंत्रणम् अप्राप्तौ तद्दिने वापि वर्ज्या योषित्संगिनः ३३

रुद्धकर्मस्थः पित्र्येषु श्राद्धेषु २९ अथ ब्राह्मणानां निमंत्रणे नियममाह निमंत्रयेतेति पूर्वेद्युः श्राद्धदिनात्पूर्वस्मिन्दिने दैवे देवानां सम्ब
न्धिनि नियोगे कर्मणि पित्र्ये श्राद्धे तान् द्विजान् तथैव उनरूपकल्पयेत् नियमं ग्राहयेत् ३० तैः ब्राह्मणैः संयमिभिर्जितेंद्रियैः भवितव्यं श्रा
द्धदाता तेन च जितेंद्रियेण भाव्यं भवितव्यमिति पूर्वेद्युर्निमंत्रणाभिप्रायः श्राद्धं भुक्त्वा च मैथुनं स्त्रीसंगे रेतसि शुक्रे शेरते लीना भवंति
३१ योऽभुंक्ते दिवा रंभोजयति य आधानं गच्छति ३२ प्रथमं पूर्वेद्युः कार्यं कर्तव्यं यद्यपि ब्राह्मणा निमंत्रणार्थं पूर्वेद्युरप्राप्तास्तदा तद्दि

ने श्राद्धदिने योषित्संगिनो वर्ज्या इति सर्वथा स्त्रीसंगस्याजपत्वेन प्रतिसमा
हितः ३३

यतीन्संन्यासिनः यतमानसो निरुद्धचित्तः ३४ श्राद्धोपयोगिनो विशिष्टान्सत्क्रियावतो ब्राह्मणान्प्रदर्श्येदानीं तदुपयोग्यं कालविशेषं प्रदर्श
यति यथैवेति असितः कृष्णः पक्षो यथा प्रियः तत्र तेषां सोमकलाभिः पेयमानाभिराप्यायितत्वात् तथा तेषां पितॄणां दिनस्य पंचदशभाग
कल्पनया नवमं मुहूर्तात्पूर्वाह्णः तस्मात्पूर्वाह्णात् तथा व्यासः मुहूर्तत्रितयं प्रातस्तावानेव च संगवः मध्याह्नस्त्रिमुहूर्तः स्यादपराह्ण
स्ततादृशः सायाह्नस्त्रिमुहूर्तोऽथ सर्वधर्मबहिष्कृत इति अपराह्णः द्विधा विभक्तस्याह्नो द्वितीयो भागोऽपराह्ण इति कुतपकालस्यांगत्वे
बोद्धव्यं सप्तमान्मुहूर्तादूर्ध्वो नवमादपि यः पूर्वो मुहूर्तस्तन्मध्यस्थः कुतपस्तस्मिञ्छ्राद्धं विधातव्यमिति केचित् यदुक्तं सप्तमात्परतो यस्तु
नवमात्पूर्वतः स्थितः उभयोरपि मध्यस्थः कुतपः सोऽभिधीयत इति अन्ये तु कुतपसंज्ञकाष्टममुहूर्तोत्तरं रौहिणाख्यं कालं श्राद्धांगत्वे
न दर्शयंति तदुक्तं मत्स्यपुराणे ऊर्ध्वं मुहूर्तात्कुतपाद्यन्मुहूर्तचतुष्टयं मुहूर्तपंचकं वापि स्वधाभवनमिष्यते इति नवत्रयोदशमुहू

भिक्षार्थमागतान्वापि काले संयमिनो यतीन् भोजयेत्प्रणिपाताद्यैः प्रसाद्य यतमानसः ३४ यथै
व शुक्लपक्षाद्वै पितॄणामसितः प्रियः तथापराह्णः पूर्वाह्णात्पितॄणामतिरिच्यते ३५

र्तस्य सायाह्नात् पातित्वेनांगत्वविधिरुपपन्न इति वाच्यं तस्यैव श्लोके वापीति विकल्पेनान्यथाव्यवस्थादर्शनमभिप्रायः तथा चोक्तम्
विधिज्ञः श्रद्धयोपेतः सम्यक्पात्रनियोजकः रात्रेः श्राद्धं कुर्वाणः श्रेयः प्राप्नोत्यनुत्तममिति सायाह्नस्त्रिमुहूर्तोऽथ सर्वधर्मबहिष्कृत इत्यत्र ति
थेर्यो रात्रिमतिपततीति अत्रापराह्णकालस्य द्विधा विभक्तस्याह्नो द्वितीयभागात्मकस्यांगत्वं पर्यवस्यति तथा च श्रुतिः आदित्यो वै सर्वे ऋतवः
स यदोदेत्यथ वसंतो यदा संगवोऽथ ग्रीष्मो यदा मध्यंदिनोऽथ वर्षा यदापराह्णोऽथ शरद्यदास्तमेत्यथ हेमंत इत्यादिका वर्षाशरदोराप्याय
ननिमित्तकयोः सोमोऽप्यपायिनो पितॄणां तस्मिन्हेतुत्वमपराह्णस्यैव दर्शयतीति स्मृत्यंतरे चापराह्णस्यैवांगत्वमाह पूर्वाह्णो वै देवा
नां मध्यंदिनो मनुष्याणामपराह्णः पितॄणामित्यादि अत्र मानवी स्मृतिरपि यथा चैवापरः पक्षः पूर्वपक्षाद्विशिष्यते तथा श्राद्धस्य पू
र्वाह्णादपराह्णो विशिष्यत इति अतिरिच्यते अधिको भवति ३५

अभ्युपेतास्नातान् आचांतान्कृताचमनान् उपवेशयेत् संवेशयेत् ३८ एकैकंदैवेएकंपित्र्येचैकं ३७ वैश्वदेविकंवैश्वदेवादागतंकर्मतन्मा
तामहानांतत्संपित्वन्मात्वकार्यं चेत्यत्रोक्तं तयोः पितृर्मातामहस्यचश्राद्धविधिभेदमित्रमिच्छंति ३८ प्राङ्मुखोन्पूर्वाभिमुखो ३ उद
ङ्मुखोन्तरा भिमुखोन् ३९ विष्टरार्थंआसनार्थं कुशान्दर्भान् प्रश्नसंप्रश्न ४० देवानां विश्वेदेवानांमंत्रेनोमंत्रेण विश्वेदेवासआगतश्रृण

संप्रश्नस्वागतेनैतामभ्युपेतान्गृहे द्विजान् पवित्रपाणिराचांतानासनेषूपवेशयेत् ३८ पितॄणाम
युजः कामंयुग्मान्दैवे द्विजोत्तमान् एकैकंवापितॄणांचदेवानांचस्वशक्तितः ३७ तथामातामहानां
चतत्संवावैश्वदेविकं श्राद्धकयोस्तथाचान्येकेचिदिच्छंतिमानवाः ३८ प्राङ्मुखान्दैवसंकल्पास्मिआद्ध
यांउदङ्मुखान् तथैवमातामहानांविधिकल्कोमनीषिभिः ३९ विष्टरार्थंकुशान्दत्वाश्रम्पचार्च्यादिना
बुधः पवित्रकादिदैवतातेभ्योऽनुज्ञामवाप्यच ४० कुर्यादावाहनंप्रोक्तोदेवानांमंत्रतोद्विजः यवाम्भोभि
स्तथाचार्घ्यंदत्वावैश्वदेविकं ४१ गन्धमाल्याम्बुधूपंचदत्वासम्यक्सदीपकं अपसव्यंपितॄणांचस
र्वमेवोपकल्पयेत् ४२ दर्भांश्चद्विगुणान्दत्वातेभ्योऽनुज्ञामवाप्यच मंत्रपूर्वंपितॄणांचकुर्यादावाह
नंबुधः ४३ अपसव्यंतथाचार्घ्यंयवार्थंचतथातिलाः निष्पादयेन्महाभागपितॄणांप्रीणनेरतः ४४
अग्नौकार्यमनुज्ञातःकुरुष्वेतिततोद्विजैः जुहुयाद्व्यंजनक्षारवर्जमन्नंयथाविधि ४५

तामहमंहवंशदंबर्हिर्निषीदतेति ४१ उपकल्पयेत्सम्पादयेत् ४२ उशंतस्त्वाहवामहेउशंतःसमिधीमहि उशन्नुशतआवहपितॄन्ह
विषेअत्तवे आयांतनःपितरोमनोजवसःपितरःश्रुन्यथम् आमेयांतपितरोभागधेयंविराजाहृतःसलिलात्समुद्रादितिमंत्रेणपितॄणा

[illegible] ४४

[illegible]

मा पु टी
१२९
129

हवने मंत्रविनयमाह अग्नयेस्मादिना अग्नये कव्यवाहनाय स्वधा नमः स्वाहेति मंत्रोबोध्यः प्रवशुभरुद्र ४८ भाजनेषु भोजनपात्रेषु भाजनानामा
लम्बनं हस्तेन स्पर्शः ४७ यथासुखं सुखमनतिक्रम्य भोः हे ब्राह्मणाः जुषध्वं भक्षयध्वमिति वाच्यमनिष्ठुरमपरुषं तच्चित्ता भोजने दत्तचित्ताः मौनि

अग्नये कव्यवाहाय स्वाहेति प्रथमाहुतिः सोमाय वै पितृमते स्वाहेत्यन्या तथा भवेत् यमाय प्रेतप
तये स्वाहेति तृतीयाहुतिः ४६ हुतावशिष्टं दद्याच्च भाजनेषु द्विजन्मनां भाजनालम्भनं कृत्वा दद्या
च्चान्नं यथाविधि ४७ यथासुखं जुषध्वं भो इति वाच्यमनिष्ठुरं भुञ्जीरंस्ते ततस्तेपि तच्चित्ता मौनिनः
सुखम् ४८ यद्यदिष्टतमं तेषां तत्तदन्नमसत्वरं अक्रुध्यन्नरो दद्यात्सान्त्वेन प्रलोभयन् ४९
रक्षोघ्नांश्च जपेन्मन्त्रांस्तिलैश्च विकिरेन्महीम् सिद्धार्थकैश्च रक्षार्थं प्रायः हि प्रचुरच्छलं ५० पृष्टे
स्तैश्च तृप्ताः स्थ तृप्ताः स्म इति वादिभिः अनुज्ञातो नरस्त्वन्नं प्रकिरेद्भुवि सर्वतः ५१ तद्वदाचमना
र्थाय दद्यादापः सकृत्सकृत् अनुज्ञातश्च ततः प्रोऽयत वाक्कायमानसः ५२ सतिलेन ततोन्नेन
पिण्डान्सव्येन पूर्वक पितॄनुद्दिश्य दर्भेषु दद्यादुच्छिष्टसन्निधौ ५३ पितृतीर्थेन तोयं च दद्यात्तेभ्यः
समाहितः पितॄनुद्दिश्य तद्भक्त्या जपमानोन्यपालज ५४ तद्वन्मातामहानां च दद्यात्पिण्डान्यथावि
धि गन्धमाल्यादिसंयुक्तं दद्यादाचमनं ततः ५५

संयतवाचः ४८ अतिप्रियमिष्टतमं असत्वरं शनैः सान्त्वेन स्वन्नाम प्रलोभयन् ४९ सिद्धार्थाः सर्षपाः प्रचुरच्छलं प्रभूतच्छिद्रं हि यस्मात् ५०-५१ स
कृत्सकृत् एकवारं वीप्सावशाद्ब्राह्मणानां सर्वेषां ततस्तेभ्यो विप्रेभ्यः यतो निरुद्धवाक्कायश्च मानसं च येन ५२ उद्दिश्य प्रसिद्धनाम्नोच्चार्य ५३ पितृ

[illegible] ५८ ५५

१२९

५६ ५७ ५८ ५९ ६० ६१ दौहित्रो दुहितापत्यं तेन सा कुकुत्सितं पापं तत्तापयति नाशयतीति कुतपः स चाष्टधा तदुक्तं मत्स्यपुराणे मध्याह्नः खड्गपा
त्रं च तथा नेपालकम्बलः रूप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृत इति तथा पापं कुत्सितमित्याहुस्तस्य संतापकारिणः अष्टावेते यत

दद्याच्च दक्षिणां शक्त्या स्वस्त्यस्त्विति तान्वदेत् तैश्च तुष्टैस्तथैवोक्तो वाचयेद्वैश्वदेविकान् ५६
प्रीयन्तामिति भद्रं वो विश्वेदेवा इतीरयेत् तथेति चोक्ते तैर्विप्रैः प्रार्थनीयास्तदाशिषः ५७ विसर्जये
त्प्रियाण्युक्त्वा प्रणिपत्य च भक्तितः आद्वारमनुगच्छेच्च आगच्छेदनुमोदितः ५८ ततो नित्यक्रियां
कुर्याद्भोजयेच्च तथातिथीन् नित्यक्रियां पितॄणां च केचिदिच्छन्ति सत्तमाः ५९ न पितॄणां तथैवान्ये शे
षं सर्वं तदाचरेत् पृथक्पाकेन नेत्यन्ये केचित्पूर्वं च पूर्ववत् ६० ततस्तदन्नं भुञ्जीत सह भृत्यादिभिर्न
रः एवं कुर्वीत धर्मज्ञः श्राद्धं पित्र्यं समाहितः ६१ यथा वा द्विजमुख्यानां परितोषोभिजायते त्रीणि श्रा
द्धे पवित्राणि दौहित्रः कुतपस्तिलाः ६२ वर्ज्यानि चाहुर्विप्राग्र्य कोपोध्वगमनं त्वरा राजतं च तथा पा
त्रं शस्तं श्राद्धेषु पुत्रक ६३ राजतस्य कथा कार्या दर्शनं दानमेव वा राजते हि स्वधा दुग्धा पितृभिः श्रू
यते मही तस्मात्पितॄणां रजतमभीष्टं प्रीतिवर्धनं ६४ इति मार्कण्डेयपुराणे मदालसोपदेशे पार्वणश्रा
द्धकल्पो नाम पंचविंशतितमोऽध्यायः २५

तस्मात्कुतप इति विश्रुत इति ६२ अत्र वर्ज्यमाह वर्ज्यानीति शस्तं प्रशस्तं ६३ राजतस्य श्रेष्ठत्वे निमित्तमाह राजते हीति स्वधा यस्मात्पितृभिः
राजतपात्रे श्रूयते नियोगेन मही स्वधां दुग्धा इति द्विकर्मकः इति श्रूयते इति वाक्यस्य कर्मत्वं बोध्यम् ६४ षड्विंशतमोध्यायः ॥

मा पु
टी
१३०

इदानीं श्राद्धे प्रीतिकारकाणि विहितानि द्रव्याण्यविहितानि च दर्शयितुमाह अतः परमित्यादिना श्राद्धेनमानीतं १ तत्र प्रीतिकारकाणि भक्ष्याण्याह मासमित्यादिना दधितिलव्रीहिघृतशर्करान्वितं हविष्यान्नं २ हरिणस्य मृगविशेषस्येदं मांसं हारिणं शशो मृगः तस्य पिशितं मांसं ३ शकुनस्य पक्षिण इदं शाकुनं सूकरो वराहः तस्यामिषं मांसं छगलोजस्तस्य मांसं छागलं एतस्य मृगस्येदं ऐणेयं ४ रुरुर्नाम मृगः गवयो गोसदृशो मृगः ५ अश्रो मेषस्तस्येदमौरभ्रं गव्यं पयः गोदुग्धं तत्र पाकविकारः पायसं ६ त्रिपिबं त्रिभिः पिबतीति इन्द्रियक्षीणं वृद्धं श्वेतमजापतिं वाध्रीणसं जानते शा

130

मदालसोवाच अतः परं शृणुष्वेदं पुत्र भक्त्या यदाहृतम् पितॄणां प्रीतये यद्वा वर्ज्यं वा प्रीतिकारके १ मासं तृप्तिः पितॄणां तु हविष्यान्नेन जायते मासद्वयं मत्स्यमांसैस्तृप्तिं यान्ति पितामहाः २ त्रीन्मासान्हारिणं मांसं विज्ञेयं पितृतृप्तये चतुर्मासांस्तु पुष्णाति शशस्य पिशितं पितॄन् ३ शाकुनं पंच वै मासान्षण्मासान्सूकरामिषं छागलं सप्त वै मासानैणं चाष्टमासिकीं ४ करोति तृप्तिं नव वै रुरोर्मांसं न संशयः गवयस्यामिषं तृप्तिं करोति दशमासिकीं ५ तथैकादशमासांस्तु औरभ्रं पितृतृप्तिदं संवत्सरं तथा गव्यं पयः पायसमेव वा ६ वाध्रीणसामिषं लोहं कालशाकं तथा मधु रौहिणामिषम मत्स्यमांसं सत्कुलोद्भवैः ७ अनन्तां वै प्रयच्छन्ति तृप्तिं गौरीसुतस्तथा पितॄणां नाय सन्देहो गयापिण्ड
देव पुत्रक ८

१
मार्कण्डेय

द्यर्थोतिकाः श्राद्धकर्मणि यस्य जलं पिबतः कर्णौ जलं स्पृशतः स त्रिपिबः त्रिभिर्मुखेन कर्णाभ्यां च पिबतीति त्रुमस्मात्क्षीणेन्द्रियं संभोगात् ममजापतिमजमित्यर्थः श्वेतनाद्ः कृष्णग्रीवो रक्तशिराः श्वेतपक्षो विहंगमः स वै वाध्रीणसः प्रोक्तः इत्येषा नैगमी श्रुतिरिति लोहो लोहितच्छागस्तस्येदं लोहं कालशाकं उत्पलशाकं मधुमादिकं यच्चास्य स्वकुलोद्भवैः पुत्रादिभिर्वान्यैर्वा दत्तं तच्चामन्तां तत्र सिंप्रयच्छति दत्तइत्य

१३०

वन्यानांवनोद्भवानांमध्येएतेराजश्यामाकादयः पितृतृप्तयेस्युः ९ यवादयोग्रामोद्भवानांमध्येअतिशोभनाः प्रशस्ताः १० वर्ज्यानाह
वर्ज्याइतिगर्हितानिन्दिताः ११ रसैर्वर्णैश्चहीनारहिताः १२ निर्यासाःद्रुमरसाः १३ शस्यतेलोकप्रसिद्धावाचानस्तूयते १४
श्राद्धेवर्ज्यंधनमाह यच्चापीति उत्कोचतःउत्कोचात् पतितात्भ्रष्टात् अन्यायेनयः कन्याशुल्कः विक्रयद्रव्यः १५ एवंवर्ज्यंजल

राजश्यामाकश्यामाकौतद्वच्चैवप्रशातिका नीवाराःपौष्कलाश्चैववन्यानांपितृतृप्तये
यवव्रीहीसगोधूमौतिलामुद्गाःससर्षपाः प्रियंगवःकोविदारानिष्पावाश्चातिशोभनाः १० वर्ज्या
मर्कटकाःश्राद्धेराजमाषास्तथाणवः विप्रुषिकामसूराश्चश्राद्धकर्मणिगर्हिताः ११ लशुनंगृ
ञ्जनंचैवपलाण्डुपिण्डमूलकं करंभेद्यानिचान्यानिहीनानिरसवर्णतः १२ गांधारिकामलाबू
निलवणान्यूषराणिच आरक्ताश्चैवनिर्यासाःप्रत्यक्षलवणानिच वर्ज्यान्येतानिवैश्राद्धेयच्चवाचा
नशस्यते १४ यच्चाप्युत्कोचतःप्राप्तंपतिताद्यदुपार्जितं अन्यायकन्याशुल्कोत्थंद्रव्यंचात्रविगर्हि
तं १५ दुर्गंधिफेनिलंचाम्बुतथैवाल्पतरोदकं नलभेद्यत्रगौस्तृप्तिंनक्तंयच्चाप्युपाहृतम् १६ यन्नसर्वा
पसृष्टंयच्चाभोज्यनिपानजं तद्वर्ज्यंसलिलंतातसदैवपितृकर्मणि १७ मार्गमाविकमौष्ट्रंच
सर्वमैकशफंचयत् माहिषंचामरंचैवधेन्वागोश्चाप्यनिर्दशं १८ पित्रर्थंमेप्रयच्छस्वेत्युक्त्वायच्चा
दाहृतं वर्जनीयंसदासद्भिस्तत्पयःश्राद्धकर्मणि १९ वर्ज्याजन्तुमतीरूक्षाक्षितिःप्लुष्टातथाग्नि
ना अनिष्टदुष्टशब्दोग्रदुर्गन्धाचात्रकर्म

लमप्याह दुर्गन्धीति १६ सर्वतश्चापसृष्टेनअवाहिणानोत्सृष्टंननिर्गतं अभो
ज्यान्निपानाज्जलाज्जातं १७ मृगाणांपानार्थंकृतेनिपातेमार्गं एवमुक्तत्वचनदर्शदिभ्योनिष्क्रान्तमनिर्दशंगोनिपानस्यदशाहा
द्व्यदिविलर्थः १८ १९ एवंवर्ज्यांभुवमप्याह वर्ज्येति जन्तुमतीकृमिवती प्लुष्टादग्धाअप्रतिष्ठानांकिल्पादीनांदुष्टःशब्दोयस्यां अत्रश्राद्धे २० ॥

कृतापमानकाः कुलकलंकाः वायुव्यविविधकुलहिंसकाः कुलघातकाः नग्नादिगम्बराः पातकिनः पापिनः पाठांतरे उन्मत्तानि
कान्यापृथग्जीविन २१ अपुमान्नपुंसकः अपविद्धः सर्वैर्वमतः यातुधानाराक्षसाः २२ स्पृष्ट संहृतेत्याहतेदेशोराक्षसादिनाशायति
लैनमहीमवकिरेत् द्वेतानवत्स उभयोर्यजमानपित्रोः २३ पश्वावोम्लकाशौचं सूतकाशौचेन संस्पृष्टं नपश्यतिसवर्धयति
उदक्या रजस्वलास्वरोगः शोङ्केश्च सद्दस्माभाषासंभाषा २५ केशादिभिरवपन्नमपुष्टं स्मृतिर्दुर्गन्धि पर्युषितंकालांतरेपक्कंवार्ता

कृतापमानकाद्ध्नायाव्यापृज्यकुलहिंसकाः नग्नाः पातकिनश्चैव हन्युर्दृष्ट्यापितृक्रियां २१ अपुमा
नपविद्धश्चकुष्ठीयामस्तुकरः पापेवदंतिपश्चाद्धानियातुधानाश्चदर्शनात् २२ तस्मात्तुसंवृ
तेदद्यात्तिलैश्चावकिरेन्महीं एवं रक्षाभवेच्छ्राद्धेकृतातातोभयोरपि २३ शावसूतकसंस्पृष्टं दी
र्घरोग्, सुरोगः शोकैः समाभाषायजमानेनचादरात् २४ केशकीटावपन्नंचतथाश्वभिरवेक्षितं
पूतिपर्युषितंचैववार्ताकाभिषवास्तथा वर्जनीयानिवैश्राद्धेतथावस्त्रानिलाहृतम् २६ श्रद्धया
परयादत्तंपितृणांनामगोत्रतः यदाहारास्तुतेजातास्तदाहारत्वमेतितत् २७ तस्माच्छ्रद्धावता %

%गिभिरवेक्षितं पतितैर्मलिनैश्चैवनपुष्माणि॥ पुत्रयस्त्तंपितृकर्मणि यथावच्चैवदातव्यं पितॄणां तत्रिमिच्छता
पितामहान् २५ वर्जनीयं सदाश्राद्धे तथोदक्यादिदर्शनं॥

काश्चाभिषवश्चसुराः व्यजनवद्धस्त्रानिलेनाहृतंवीजितं २८ ननुस्वकर्मणादेवतिर्यगादियोनिर्गतान्पितृन्कथंदत्तंप्राह्नं तर्पयतीत्याशंक्या
ह श्रद्धयेति नामगोत्राभ्यांलोकप्रसिद्धाभ्यां प्रापकाभ्यां परयाश्रद्धयाचप्रापिकयायद्दत्तंकव्यंपितृणांतत्क यंतेपितरोयदाहारा
यदाहारोदेवतिर्यगादियोनिषुतेपितरोजातास्तदाहारत्वमेतीत्य तथाचमत्स्यपुराणेश्राद्धकाण्डेएकोनविंशोध्यायेमनोःप्रश्नप्र
वेकंमत्स्यउवाच देवोयदिपिताजातः शुभकर्मानुयोगतः तस्यान्नममृतंभूत्वादिव्यत्वेप्यनुगच्छति दिव्यत्वेभोगरूपेण पशुत्वेचतृ

प्रवश्यभोजनीयपंक्तिपावनादिब्राह्मणेभ्योतिविशिष्टं योगिनमाह योगिनो योगयुक्ता युक्तात्मानः सर्वेषां साक्षात्कारिणस्ते विपश्चिता वि
दुषा यजमानेन श्राद्धे भोजनीयाः तत्र हेतुमाह योगाधारा इति योगो ज्ञानं कर्म वा तदाधारा येषां ते हि विषयोपहारहारा पात्रपितृन्‌गिरा
नकर्मेन्द्रियाणीन्द्रियाणि पवयितस्तदुक्तं तत्र वते योगिनो निश्चयात्मानस्तस्मात्तान्योगिनः सदा पूजयेद्भुञ्जीतेत्यर्थः १९ योगिनं स्तौति ब्राह्म
णानामिति अग्राशनोऽग्रभोजी अग्राशनो वा सर्वेषां ब्राह्मणानां मध्ये उत्कृष्टस्थाने ग्रासनं यस्य स तथा दशगोप्रदिष्टात् अस्य सर्वमोचक
त्वं स्तुत्याह यजमानानिति बहुवचनं यजमानस्य परिवारादिसाहित्यं द्योतयति भोक्तॄन्ब्राह्मणान्प्रमात्वा श्राद्धेनाप्यायनीपान्सवा
ञ्जेतृन्‌ तारयेत्संसारसमुद्रभ्रमणान्मोचयेदित्यर्थः तत्र तारणमाचेष्टान्तः नौरिवाम्भसीति २० अत्र श्राद्धादौ या पितृगाथा वर्ण्य

योगिनश्च सदा श्राद्धे भोजनीया विपश्चिता योगाधारा हि पितरस्तस्मात्तान्पूजयेत्सदा १९ ब्राह्म
णानां सहस्रेभ्यो योगी चाग्राशनो यदि यजमानांश्च भोक्तॄंश्च नौरिवाम्भसि तारयेत् २० पितृगाथाः
स्तथैवात्र गीयन्ते ब्रह्मवादिभिः या गीताः पितृभिः पूर्वमैलस्यासीन्महीपतेः २१ कदा नः सन्ततावग्र्य
ः कस्यचिद्भविता सुतः यो योगिभुक्तशेषान्नो भुवि पिण्डान्प्रदास्यति २२ गयायामथवा पिण्डं
खड्गमांसं महाहविः विषाणवर्ज्यखड्गस्य आसूर्यं चाश्नुवामहे २३ तथा श्राद्धे प्रपादेषु मघासु
च यथाविधिः मधुसर्पिःसमायु- ऽं पायसं दत्तिरणायते २४

यति पितृगाथा इति कदा गीतास्तत्राह यदैलस्य पुरूरवसो राज्ञः सोमेन सह श्राद्धार्थं
समागममासीदित्यर्थः एतच्च मत्स्यपुराणे सोमेन पुरूरवसः श्राद्धक्रियार्थं समागमनं सप्रपञ्चं निरूपितमिति तत्र एवावसेयो विस्त
रभयान्नातिविद्यते २१ तामेव गाथामाह कदेति भावी भविष्यः अग्र्यः पितृक्रियारतत्वात् कस्यचिदस्मद्वंशजस्य तादृशः सु
तो भविता यो योगिनां भुक्तस्य शेषाच्छिष्टं यदन्नं तद्विद्यते यस्य स तेन पिण्डं प्रदास्यतीति योजना २२ खड्गो गण्डकस्तस्य मांसं तदेव
महाहविः खड्गमांसविशेषमाह विषाणाभ्यां शृङ्गाभ्यां रहितो यः खड्गस्तस्य प्राश्याश्नाता वत् सूर्ययावत्कालं सूर्य उदेति मदा
प्रलयपर्यन्तं कालं तावदश्नुवामहे तृप्ता भवाम इत्यर्थः २३

प्रजां मेध्यां पशून् हिंसातं प्रपुष्टिमुत्तमामित्यादिना नैतदाख्यापेक्षपोदघी श्राद्धस्य तत्वात्तच्छ्राद्धं श्राद्धचते तथेति एवंमनंतराध्या
यएवमध्यास्य स्वजनश्रेष्ठमित्यत्र स्तुतं श्राद्धमवश्यकर्तव्यमाह मयास्त्वेति तथाहत्तिरणायेने सूर्यस्य दत्तिरागतोगतोदिने ३५ प्रा
संगिकमुक्त्वाप्रस्तुतमाह तस्मादिति ३६ पितृतर्पणेन सर्वदेवप्रीणनमाह वसूनिति प्रीणयंति प्रसादं गच्छंति तर्पयंति
इतिमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येमहिषासुरसैन्यवधोनामद्वितीयो
ध्यायः ९१ ऋषिरुवाच निहन्यमानंतत्सैन्यमवलोक्यमहासुरः सेनानीश्चिक्षुरःकोपाद्ययौ
योद्धुमथाम्बिकाम् १ सदेवींशरवर्षेणववर्षसमरेसुरः यथामेरुगिरेःशृंगंतोयवर्षेणतोय
दः २ तस्यछित्वाततोदेवीलीलयैवशरोत्करान् जघानतुरगान्बाणैर्यंतारंचैववाजिनां ३
चिच्छेदचधनुःसद्योध्वजंचातिसमुच्छ्रितं विव्याधचैवगात्रेषुछिन्नधन्वानमाशुगैः ४ सच्छिन्न
धन्वाविरथोहताश्वोहतसारथिः अभ्यधावततांदेवींखड्गचर्मधरोसुरः ५ सिंहमाहत्यख
ड्गेनतीक्ष्णधारेणमूर्धनि आजघानभुजेसव्येदेवीमप्यतिवेगवान् ६ तस्याःखड्गोभुजंप्राप्य
पफालनृपनन्दन ततोजग्राहशूलंसकोपादरुणलोचनः ७

चजघान ३ सखड्गंसमौर्वीकंविव्याधतनावुग्राशुगैःशरैः ४५ सव्येवामे ६ तस्यादेव्याभुजंप्राप्यखड्गःपफालविशीर्णारजितिफलाविशर

सोमनाथदत्तराजगुरु ७

मापु
टी
२८५

ततस्तेनाज्वलमानेन त्रिशूलेनाज्वलितेन सः । विविध्य सुप्रमेयेन ८ ततः शूलमापतन्तं दागच्छन्तं दृष्ट्वा ९ त्रिदशार्दनो देवारिः ।१०॥ ११ सश्च
मन्यश्रान्तस्य १२ नागान् गजान् रथान्देवो विपचनं प्रगृह्य असिमितिशुभधानेश्चमसमप्रगृह्य सहायोसन्धिरार्थः १४ निपपातश्चवतीर्ण्य १८

284

विक्षेप च ततस्तत्र भद्रकाल्यां महासुरः २ ज्वलमानं तेजोभीरविविधमिवाम्बरात् ८ दृष्ट्वा त
दापतच्छूलं देवी शूलममुञ्चत ३ तेन तच्छतधा नीतं शूलं स च महासुरः ९ हते तस्मिन्महावी
र्ये महिषस्य चमूपतौ ४ आजगाम गजारूढश्चामरस्त्रिदशार्दनः १० सोऽपि शक्तिं मुमोचाथ दे
व्यास्तामम्बिका द्रुतं ५ हुंकाराभिहतां भूमौ पातयामास निष्प्रभां ११ भग्नां शक्तिं निपतितां दृष्ट्वा
क्रोधसमन्वितः ६ चिक्षेप चामरः शूलं बाणैस्तदपि साच्छिनत् १२ ततः सिंहः समुत्पत्य गजकुम्भा
न्तरे स्थितः ७ बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा १३ युध्यमानौ ततस्तौ तु तस्मान्नागान्महीं ग
तौ ८ युयुधातेऽतिसंरब्धौ प्रहारैरतिदारुणैः १४ ततो वेगात्खमुत्पत्य निपत्य च मृगारिणा कर
प्रहारेण शिरश्चामरस्य पृथक्कृतं ९ उदग्रश्च रणे देव्या शिलावृक्षादिभिर्हतः दन्तमुष्टितलैश्चैव
करालश्च निपातितः १६ ॥
पृथक्कृतं द्विधाकृतम् १५ दन्तैर्दन्ताग्रैः पादांतरेखैः प्रहृतैर्मुष्टिभिः तलैश्चपेटाभिः १९ ॥

२८५

गदाया आघातैः प्रहारैः १७ त्रिनेत्रं नाम दैत्यं १८ विडालस्य विडालाख्यस्य नाम्नेकदेशेन नामग्रहणं भीमादिवत् यमस्य क्षयं गृ
हं १९ अत्र सार्धः श्लोकः पुराजनादर्शान्नवर्तनं चिह्नितः २० स्वेन गर्भे स्वेन रूपेण देहेन गणान्नाम त्रासयामास हिंसैष्या महिष इत्यत्र
इति प्रयाणांतरेस्य ग्रहम् २१ तुण्डं मुखं खुराः पादाः तेषां क्षेपैः प्रहारैः लांगूलं पुच्छं २२ वेगधावनं भ्रमेण मण्डलाका

देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतं बाष्कलं भिंडिपालेन बाणैस्ताम्रं तथांधकं १७ उग्रा
स्यमुग्रवीर्यं च तथैव च महाहनुं त्रिनेत्रं च त्रिशूलेन जघान परमेश्वरी १८ विडालस्यासिना कायात्पा
तयामास वै शिरः दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयं १९ कालं च कालदंडेन खड्गघातैरताड
यत् असिनैवासिलोमानमच्छिनत्सा रणोत्सवे गणैः सिंहेन देव्या वाहनयत्ने प्रहृतैस्तावकैः २०
एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः माहिषेण स्वरूपेण त्रासयामास तान्गणान् २१ कांश्चि
त्तुंडप्रहारेण खुरक्षेपैस्तथापरान् लांगूलताडितांश्चान्यान् शृंगाभ्यां च विदारितान् २२ वेगे
न कांश्चिदपरान्नादेन भ्रमणेन च निःश्वासपवनेनान्यान्पातयामास भूतले २३ निपात्य प्रमथानी
कमभ्यधावत सोऽसुरः सिंहं हंतुं महादेव्याः कोपं चक्रे ततोऽम्बिका २४ सोपि कोपान्महावीर्यः खु
रक्षुण्णमहीतलः शृंगाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च २५ वेगभ्रमणविक्षुण्णा मही तस्य व्यशी
र्यत लांगूलेनाहतश्चाब्धिः प्लावया मास सर्वतः २६

रगत्या निःश्वासपवनेन फूत्कारेण २३ प्रमथानां गणानामनीकं सैन्यं २४
खुरैः क्षुण्णा संचूर्णितं तलं येन २५ वेगयुक्तं भ्रमणं मंडलाकारगमनं तेन विक्षुण्णा ऊर्ध्वच्छिन्ना व्यशीर्यत विशीर्णा भवत् आहतो बद्धा
यातः सर्वतो वेलामतिक्रम्य महीं जलेन प्लावयामास २६

धुताभ्यांकंपिताभ्यांशृंगाभ्यांविभिन्नाद्विधाकृताघनामेघाःश्वासानिलैरस्ताःपर्यस्ताअचलाःपर्वताभूयोनभसःपेतुरि
त्यर्थः २७ समाध्मातं उद्दीपितं इतिअनेनप्रकारेण २८ माहिषंरूपंतत्याजमायामशिश्रियदित्यर्थः २९ तस्यसिंह

धुतशृंगविभिन्नाश्चखंडंखंडंययुर्घनाःश्वासानिलास्ताःशतशोनिपेतुर्नभसो
चलाः २७ इतिक्रोधसमाध्मातमापतंतंमहासुरं दृष्ट्वासाचंडिकाकोपंतद्वधाय
तदाकरोत् २८ साक्षिप्त्वातस्यवैपाशंतंबबंधमहासुरं तत्याजमाहिषंरूपंसो
पिबद्धोमहामृधे २९ ततःसिंहोभवत्सद्योयावत्तस्यांबिकाशिरः छिनत्तिताव
त्पुरुषःखड्गपाणिरदृश्यत ३० ततएवाशुपुरुषंदेवीचिच्छेदसायकैः तंखड्ग
चर्मणासार्धंततःसोभून्महागजः ३१ करेणचमहासिंहंतंचकर्षजगर्जच
कर्षतस्तुकरंदेवीखड्गेननिरकृंतत ३२ ॥

स्य ३० खड्गश्चचर्मचेतिसमाहारेद्वन्द्वः ३१ तस्यसिंहंकर्षतः निरकृंततचिच्छेदेत्यर्थः ३२

तथैव क्षुब्धवदेव ३३ उत्तमं पानं वीरपानं अतिपानादरुणलोचना ३४ ननर्द जगर्ज नर्द गर्द शब्दे गर्जनं तदर्थः बलं दैहिकं वीर्यमत्सा
साह स्ताभ्यां योमदो हंकारस्तेनोद्धतउन्मत्तः विषाणाभ्यां शृंगाभ्यां ३५ तान्पर्वतान् प्रहितान्प्रक्षिप्तान् तमसुरं मदेन गर्वे
णोद्धूतमुत्कंपितं मुखे पानवशाद्रागो रक्तिमा यस्याः मद्यपानस्वभाववशादाकुलान्यर्धोच्चारितान्यक्षराणि यत्रेति क्रियावि

ततो महासुरो भूयो माहिषं वपुरास्थितः तथैव क्षोभयामास त्रैलोक्यं सचराचरं ३३ ततः क्रु
द्धा जगन्माता चंडिका पानमुत्तमं पपौ पुनः पुनश्चैव जहासारुणलोचना ३४ ननर्द चासुरः सो
पि बलवीर्यमदोद्धतः विषाणाभ्यां च चिक्षेप चंडिकां प्रति भूधरान् ३५ सा च तान्प्रहितांस्तेन
चूर्णयंती शरोत्करैः उवाच तं मदोद्धूतमुखरागाकुलाक्षरम् ३६ देव्युवाच गर्ज गर्ज क्षण
मूढ मधु यावत्पिबाम्यहं मया त्वयि हतेत्रैव गर्जिष्यंत्याशु देवताः ३७ ऋषिरुवाच एवमु
क्त्वा समुत्पत्य सारूढा तं महासुरं पादेनाक्रम्य कंठे च शूलेनैनमताडयत् ३८ ततः सोपि
पदाक्रांतस्तया निजमुखात्ततः अर्धनिष्क्रांत एवासीद्देव्या वीर्येण संवृतः ३९ ॥

शेषणं ३६ मधु मद्यं आशु शीघ्रमेव भवद्वधाद्धर्षोत्पत्तेस्तेषां गर्जनं ३७
आक्रम्य कंठं गृहीत्वा ३८ तया देव्या पदा पादेनाक्रांतोपि निजमुखादित्यनेन सर्वकायो लक्ष्यते तस्मादर्धनिष्क्रांत एवासीत्सकलं
शरीरं निष्क्रमितुं नाशकयतो देव्या वीर्येण संवृत आक्रांत इत्यर्थः ३९ ॥

मा॰
पु॰टी॰
२८९

४॰ ततो हाहा इति कृतं यस्य तत्तन्नाशपलायितं ४१ ४२ अथैवं स महिष इत्यादि श्लोकत्रितयमस्मादर्थोद्दृष्टं विचित्रितम् ४३
४४ ४५ आदितः षरस्रवतितमो ऽध्यायः देवैः शिरस्याभिरभिरंजितपादपीठां सद्भक्तमानससरोजे सुग्रह संतीभक्तप्रियां

286

अर्धनिष्क्रान्त एवासौ युध्यमानो महासुरः ततो महासिना देव्या शिरश्छित्वा निपातितः ४॰ ततो हाहा
कृतं सर्वं दैत्यसैन्यं ननाश तत् प्रहर्षं च परं जग्मुः सकला देवतागणाः ४१ तुष्टुवुस्तां सुरा देवीं स
ह दिव्यैर्महर्षिभिः जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः ४२ एवं स महिषो नाम ससैन्यः ससुहृ
द्गणः त्रैलोक्यं मोहयित्वा तु तया देव्या निपातितः ४३ त्रैलोक्यस्य तदा भूतैर्महिषे विनिपाति
ते जयेत्युक्ते तदा सर्वैः सदेवासुरमानवैः ४४ ततः सुरगणाः सर्वे देव्याः शक्रपुरोगमाः स्तुति
मारेभिरे कर्तुं निहते महिषासुरे ४५ इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये
महिषासुरवधो नाम तृतीयोऽध्यायः ४६ ऋषिरुवाच शक्रादयः सुरगणा निहतेऽतिवीर्ये तस्मि
न्दुरात्मनि सुरारिबले च देव्या तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा वाग्भिः प्रहर्षपुलकोद्गमचा
रुदेहाः १

भगवतीं परमार्थसारां देवीं नमामि विकसद्हृदनारविन्दां प्रणत्या प्रणामेन नम्राः शिरोधराः
कंधरा अंसाः स्कंदा येषां प्रहर्षरूपपुलकाशेमोद्गमास्तेश्चारवो देहा येषां १ ॥ १ ॥ ॥

तामेव स्तुतिमाह देव्येति यया देव्या आत्मशक्त्या आत्मनः परब्रह्मलक्षणः शक्त्याविभिन्नया यद्वा अः परा ब्रह्मैव केवलेति आत्मशक्त्या वा सा
धनभूतया अभिन्ननिमित्तोपादानरूपया इदं जगत्ततं सृष्टं ततमनुप्रवेशेन व्याप्तं च कीदृश्या निःशेषाणां देवगणानां शक्तिसमू
हात्मा मूर्तिर्यस्याः देवशरीरेभ्यः समुत्पन्नेत्युक्तं यद्यपि देवानां देहेभ्यो निर्गतं तेजो देवीदेहरूपतयाभिव्यक्तं तथापि देव्या स्वीयाः
शक्तयः शास्त्रलोकपालनाय निवेशितास्तन एवं महिषासुरवधाय सकललोकरक्षणाय च पुनरेकीभावेन देवी समष्टिरूपतां
प्राप्ता इति बोध्यं यद्वक्ष्यति अहं विभूत्या बहुभिरिह रूपैर्यदास्थितेति अम्बिकां शक्त्यात्मिकां अखिलानां देवादीनां पूज्यां योग्यां

देव्या यया ततमिदं जगदात्मशक्त्या निःशेषदेवगणशक्तिसमूहमूर्त्या तामम्बिकामखिलदेव
महर्षिपूज्यां भक्त्या नताः स्म विदधातु शुभानि सा नः २ यस्याः प्रभावमतुलं भगवाननंतो ब्र
ह्मा हरश्च न हि वक्तुमलं बलं च, सा चंडिकाखिलजगत्परिपालनाय नाशाय चाशुभभयस्य म
तिं करोतु ३ या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः पापात्मनां कृतधियां हृदयेषु बुद्धिः
श्रद्धा सतां कुलजनप्रभवस्य लज्जा तां त्वां नताः स्म परिपालय देवि विश्वम् ४ ॥

नताः स्मः भवामो वयं विदधातु करोतु २ अतुलमनुपमं प्रभावं महिमानं अनंतः शेषः सहस्रवागपि अत एव स भगवान्
षाडैश्वर्ययुक्तोऽपि ब्रह्मा वेदवक्ता वाक्पतिरपि हरो गौरीश्वरोऽपि अलं पर्याप्तं बलं वक्तुं नालं न समर्थः कान्येषां वार्ता सा चंडि
का दानवविषयातिकोपती यद्वा कंमत्सुरारोपितसमयपटलोद्धतकन्धरानतमहामृगराजरथास्थिता विमलशक्तिमुखा
नलपिंगलायतभुजौघविपिष्टमहासुराननिगदिता भुवनेरिति चंडिकाजननिशुंभमहासुरवस्तुदिति प्रगतविचिन्तितदानवदा
नवप्रमथनैकरतिस्त्वमवतान्नोति सा चंडिका अखिलस्य जगतः परिपालनाय मतिं करोतु अशुभेभ्यो भयस्य नाशाय मतिं करोतु

मा॰ भगवत्याः सर्वदेशेषु सर्वात्मभावमाह येति श्रयतीति श्रीः सुकृतिनां पुण्यवतां भवनेषु गृहेषु या श्रीः पापात्मनां पापिनां
पु॰ टी॰ भवनेष्वलक्ष्मीः दुःसहकुलमूलं कृतधियां बुद्धिमतां हृदयेषु संविदधिकरणेषु बुद्धिः प्रतिभात्मिका सतां ब्रह्मात्मनां हृ
दयेषु श्रद्धास्तिकता कुलं जनयति सदाचाराद्यनुष्ठानेन प्रादुष्कुरुते इति कुलजननः कुलदीपकस्तस्मात्प्रभवस्य सुहृ
२८७ प्रवर्तस्य शोभनस्य हृदये पापलज्जा या कार्याणां अनुष्ठाननिवृत्तिरूपा मेनाधर्मः तां प्रसिद्धां नानारूपैः त्वां प्रत्यक्षरूपां नताः स्म
प्रार्थनीयमाह परिपालयेति ४ भगवत्याः शक्तिपारावारमनोऽभंविचिंत्याह किमिति वर्णयाम वर्णयामः वर्णन
प्रकटीकुर्मः अचिंत्यं चिंतयितुमशक्यं भूरिभूयोऽसुरगणक्षयकारि अतिवीर्यं किं वा वर्णयामः चेदार्थं आहवेषु संग

किं वर्णयाम तव रूपमचिंत्यमेतत् किं चातिवीर्यमसुरक्षयकारि भूरि किं चाहवेषु चरितानि तवाद्भु
तानि सर्वेषु देव्यसुरदेवगणादिकेषु ४ हेतुः समस्तजगतां त्रिगुणापि दोषैर्न ज्ञायसे हरिहरादि
भिरप्यपारा सर्वाश्रयाखिलमिदं जगदंशभूतमव्याकृता हि परमा प्रकृतिस्त्वमाद्या ४॥

ह्वेषु चरितानि दैत्यनिवर्हणादीनि अद्भुतान्याश्चर्यकारीणि हे देवि सर्वेषु असुरादिषु मध्ये अचिंत्यं सकलोत्कृष्टत्वाच्चिंत
यितुं निरूपयितुमशक्यमिति वाक्यार्थ इति येयोऽर्थः ५ सकलजगत्कारणभूता मूलप्रकृतिस्त्वमेवेत्याह हेतुरिति सम
स्तानां जगतां हेतुर्मूलकारणं त्रिगुणा सत्त्वादिगुणत्रयस्वरूपवती हरिहरादिभिर्देवैरपि न ज्ञायसे यतोऽपारा परिच्छेद
हीना सर्वस्याश्रयरूपा कल्पितेन तदात्मना जगतोऽवस्थितत्वात् तस्याश्रयत्वमाह इदमखिलं जगत्त्वदंशभूतं अव्यक्ते
तरव्याकृता याकार्तं सदसद्भ्यामवाच्या परमा सर्वोत्कृष्टत्वात् प्रकृतिः साम्यावस्था आद्या सर्वकारणं ६

२८७

287

किंच जगद्वर्तिनां चरिष्णूनां देवादीनां च त्वन्नाम्नैव तत्प्रसिद्धिरित्याह यस्या इति स्वरात्मां समूहः स्वरतासमूहो येतासमयः यस्याः
समुदीरणेन सकलेषु मखेषु यज्ञेषु समस्तात् स्वरत्नात्प्रसिद्धिं प्रयाति सा त्वं स्वाहासि यतः पितृगणस्य च तृप्तिहेतुरत एव त्वं जनैः आ
देश्य था इत्युच्चार्यसे १ किंच ब्रह्मविद्यारूपापि संसारोच्छेदकारिणीत्वमेवेत्याह येति अविचिंत्यं चिंतनयितुमशक्यं महाव्र
तं भवोच्छेदतत्परं स्थूलसूक्ष्मादिभ्यः स्वात्मनः पृथक्क्रियारूपं येषां अत एव सुनियतेन सम्यङ्निरुद्धानीन्द्रियाणि अंतर्बाह्यरूपाणि
नियतः सम्यग्गृहीतः तत्त्वसारो यैस्तैर्मोक्षार्थिभिर्मुमुक्षुभिर्मुनिभिर्मननशीलैरत एवास्ताः नष्टाः समस्ता रागद्वेषादयो

यस्याः समस्तसुरता समुदीरणेन तृप्तिं प्रयाति सकलेषु मखेषु देवि स्वाहासि वै पितृगणस्य
च तृप्तिहेतुरुच्चार्यसे त्वमत एव जनैः स्वधा च १ या मुक्तिहेतुरविचिंत्यमहाव्रतैस्त्वमभ्यस्यसे
सुनियतेंद्रियतत्त्वसारैः मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्विद्यासि सा भगवती परमासि
देवि ८ ॥

दोषा येषां तैरभ्यस्यसे सकले विषये परवैराग्याश्रयणेन तत्त्वश्रवणतया स्वीक्रियसे हे देवि सा त्वं परमा अविद्यककवासना
नालोपमर्दकत्वात्परचेतन्यत्वस्वीभगवती विश्वस्य स्वात्मतया स्फुरणात् शक्तसार्वज्ञ्यादिषड्भ्यगुणवती युक्तं चैव
तत्रे तस्मात्साहि परा विद्या परस्मादस्या न विद्यते विन्दते लभ्यते युगपत्सार्वज्ञ्यादिगुणान्परात्वेदनानादि धर्मस्य परमोपयत्वबोध ७
ना वर्जनापरमार्थत्वेत स्मादिद्या हि सोच्यते तत्त्वस्यां बुध्येत तेजः परं परमकारणं पश्यसि संसृतता तीव्यक्ते तत्र स्पः शिवतां व्रजेदि ८

मा॰ हे विद्ये वेदितव्ये अपरा चापरा च तत्र परया यया तदक्षरमधिगम्यते इति श्रुतत्वात् पराविद्यारूपतया पूर्वश्लोके देव्युक्ता इदानीम् अपरा
पु॰टी॰ ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति श्रुतत्वात् अपराविद्यारूपतया देवीं स्तौति शब्दा
त्मिकेति शब्दब्रह्मरूपासि विमला नाम पौरुषेयत्वादष्टानाम् ऋचां यजुषां च उद्गीथेन ॐकारेण साम्नां भक्तिविशेषेण रम्य
२८८ पदपाठो येषां साम्नां तेषां च निधानं स्थानमेवं देवी त्वं त्रयी भगवत्यसि ब्राह्मणादीनां त्रैवर्णिकानां शास्त्रोक्तषट्कर्मादिधर्मवत्तां भव
स्य संसारस्य भावनाय प्रादुष्करणाय वार्त्ता आजीवोऽसि ब्राह्मणस्य षट्कर्मसु त्रीणि कर्माणि यजनाध्ययनदानाख्यानि पारलौकिकानि

288

शब्दात्मिकासि विमलर्ग्यजुषां निधानमुद्गीथरम्यपदपाठवतां च साम्नां देवी त्रयी भगवती भ
वभावनाय वार्त्तासि सर्वजगतां परमार्त्तिहन्त्री ९ मेधासि देवि विदिताखिलशास्त्रसारा दुर्गासि
दुर्गभवसागरनौरसंगा श्रीः कैटभारिहृदयैककृताधिवासा गौरी त्वमेव शशिमौलिकृतप्रति
ष्ठा १०॥

याजनाध्यापनप्रतिग्रहाख्यानि त्रीणि कर्माणि आजीवरूपाणि एवं सर्वेषां वर्णानां कर्मविभागो हे विद्ये न द्रष्टव्यः सा चेत् त्रयी वार्त्ता स
र्वजगतां परमा या आर्त्तिस्तां हन्त्री विकाभावरूपायातैःस्थोरेद्यैर्नाशयित्री भवसीत्यर्थः अनेन सर्वविद्यावत्त्वम् ऐहिकलाभरूपत्वं भगवत्या
दर्शितम् ९ सकलशास्त्राणां वार्त्ता सारग्रहणात्मिका च त्वमेवासीत्याह मेधासीति हे देवि धीजन्मादिगुणग्रामयुक्ते मेधा धा
रणावती बुद्धिरसि तस्या लक्षणमाह विदितो ज्ञातोऽखिलानां शास्त्राणां सारो यया सा दुर्गा दुःखेन प्राप्यत्वात् मेधा नाम्नी
सरस्वती हि बहुजन्मपरम्परायासमसाध्येन तपोविशेषेण लभ्यते दुर्गस्य दुर्लंघ्यस्य भवसागरस्य नौ रतनायासे सैव तारिणी नौ

किनैकाकर्केनापिकृपाविद्यसंयुक्तोऽस्मालिकः।

२८८

एवंब्राह्मीत्वं भगवत्या दर्शितमिदानीं वैष्णवीत्वं शैवीत्वं चाह श्रीरिति लक्ष्मीः कैटभारेर्हृदये कृतसि कृतोधिवासश्चापि केन स्थानं य
या गौरी पार्वती शशिमौलौ चंद्रशेखरे कृता प्रतिष्ठास्पदं यया अर्धनारीश्वरमूर्तित्वादित्यर्थः १० ईषद्धासमिति वक्त्रेषु पदव्यास
यत्रार्थः मंदस्मितयुक्तं अमलत्वमाह परिपूर्णेत्यादिना तदेतत्तव वक्त्रं जगन्मोहनविधायि विलोक्यापि महिषासुरेण रु
षाऽगृहीतकोपेन सहसा तत्क्षणमेव यत्प्रहृतं तदत्यद्भुतं जगन्मोहकमपि मुखं दृष्ट्वा तस्य मोहो नाभवदिति सुभटोयं दैत्यस्तादृ
तस्यापि हननेन देव्या उत्कर्षोऽनेनोक्त इति द्रष्टव्यं ११ अन्यथापि देव्या उत्कर्षं स्थापयन्नाह दृष्ट्वापीति हे देवि कुपितं कोपयुक्तं
अतो भ्रुकुट्या भ्रूभंगेन करालं भीषणं उद्यता कृतोदयेन शशांकेन सदृशा छविर्दीप्तिर्यस्य तन्मुखं दृष्ट्वापि महिषः सद्यः तत्का

ईषत्सहासममलं परिपूर्णचन्द्रबिम्बानुकारि कनकोत्तमकांतिकांतम् अत्यद्भुतं प्रहृतमात्त
रुषा तथापि वक्त्रं विलोक्य सहसा महिषासुरेण ११ दृष्ट्वापि देवि कुपितं भ्रुकुटीकरालमुद्यच्छशां
कसदृशच्छवि यन्न सद्यः प्राणान्मुमोच महिषस्तदतीव चित्रं कैर्जीव्यते हि कुपितांतकदर्शनेन
१२ देवि प्रसीद परमा भवती भवाय सद्यो विनाशयति कोपवती कुलानि विज्ञातमेतदधुनैव य
दस्तमेतन्नीतं बलं सुविपुलं महिषासुरस्य १३ ॥

लमेव यन्न प्राणान्मुमोच तदतीव चित्रमद्भुतं भाति तत्र हेतुः हि यस्मात् कुपितस्यांतकस्य यमस्य दर्शनेन कैर्जीव्यते न केनापीत्य
नेन दैत्यस्यातिधीरत्वं संभ्रमहीनस्यापि तस्य वधाद्देव्या उत्कर्षः स्थापितः १२ हे देवि यदा भवती प्रसादे परमा भवति तदा त्वं भवा
स्मा४ य हृदये यथार्थं यदा कोपवती तदा कुलानि समग्रान् भवती विनाशयति एतच्च प्रसादप्रतिघचातुर्यं अस्माभिरधुनैव ज्ञातं
यत् यस्मान्ने एतत्तु विपुलमतिमहत्तवलं सैन्यं प्रागेवंच महिषस्य अस्तं विनाशं नीतं प्रापितमित्यर्थः १३

मा॰ देव्याः प्रसादस्य माहात्म्यमुत्तरोत्तराभिवृद्धिरूपमाह तेइति संमताः महाजनैः स्वीकृताः न सीदति न विशीर्यति बन्धुवर्गो बन्धुसमू
पु॰टी॰ हः धन्याः धनार्हाः भाग्यवंतः निभृताः रक्षिता आत्मजाभृत्यादाराश्च येषां अभ्युदयदा उत्तरोत्तराभिवृद्धिदा १४ भगवत्याः कर्म
२८९ फलदातृत्वमाह धर्म्याणीति सुकृती पुण्यवान् अत्यादृतो ऽतिश्रद्धावान् प्रतिदिनं कर्माणि नित्यनैमित्तिकानि धर्म्याणि धर्मादन
पेतानि सकलानि संपूर्णानि करोति अनुतिष्ठति ततस्तैः कर्मभिर्भवत्याः कर्मफलदात्र्याः प्रसादात्स्वर्गं प्रयाति च शास्त्रान्मोक्षमपि

तेसंमताजनपदेषुधनानितेषांतेषांयशांसिनचसीदतिबन्धुवर्गः धन्यास्तएवनिभृतात्मजभृत्य
दारायेषांसदाभ्युदयदाभवतीप्रसन्ना १४ धर्म्याणिदेविसकलानिसदैवकर्माण्यत्यादृतःप्रतिदि
नेसुकृतीकरोति स्वर्गंप्रयातिचततोभवतीप्रसादाल्लोकत्रयेऽपिफलदाननुदेवितेन १५ दुर्गेस्म
ताहरसिभीतिमशेषजन्तोः स्वस्थैः स्मृतामतिमतीवशुभांददासि दारिद्र्यदुःखभयहारिणिका
त्वदन्यासर्वोपकारकरणायदयार्द्रचित्ता १६ ॥

ननुनिश्चयेहेदेवितेनकारणेनलोकत्रयेइहामुत्रापिफलदाभवतीभवतीत्यर्थः १५ देव्याःकरुणाकरत्वमाह दुर्गेइति हेदुर्गेभगव
ति दुर्गेकांतारादौस्मृतासती अशेषजन्तोर्भीतिंहरसिदुर्गेइतितेजात्र्याहृत्यायोज्यं स्वस्थैः स्वास्थ्येभवेस्थितैः स्वस्थैरितिपाठे स्वास्मिन्
गृहादौस्थितैःस्मृतासतीअतीवशुभांमतिंभोगापवर्गप्राप्तिसाधनानुष्ठानप्रवणतत्परांयोगाभ्यासप्रवणांचददासि हेदारिद्र्यादिहा
रिणिकात्वदन्यादयार्द्रचित्तासर्वेषामुपकारविधानायद्वितीयास्तिनकापीतिदेव्याःसर्वकर्तृत्वंसर्वेश्वरत्वंचकथितं १६

289

देव्याः सर्वोपकारित्वं प्रदर्शयन्नाह एभिरिति एभिरसुरैर्हतैर्जगत्सर्वमुपद्रवराहित्यादुपैति प्राप्नोति उपैत्वित्यर्थः अनेनजगदुपकारः
उक्ताभिसंधानेन दैत्यहननं देव्या विहितं तथैते दैत्या नरकाय पापं नाम निश्चयेन चिराय यावज्जीवं कुर्वंतु एते संग्रामे मृत्युमपि गम्य प्राप्य दिवं
प्रयांतु इति मत्वा विज्ञाय नूनं निश्चयेन हे देवि इति अनेन हेतुहृदयेनाहितान् शत्रून् विनिहंसि सर्वशक्तेर्भगवत्याः संग्रामव्यतिरेकेण इच्छामा
त्रेण दैत्यानां नाशो किं न भवेदिति भावः १७ तदेवाह दृष्ट्वैवेति हे देवि भवती सर्वासुरान् दृष्ट्वैव दृष्टिपातमात्रेणैव भस्म किं न प्रकरोति प्र

एभिर्हतैर्जगदुपैति सुखं तथैते कुर्वंतु नाम नरकाय चिराय पापं संग्राममृत्युमधिगम्य दिवं प्रयां
तु मत्वेति नूनमहितान्विनिहंसि देवि १७ दृष्ट्वैव किं न भवती प्रकरोति भस्म सर्वासुरानरिषु यत्प्रहि
णोषि शस्त्रं लोकान्प्रयांतु रिपवोपि हि शस्त्रपूता इत्थं मतिर्भवति तेष्वहितेषु साध्वी १८ खड्ग
प्रभाप्रकरविस्फुरणैस्तथोग्रैः शूलाग्रकांतिनिवहेन दृशोसुराणां यन्नागता विलयमंशुमदिंदु
बिंबयोग्याननं तव विलोकयतां तदेतत् १९ ॥

रिषु यत् शस्त्रं प्रहिणोषि प्रहरसि तेन शस्त्रपूते भवत्याः तेष्वहितेष्वपि साध्वी उपकारप्रवणा मतिर्भवति कथं इत्थं रिपवोपि हि शस्त्र
तैः पूता लोकान्स्वर्गलोकान्प्रयांत्विति देव्या उपकारकारित्वं दर्शितं १८ प्रकरः समूहः विविधैः स्फुरणैः उग्रैः भीषणैः असु
राणां दृशो नेत्राणि विलयमाप्यं यन्नागता अंशुमता इंदोर्बिंबेन योग्यं सदृशं आननं वदनं विलोकयतामसुराणां तदेतदनान्यफ
लितमित्यनेनापि भगवत्या रिपुषूपकारित्वं द्योतितं चन्द्रदर्शनेन हि दृक्प्रसादः प्रसिद्ध एवेति १९

मा० दुर्वृत्तानांदुर्जनानांवृत्तस्यव्यवहारस्यशमनंनाशनं यद्वा दुष्टेनहृतेनपापात्मकेनवृत्तेननरकलक्षणंफलंयत्तेषांतस्यशमनंहेदेवि
पु०टी० तवशीलंस्वभावः सच्चरित्रंवा तथैतत्तवरूपमन्यैरुपमानैरतुल्यमसदृशं अतएवाचिंत्यंसर्वोत्कृष्टत्वान्निरूपयितुमशक्यं तथात
२१० ववीर्यपराक्रमः हृतोनाशितोदेवानामिन्द्रादीनांपराक्रमोयैस्तेषामप्यसुराणांहंतृ तदप्यचिंत्यमितिपूर्ववत् तथाचाचिंत्येन
रूपेणवीर्येणचतेषांवधोयस्त्वयाविहितस्तेनेत्थंवैरिष्वपिदयैवप्रकटितेत्यर्थः २० एतदेवाह केनेति अस्यपराक्रमस्यकेन·
सहोपमाभवतु नकेनापि अन्यस्येदृशस्याभावात् तत्पोर्णरूपंतुलोपमाभ्यामितितृतीयानिषेधेत्रतृतीयाप्यदर्शनमार्षम् तथात

दुर्वृत्तवृत्तशमनंतवदेविशीलंरूपंतथैतदविचिंत्यमतुल्यमन्यैः वीर्यंचहंतृहृतदेवपराक्रमा
णांवैरिष्वपिप्रकटितैवदयात्वयेत्थं २० केनोपमाभवतुतेस्यपराक्रमस्यरूपंचशत्रुभयकार्य
तिहारिकुत्र चित्तेकृपासमरनिष्ठुरताचदृष्टात्वय्येवदेविवरदेभुवनत्रयेपि २१ त्रैलोक्यमेतद
खिलंरिपुनाशनेनत्रातंत्वयासमरमूर्धनितेपिहत्वा नीतादिवंरिपुगणाभयमप्यपास्त
मस्माकमुन्मदसुरारिभवंनमस्ते २२ ॥

वरूपंचशत्रूणांभयकारि अतिशयेनहारिमनोहरं इतिकुत्रजगदृष्टं चित्तेकृपारिपुवधेप्युपकारित्वात् समरेनिष्ठुरतापारुष्यंभुवन
त्रयेपित्वय्येवदृष्टाकृपासहजापारुष्यमागंतुकमितिविरोधःपरिहृतोबोध्यः २१ त्वयारिनाशनेनतत्त्रैलोक्यमखिलंत्रातंरक्षि
तं तेपिरिपुगणाःसमरमूर्धनिहत्वादिवंनीताःप्रापिताः अस्माकमपिभयंत्वयापास्तं उन्मदेभ्योतिदृप्तेभ्यः सुरारिभ्यो
भवंजातंभयंनमस्तेइतिनमस्कारातिरिक्तंत्वत्स्तुतिसामर्थ्यंनास्माकमित्यर्थः २२

नोऽस्मान् २२ भ्रामणेनेति क्रमणभावश्चार्थः आत्मनः स्वकीयस्य शूलस्य २४ सौम्यानि अघोराणि अनुग्रहप्रवणानि अत्यन्तघोराणि संहारा
वटपातयितृत्वात् तथा भुवं रक्ष २५ करापववहुत्वात्तैः संगीनि संसर्गयुक्तानि २६ धात्री माता २७ प्रसादेन पारुष्यादित्यागेन सुशोभनं

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च २२ प्राच्यां
रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि २४ सौम्यानि यानि रू
पाणि त्रैलोक्ये विचरन्ति ते यानि चात्यन्तघोराणि तै रक्षास्मांस्तथा भुवं २५ खड्गशूलगदादीनि
यानि चास्त्राणि तेऽम्बिके करपल्लवसंगीनि तैरस्मान्रक्ष सर्वतः २६ ऋषिरुवाच एवं स्तुता सु
रैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः अर्चिता जगतां धात्री तथा गन्धानुलेपनैः २७ भक्त्या समस्तैस्त्रिदशै
र्दिव्यैर्धूपैस्तु धूपिता प्राह प्रसादसुमुखी समस्तान्प्रणतान्सुरान् २८ देव्युवाच व्रियतां त्रि
दशाः सर्वे यदस्मत्तोऽभिवाञ्छितं ददाम्यहमतिप्रीत्या स्तवैरेभिः सुपूजिता २९ महिषोयं
महावीर्यो निहतश्चारणे मया कर्त्तव्यमपरं यच्चडक्कं तन्निवेद्यतां इत्याकर्ण्य वचो देव्याः प्रत्यू
चुस्ते दिवौकसः ३०

शुभं यस्याः २८ हे सर्वे त्रिदशा देवाः व्रियतां स्वीक्रियतां अस्मत्तो मत्तः एभिः स्तवैः अतिशयेन प्रीता प्रसन्ना युष्माभिः सुपूजिता वा २९
कात्यायनीतंत्रोक्तनियमरीत्या ददाम्यहमिति श्लोकद्वयं पुरातनादर्शानुरोधादत्र चिह्नितम् ३०

ग्ययस्मात् ३१ त्वयास्वेच्छयायदिवापिवरोस्माकमस्मभ्यं हिंसीथा इत्यार्थः ३२ वित्तर्द्धिविभवैः सहधनादीनां वृद्धये उपचयाय अ
स्माकमिवप्रसन्नास्मत्प्रसन्नातस्यापिभवेथाः ३३ भद्रंकालयतिप्रददातीतितथा अंतर्हिता अदृश्या अर्थेहते ३४ अंकोहिती

291

देवाऊचुः भगवत्याकृतंसर्वंनकिंचिदवशिष्यते यदयंनिहतःशत्रुरस्माकंमहिषासुरः ३१ य
दिवापिवरोदेयस्त्वयास्माकंमहेश्वरि संस्मृतासंस्मृतात्वंनोहिंसीथाःपरमापदः ३२ यश्चम
र्त्यःस्तवैरेभिस्त्वांस्तोष्यत्यमलानने तस्यवित्तर्द्धिविभवैर्धनदारादिसंपदां वृद्धयेस्मत्प्रसन्ना
त्वंभवेथाःसर्वदाम्बिके ३३ ऋषिरुवाच इतिप्रसादितादेवैर्जगतोर्थेतथात्मनः तथेत्युक्त्वा
भद्रकालीबभूवांतर्हितानृप ३४ इत्येतत्कथितंभूपसंभूतासायथापुरा देवीदेवशरीरेभ्योजग
त्त्रयहितैषिणी ३५ पुनश्चगौरीदेहात्सासमुद्भूतायथाभवत् वधायदुष्टदैत्यानांतथाशुंभनिशुं
भयोः ३६ रक्षणायचलोकानांदेवानामुपकारिणी तच्छृणुष्वमयाख्यातंयथावत्कथयामि
मिते ३७ इतिमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येशक्रादिस्तुतिर्नामचतुर्थो

॥ ध्यायः ४१ ॥

यंचरितमुपसंहरन्नाह इत्येतदिति ३५ गौर्याःपार्वत्यादेहात् समुद्भूताप्रादु
र्भूता ३६ ३७ पंडितभट्टरामचंद्रविरचितेदेवीमाहात्म्यव्याख्यानेआदितःसप्तनवतितमोध्यायः द्वितीयंचरितंसमाप्तम् ॥

आद्यस्यादिशक्तिनिवहैः परिसंस्तुतां तां देव्यां तकादिभिरनं समवाप्तभूतिं सम्पूर्णचन्द्रधवलसन्निभमूर्तिमाद्यां गौरीं नमामि कृतभक्त
जनप्रमोदां ॥ एवं महिषमर्दिनीचरितं विस्तरेण प्रपंचितं ध्यानमपि कृतमत्र लक्ष्मीतंत्रे भिहितं अभिष्टुता मरुद्भिः सा दैत्यमहिषं जघ्नुषी तत्क्ष
ण. महिषांतकरी सैक्ता इं देवैर्महर्षिभिः ॥ उत्पत्तिं गुह्यविक्रांतिं स्तोत्रं चैव समस्तैश्वर कथयंति सावित्री सर्वा ब्रह्मणा वेदपारगाः ते
लभंते च फलं शश्वदापि पत्यमनश्वरमित्यादि अथेदानीमेतस्या महालक्ष्म्या निर्गुणत्वात् दृष्टस्या यास्त्रिपरिजस्याविकृता विकृ
तिरूपा देवदेहसमुद्भूता महालक्ष्मीमूर्तिविवसत्त्वमूर्ति गौरीप्रकृतिरूपा प्राधानिकरहस्येभिहिता यङ्कं च तामित्युक्ता महाल
क्ष्मीः स्वरूपमपरं नृप सत्त्वाख्येनातिशुद्धेन गुणेनेन्दुप्रभं दधौ चतुर्भुजा तत्सा नारी स्वेतपर्वतसन्निभा अक्षमाला कुशधरा वीणा
पुस्तकधारिणी सा बभूव वरा नारी नामान्यस्यैच सा ददौ महाविद्या महावाणी भारती वाक्सरस्वती आर्या ब्राह्मी कामधेनु
र्वेदगर्भा च धीश्वरीति अस्याविकृतिरूपिण्याः पार्वत्या देहात् आविर्भूता तदुक्तं वैकृतिके रहस्ये गौरीदेहात्समुद्भूता या स
त्त्वैकगुणाश्रया साक्षात्सरस्वती प्रोक्ता शुंभासुरनिबर्हिणी दधौ चाष्टभुजा बाणमुसलेशूलचक्रभृत् शंखं घंटां
लांगलं च कार्मुकं वसुधाधिप एषा संपूजिता भक्त्या सर्वज्ञत्वं प्रयच्छतीति इयं च पूर्वोक्तप्रकारेण सृष्टवगीशिष्टात् ब्रह्मा
दिशक्तिश्रेणीशोभितावैखरीरूपाभिधीयते विविधानि खानि राति गच्छतीति वैखरं देहं तत्साजाता वैखरीति एतासं
वाचां तिसृणां पश्यंत्यादीनां सृष्टिक्रमेण पश्यंत्या ब्रह्माधिष्ठाता मध्यमाया विष्णुर्वैखर्या रुद्र इति बोध्यम् संहारे तु पश्यंत्या
रुद्रो मध्यमाया विष्णुर्वैखर्यां ब्रह्मा एवात् भयथा सर्वाधिष्ठात्री परब्रह्मात्मिकैवेति ज्ञेयमित्यलं अत्र नामपूर्वोध्यायांते पुनश्च गौरी
देहात्सेत्यादि मास्त्रोको पत्तिं प्रपंचयंत्यत्तीयं चरितं वक्तुमुपक्रमते पुरेत्यादिना मदबलयोराश्रयात् सेवनाद्धेतोः १ स्वर्गं तां
रसादानत्यागरूपं ऐंद्रं दौर्विदैत्यं जगदाप्यायनविधायित्वं कौबेरं स्वेदं कौबेरं नियम्यपि पतित्वं याम्यं यमस्येदं याम्यपरीत्ति कार्यं
वरुणस्याधिकारं जलेशत्वं २ ॥

मा॰ पवनस्यवायोर्वह्नेर्हिंसर्वप्राणिप्राणकर्तृत्वं वह्नेरग्नेःकर्मपाचकतादिकं विनिर्धूतानिष्कासिताः ३ त्रयस्त्रिंशत
पु॰टी॰ अर्कोद्वादशरुद्राएकादश वसवोष्टौअश्विनौद्वौनिराकृतावाधिताः अपरैरजितां ४ स्मरणमाह तयेति ५ तत्रहिमालयेदेव
२९२

292

ऋषिरुवाच पुराशुंभनिशुंभाभ्यामसुराभ्यांशचीपतेः त्रैलोक्यंयज्ञभागाश्चहृतामदबला
श्रयात् १ तावेवसूर्यतांतद्वदधिकारंतथैन्दवं कौबेरमथयाम्यंचचक्रातेवरुणस्यच २ तावेव
पवनर्द्धिंचचक्रतुर्वह्निकर्मच ततोदेवाविनिर्धूताभ्रष्टराज्याःपराजिताः ३ हृताधिकारा
स्त्रिदशास्ताभ्यांसर्वेनिराकृताः महासुराभ्यांतांदेवींसंस्मरंत्यपराजितां ४ तयास्माकंवरोद
त्तोयथापत्सुस्मृताखिलाः भवतांनाशयिष्यामितत्क्षणात्परमापदः ५ इतिकृत्वामतिंदेवाहि
मवंतंनगेश्वरं जग्मुस्तत्रततोदेवींविष्णुमायांप्रतुष्टुवुः ६ ॥

भिव्यक्तिस्थाने विष्णुमायांसर्वाधिष्ठानांसर्वात्मिकांविष्णोर्हरेर्नीच प्रकर्षेणसर्वात्मताभिगमनेनप्रतुष्टुवुः ६ यादेवीसर्वभावेषु श्रीः
सर्वभावेनसंस्थिता नमोविश्वेनमःकृत्यैनमस्स्थित्यैनमोमृदे तांस्तुतिमाह नमोदेव्याइति देव्यैप्रकाशादिस्वभावायै महादेव्यैजगत्सर्गा

पिनां ब्रह्मादीनामपि सृष्ट्यादिविधायीत्यर्थः शिवा तरीया शिवमद्वैतं चतुर्थं मन्यंत इति श्रुतेः प्रकृत्यै गुणात्मकत्वात्सृष्ट्यै वैकृत्यै
क्रियायै गुणव्यतिरिक्तस्य कस्यापि भावस्यासत्त्वात्सृष्टाक्रिया प्रकृतिः तदुक्तं गीतासु न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैरिति भद्रायै भेदज्ञावरणात् ज्ञावरणात् ज्ञावरणं च विनिवर्तनेकारणात्मनावस्था
पनाह्लादनं च नियताः समाहितमानसाः ७ रौद्र्यै रुद्रस्य संहारशक्तिरूपायै नित्यायै सनातनायै नित्या शक्तिरूपायै च गौ-
७० र्यै पार्वत्यै तद्वर्णायै वा धात्र्यै धारणशक्त्यै मायै च ज्योत्स्ना चंद्रप्रभा तस्यै इंदुरूपिण्यै चंद्रात्मिकायै सुखायै महानंदायै ८

देवा ऊचुः नमो देव्यै महादेव्यै शिवायै सततं नमः नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्
रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ज्योत्स्नायै चेंदुरूपिण्यै सुखायै सततं नमः ८ कल्या
ण्यै प्रणता वृद्ध्यै सिद्ध्यै कूर्म्यै नमो नमः नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ९ दुर्गायै दुर्ग
पारायै सारायै सर्वकारिण्यै ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः १०॥

कल्याण्यै तद्रूपिण्यै प्रणतानामासमंताद्वृद्ध्यै उपचित्यै सिद्धिरणिमा महिमा चैव लघिमा गरिमा तथा प्राप्तिः प्राकाम्यमीशित्वं
वशित्वं चाष्टसिद्धयः इत्युक्ताष्टसिद्धिरूपायै सिद्धिर्निष्पत्तिः सर्वाधारभूतायै स्याप्याधारभूता कूर्मशक्तिः कूर्मी नमो नम इति
पदाभ्यासः प्रसादनादिषु न दुष्टः तदुक्तं विषादे विस्मये हर्षे खेदे दैन्ये वधारणे प्रसादने संभ्रमे च हि स्थिरुक्तं न दुष्यतीति स्मृ
तिः सत्त्वतिस्त्वस्या निष्क्रांता निर्ऋतिः पापदेवता कालश्रीस्तद्रूपायै पापिनां निर्ऋतिर्लोकपालो राक्षसो वा तस्य शक्तिः भूभृतां
राज्ञां भूपालनोत्पन्ना लक्ष्मीः शर्वस्य शक्तिः शर्वाणी तस्यै ९ ॥

मा·
पु·टी·
२९३

दुर्गाद्रुर्गतियानस्यै दुर्गा दुर्गे दुःखात्मकं संसारसागरं तस्य पारायै पारकर्त्र्यै सारायै बलं तत्कृत्यै भाव रूद्र यंच सर्वकारिण्यै सर्वं जननस्पतं स्था
यैपतत्प्रदं कृष्णा नोत्रशेषाद्यामंत्ररूपतत्वे चित्य ठेति ख्यातिः प्रथा प्रकृतिपुरुष योर्विवेकख्यातिस्तत्पैस्तस्या कृष्ण स्वरूपायै
तदृष्णा च तस्यै धूम्रायै तत्कृष्णायै १० अतिसौम्यायै अनुग्रहीत्र्यमूर्तये अतिरौद्रायै आवरकरूपायै जगतः प्रतिष्ठा उपादा

अतिसौम्यातिरौद्रायै नमस्तस्यै नमो नमः नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ११ या देवी स
र्वभूतेषु विष्णुमायेति शब्दिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः १२ या देवी सर्वभूते
षु चेतनेत्यभिधीयते नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः १३ या देवी सर्वभूतेषु बुद्धिरू
पेण संस्थिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः १४ या देवी सर्वभूतेषु निद्रारूपेण सं
स्थिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः १५ या देवी सर्वभूतेषु क्षुधारूपेण संस्थि
ता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः १६ या देवी सर्वभूतेषु छायारूपेण संस्थिता
नमस्त नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः १७

नरूपा तस्यै देव्यै क्रीडादिविधायिन्यै कृत्यै क्रियायै ११ विष्णुमायामूलाविद्याविमोहिका शब्दिता कथिता कायिकवाचिकमा
नसिकरूपं नमस्कारत्रयं स्वात्मनिवेदनार्थकम् इतिशब्दः स्वरूपनिर्देशार्थः १२ चेतना निर्विकल्पकं ज्ञानं १३ बुद्धिः सविक
ल्पकं ज्ञानं १४ निद्रा स्वापः सुषुप्तिः स्वरूपे वेशं च्यासांश ख्यं च १५ क्षुधा बुभुक्षा १६ छाया तापाभावः कांतिश्च १७

शक्तिःकार्योत्पादसामर्थ्यं १८ तृष्णाअनात्मीयात्मीयविधित्सा १९ क्षांतिस्तितिक्षापरापराधसहनंच २० जातिःब्राह्मणत्वादिःतम
च २१ लज्जास्वस्याकार्यात्पराङ्गीतिः २२ शांतिर्मनसोपशमनं विषयोपरतिः २३ श्रद्धागुरुशास्त्राभिहिते आस्तिकत्वं २४ कांतिःशो

यादेवीसर्वभूतेषुशक्तिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः १८ यादेवीस
र्वभूतेषुतृष्णारूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः १९ यादेवीसर्वभूते
षुक्षांतिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः २० यादेवीसर्वभूतेषुजा
तिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः २१ यादेवीसर्वभूतेषुलज्जारूपे
णसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः २२ यादेवीसर्वभूतेषुशांतिरूपेणसं
स्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः २३ यादेवीसर्वभूतेषुश्रद्धारूपेणसंस्थि
ता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः २४ यादेवीसर्वभूतेषुकांतिरूपेणसंस्थिता
नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः २५ यादेवीसर्वभूतेषुलक्ष्मीरूपेणसंस्थिता नम
स्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः २६ यादेवीसर्वभूतेषुवृत्तिरूपेणसंस्थिता नमस्तस्यै
नमस्तस्यैनमस्तस्यैनमोनमः २७

भा २५ लक्ष्मीःलौकिकीधनादिसंपत् चिदानंदरूपाऽलौकिकीच २६ वृत्तिर्जीविकाप्रवृत्तिश्चअंतःकरणव्यापारश्च २७ ॥

मा॰ स्मृतिरनुभूतविषयासंप्रमोषः २८ दयापरदुःखप्रजिहीर्षा २९ तुष्टिर्दैवादधिगते संतोषः ३० मातृरूपेण अकारादिमातृ
पु॰ टी॰ कारूपेणा तदधिष्ठातृदेवतारूपेण च ३१ भ्रांतिरन्यस्मिन्नन्याध्यासः ३२ याखिलेषु भूतेषु तदंतर्यामितया स्थिता सती इंद्रिया
२९४ णां ज्ञानक्रियात्मकानां भूतानां तद्विषयाणां शब्दादीनां च पंचानां वा स्थूलानां भूतानां व्योमादीनां अधिष्ठात्री प्रवृत्तौ निवृत्तौ
च स्वतंत्रा व्याप्त्यै व्यापनशालायै देव्यै क्रीडादिस्वभावायै ३३ या चितिः संवित्तद्रूपेण तत्तत्कृत्स्नं समग्रं जगद्व्याप्य क्रोडीकृत्य

या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः २८ या दे
वी सर्वभूतेषु दयारूपेण संस्थिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः २९ या देवी सर्व
भूतेषु तुष्टिरूपेण संस्थिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ३१ या देवी सर्वभूतेषु
मातृरूपेण संस्थिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ३२ इंद्रियाणामधिष्ठात्री
भूतानामखिलेषु या भूतेषु सततं तस्यै व्याप्तिदेव्यै नमो नमः ३३ या देवी सर्वभूतेषु भ्रांतिरू
पेण संस्थिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ३२॥ चितिरूपेण या कृत्स्नमेत
द्व्याप्य स्थिता जगत् नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ३४

स्थिता नीतिपुष्टी चापि केचन्नादर्शे अत्र त्रयोविंशतिश्लोकेषु विष्णुमायादिव्यतिरिक्तानामन्येषां पदानामनार्षत्वे यं
संग्रहः विष्णुमाया चेतना च बुद्धिर्निद्रा क्षुधा तथा छाया शक्तिस्तथा तृष्णा च क्षांतिर्जातिस्ततः परं लज्जा शांतिस्तथा श्रद्धा
कांतिर्लक्ष्मीस्ततः परं वृत्तिः स्मृतिर्दया चैव तुष्टिर्माता ततः परम् भ्रांतिर्व्याप्तिश्चितिश्चैव त्रयोविंशतिसंख्यकाः श्लोकाधिक

यथा सुरैर्वासवादिभिः पूर्वं भूता पूर्वं पूर्वकल्पेषु अभीष्टस्य संश्रयात् लाभाद्धेतोः स्तुता सुरेन्द्रेण दिनेशेन सूर्येण च सेविता साई
श्वरी स्तुतेश्च शुभस्य हेतुर्नोऽस्माकं शुभानि करोतु अभद्राण्यापदश्चाभिहंतु इत्यन्वयः ३५ तथा या सांप्रतं वर्तमानेऽपि उद्धता
उद्धर्षीये दैत्यास्तैस्तापितैर्बाधितैरस्माभिः सुरैरप्यतनकाल्पीयैर्नमस्यते या च नोऽस्माभिः स्मृता सती तत्क्षणमेव स्मृतिकाल
एव सर्वापदो नोऽस्माकं हंति नाशयति भक्त्या विनम्रा मूर्तयः शरीराणि येषां तैः ईशा ईश्वरा अत्रैकोकद्वये पूर्वसाम्प्रतशब्दाभ्यां

स्तुता सुरैः पूर्वमभीष्टसंश्रयात्तथा सुरेन्द्रेण दिनेश सेविता करोतु सा नः शुभहेतुरीश्वरी शु
भान्यभद्राण्यभिहंतु चापदः ३५ या सांप्रतं चोद्धतदैत्यतापितैरस्माभिरीशा च सुरैर्नमस्यते
या च स्मृता तत्क्षणमेव हंति नः सर्वापदो भक्तिविनम्रमूर्तिभिः ३६ एवं स्तवाभियुक्तानां देवा
नां तत्र पार्वती स्नातुमभ्याययौ तोये जाह्नव्या नृपनंदन ३७ साब्रवीत्तान् सुरान् सुभ्रूर्भवद्भिः
स्तूयतेऽत्र का शरीरकोशतश्चास्याः समुद्भूताब्रवीच्छिवा ३८ स्तोत्रं ममैतत् क्रियते शुंभदैत्यनि
राकृतैः देवैः समस्तैः समरे निशुंभेन पराजितैः ३९

देव्याः सदातनत्वं द्योत्यते देवानां चावर्तमानत्वं पुनः पुनर्नवीनतयेति बोध्यम् ३६ स्तवेऽभियुक्तानां समाहितानां तत्र देवोपस्थिते दे
शे जाह्नव्या गंगायास्तोये जले स्नातुमिव देवानामभिसंमुखमाययौ ३७ सुभ्रूरिति सर्वसौंदर्योपलक्षणं देवानां स्तानभ्यस्तसभि
स्तानमभिलक्ष्य भवद्भिः कात्र स्तूयत इत्यब्रवीत् तद्वचनसमकालमेवास्याः पार्वत्याः शरीरकोशतः शरीरमध्यात्समुद्भूता सत्त्वप्राधा
न्येन प्रादुर्भूता तत एव शिवा सुरवर्की अब्रवीत् ३८ किमब्रवीदिति तद्वचनमाह स्तोत्रमिति ३९

मा· शारीरस्य कोशान्मध्यान्निर्गता कौशिकीति गीयते पार्वत्याः कृष्णवर्णाया देहान्मूलशक्तिरेव गौरीत्वेन निष्क्रान्तेत्यर्थः तथा चो-
पु·टी क्तं तन्त्रे तामसे त्वं तत्रैव शाक्तमहाविद्या पराभिधा गौरीदेहात्समुद्भूता कौशिकीति तदाब्रवीत् वधाय दुष्टदैत्यानां तथा शुम्भनिशुम्भ-
२९५ योः नदीयाः यास्तु या सा देवप्रेष्ठ शरीरगाः गावस्तद्रूपयादिरूपः सामर्थ्यं क्वचिद्भुवि मम तामिर्निहत्य दैत्येन्द्रा हन्तव्या मे यथा
तथा संस्तुतास्मन्निताः सर्वा मदीयवपुषोऽखिलाः अहं निजं ग्रुषीय पश्चाद्दैत्यौ शुम्भनिशुम्भकाविति ४० विनिर्गतायां विविः स्त

शरीरकोशाद्यत्तस्याः पार्वत्या निःसृताम्बिका कौशिकीति समस्तेषु ततो लोकेषु गीयते ४० तस्यां
विनिर्गतायां तु कृष्णाभूत्सापि पार्वती कालिकेति समाख्याता हिमाचलकृताश्रया ४१ ततो-
म्बिकां परं रूपं बिभ्राणां सुमनोहरम् ददर्श चण्डो मुण्डश्च भृत्यौ शुम्भनिशुम्भयोः ४२ ताभ्यां शुम्भा-
य चाख्याता सातीव सुमनोहरा काप्यास्ते स्त्री महाराज भासयन्ती हिमाचलं ४३ नैव तादृक्
क्वचिद्रूपं दृष्टं केनचिदुत्तमं ज्ञायतां काप्यसौ देवी गृह्यतां चासुरेश्वर ४४ स्त्रीरत्नमतिचार्वङ्गी
द्योतयन्ती दिशस्त्विषा सा तु तिष्ठति दैत्येन्द्र तां भवान्द्रष्टुमर्हति ४५ यानि रत्नानि मणयो
गजाश्वादीनि वै प्रभो त्रैलोक्ये तु समस्तानि साम्प्रतं भान्ति ते गृहे ४६

तस्यां सा पार्वती कृष्णा नाम श्यामाख्याभूयासीत् अस्या गौरीत्वं नाममात्रेण कौशिकीहेतोर्कोतिवोध्यं आश्रयः स्थानं ४१
परम् उत्कृष्टं ४२ सेतितयोर्दृष्टस्त्रीरूपा काषीत्यख्याता ४३ ज्ञायतां विचार्यतां गृह्यतां स्वीक्रियतां ४४ तु हेत्वर्थे यस्मात्सा
स्त्रीरत्नमिति तिष्ठति अतस्तां भवानित्यादि ४५ ज्ञातो ज्जातीय श्रेष्ठं तद्रत्नमभिधीयते इत्युक्तानि जातिश्रेष्ठानि रत्नानि

295

एवं च समस्तानि रत्नानि तव गृहे तदियमपि त्वद्योग्यैवेत्यभिप्रायेण लब्धानां पृथग्गणनां विधत्ते ऐरावत इति ४७ वेधसो भवद्द्रु
ग्रदस्याप्यानीतं आश्चर्यमहीतं अद्भुतं वेधसा मनसा निर्मितत्वात् ततश्च ब्रह्माण्डान्तर्वर्तिसमग्ररत्नपात्रत्वं तव गृहस्यैव ४८ किं
जल्किनीं सदाम्लानत्वात्प्रशस्तकेसरयुक्तां तदभिधानां ४९ काञ्चनस्रावि स्वर्णस्रवणशीलं प्रजापतेर्दक्षस्य कश्यपस्य वा स्यं

ऐरावतः समानीतो गजरत्नं पुरन्दरात् पारिजाततरुश्चायं तथैवोच्चैःश्रवा हयः ४७ विमानं
हंससंयुक्तमेतत्तिष्ठति तेऽङ्गणे रत्नभूतमिहानीतं यदासीद्वेधसोऽद्भुतम् ४८ निधिरेष महा
पद्मः समानीतो धनेश्वरात् किंजल्किनीं ददौ चाब्धिर्मालामम्लानपंकजां ४९ छत्रं ते वारु
णं गेहे काञ्चनस्रावि तिष्ठति तथायं स्यंदनवरो यः पुरासीत्प्रजापतेः ५० मृत्योरुत्क्रान्तिदा
नाम शक्तिरीश त्वया हृता पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ५१ निशुंभस्याब्धिजा
ताश्च समस्ता रत्नजातयः वह्निरपि ददौ तुभ्यमग्निशौचे च वाससी ५२ एवं दैत्येन्द्र रत्ना
नि समस्तान्याहृतानि ते स्त्रीरत्नमेषा कल्याणी त्वया कस्मान्न गृह्यते ५३ ऋषिरु॰ निशम्ये
ति वचः शुंभः स तदा चण्डमुण्डयोः प्रेषयामास सुग्रीवं दूतं देव्या महासुरः ५४

दनं रथः तस्य वरत्वं शत्रुभिरजेयत्वात् ५० उत्क्रान्तिदा मरणदायिनी नाम शक्तिः ईश हे राजन् सलिलराजस्य वरुणस्य तव भ्रा
तुर्निशुंभस्य परिग्रहे गोचरे ५१ अब्धेर्जाता रत्नजातयश्च निशुंभस्य परिग्रहे वर्तन्ते इत्यर्थः अग्निरेव शौचं विशुद्धिकारणं ययोः ५२

मा० इति च इति चेति वक्तव्यस्य संदेशस्य निर्देशः यथा चाभ्येति तं लघु शीघ्रमेव ५५ अत्र निशम्येति श्लोकः शास्त्रोक्तरीत्याज्ञाज्ञ्य एव ५६
पु० टी० ततः संभाषरसकाशात् तत्र तस्मिन् शैलस्योद्देशे अत्र तस्यानेन श्रुतं कोमलं ५७ न केवलं दैत्यानामेवेश्वरो यावता त्रैलोक्य
२९९ स्यापीश्वरः परमत्वं इति परस्याभावात् त्वत्सकाशं तव समीपं ५८ परमेश्वरत्वमुपपादयंस्तत्संदेशमाह अव्याहता अत्र इति

इति चेति च वक्तव्या सा गत्वा वचनान्मम यथा चाभ्येति संप्रीत्या तथा कार्यं त्वया लघु ५५ निश
म्य दैत्यराजस्य सुग्रीवो नयकोविदः तथेति चोक्त्वा प्रययौ स्वल्पसैन्यसमावृतः ५६ स तत्र गत्वा
यत्रास्ते शैलोद्देशेऽतिशोभने तां च देवीं ततः प्राह श्लक्ष्णं मधुरया गिरा ५७ दूत उवाच देवि दैत्ये
श्वरः शुम्भस्त्रैलोक्ये परमेश्वरः दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः ५८ अव्याहताज्ञः सर्वा
सु यः सदा देवयोनिषु निर्जिताखिलदैत्यारिः स यदाह शृणुष्व तत् ५९ मम त्रैलोक्यमखिलं म
म देवा वशानुगाः यज्ञभागानहं सर्वानुपाश्नामि पृथक् पृथक् ६० त्रैलोक्ये वररत्नानि मम व
श्यान्यशेषतः तथैव गजरत्नं च हृतं देवेन्द्रवाहनम् ६१ क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः
उच्चैःश्रवससंज्ञं तत्प्रणिपत्य समर्पितम् ६२ ॥

हताज्ञायस्य देवानां योनिषु जातिरूपेषु गणेषु ५९ वशानुगा अधीना अत एव यज्ञभागाः पृथक् पृथगितीन्द्राद्युपकारभेदेन
स्थितान् ६० वश्यानि भोग्यानीत्यर्थः अशेषतः सर्वाणि हृतमस्माभिः स्वीकृतं ६१ समर्पितं उपस्थापितं उच्चैःश्रवसेति अका

रत्नत्वेन ख्यातानि रत्नभूतानि भूतानि संपन्नानि हे शोभने स्वभगे मय्येव ज्ञाति प्राप्तानीत्यर्थः ९३ स्त्रीरत्नं त्वं भूतां प्राप्तां रत्नभुजो र
त्नभोजिनः ९४ उरुविक्रमं महापौरुषं चेचले अपांगे नेत्रांते यस्याः ९५ मत्परिग्रहात् मदाश्रयात् समालोच्य सम्यग्विचार्य मत्परि
ग्रहतां मम भार्यात्वं ९६ गंभीरमंतःस्मितं मंदहासो यस्याः ९७ अंतःस्मितत्वेन सावहेलमुत्तरमाह सत्यमुक्तमिति अत्र संभवविषये

यानि चान्यानि देवेषु गन्धर्वेषूरगेषु च रत्नभूतानि भूतानि तानि मय्येव शोभने ९३ स्त्रीरत्न
भूतां त्वां देवि लोके मन्यामहे वयं सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयम् ९४ मां वा ममा
नुजं वापि निशुंभमुरुविक्रमम् भज त्वं चंचलापांगि रत्नभूतासि वै यतः ९५ परमैश्वर्यमतु-
लं प्राप्स्यसे मत्परिग्रहात् एतद्बुद्ध्या समालोच्य मत्परिग्रहतां व्रज ९६ ऋषिरुवाच इत्युक्ता
सा तदा देवी गंभीरांतःस्मिता जगौ दुर्गा भगवती भद्रा ययेदं धार्यते जगत् ९७ देव्युवाच सत्य
मुक्तं त्वया नात्र मिथ्या तत्क्रियते कथं श्रूयताम् अल्पबुद्धित्वात् प्रतिज्ञा या कृता पुरा ९९
किंचित्त्वयोदितं त्रैलोक्याधिपतिः शुंभो निशुंभश्चापि तादृशः ९८ किं त्वत्र यत्प्रतिज्ञातं मिथ्या

त्रैलोक्ये परमैश्वर्यमित्यादि तत्त्वया सत्यं चोक्तं किंचिन्न त्वया मिथ्या असत्यं नोदितं न कथितं एतदेवोत्तरार्थेनाह त्रैलोक्याधिप-
तिरिति ९८ अत्र तत्परिग्रहे अल्पबुद्धित्वादिति दैत्यविषये तथा च प्रतिज्ञायाः स्वस्मात् हानौ महान्दोषः पापं च परपुरुषपरिग्रहे इ

तिपर्मस्यावेदनादल्पबुद्धित्वं दैत्यानाम् ९९

मा॰ मां जयति अभिभवति युद्धव्यतिरिक्तेनैवकेनापिप्रकारेणयो मम दर्पं सबलत्वाभिमानं व्यपोहति निराकरोति प्रतिबलोधिक
पु॰टी॰ बलः १० अत्रास्मिन्देशे पाणिग्रहणव्यतिरेकेण मम गमनमनर्हमित्यर्थः ११ अवलिप्ता अहंकृता मा निषेधे अग्रे संमुखे १२
२९७ यत्र तद्भृत्यानामग्रे वस्थानेमशक्यं तत्र तयोरग्रेनुचिततरं तवेत्याह अन्येषामपीति किं पुनर्वक्तव्यं त्वं स्त्री तत्राप्येकिका सहायहीं

यो मां जयति संग्रामे यो मे दर्पं व्यपोहति यो मे प्रतिबलो लोके स मे भर्ता भविष्यति १० तदा
गच्छतु शुंभोत्र निशुंभो वा महासुरः मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु ११ दूत
उवाच अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे शुंभनिशुंभयोः १२
अन्येषामपि दैत्यानां सर्वे देवा न वै युधि तिष्ठंति संमुखे देवि किं पुनः स्त्री त्वमेकिका १३ इन्द्राद्याः
सकला देवास्तस्थुर्येषां न संयुगे शुंभादीनां कथं तेषां स्त्री प्रयास्यसि संमुखं १४ सा त्वं गच्छ
मयैवोक्ता पार्श्वं शुंभनिशुंभयोः केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि १५ देव्युवाच एव
मेतद्बली शुंभो निशुंभश्चातिवीर्यवान् किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा १६॥

ना १३ एतदेव पुनराह इन्द्राद्या इति संयुगे रणे १४ मयैव हितवादिना अन्येषां तु दैत्यानामागमने केशाकर्षणेन निर्धूतं नि
रस्तं गौरवं मानो यया सा तादृशी मा गमिष्यसीति हितवादित्वं हृतस्य १५ एवमेतदिति तदुक्तमभ्युपगमे मेमया अनालोचिता अ

सप्तशती टी॰
२९७

297

आहतोमद्भक्तोसम्प्रदः आचक्ष्वकथय युक्तंयोग्यं ११ इतिमार्कण्डेयपुराणेसप्तशतीव्याख्यानेपञ्चनवतितमश्रादितोध्यायः देसो
दयस्थितिमनंतमनादिमध्यंयद्यंगलसद्दिगलकेसरसौरभाढ्यं यस्यानिवासमनघंमदंतोसमीक्षेतस्मात्तुतेष्यिनिवसेः किरतान्न

सत्वंगच्छमयोक्तंतेयदेतत्सर्वमादृतः तदाचक्ष्वासुरेन्द्रायसचयुक्तंकरोतुतत् ११ इतिश्रीमार्कंडे
यपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येदूतसंवादोनामपंचमोध्यायः ९८ ऋषिरुवाच इत्या
कर्ण्यवचोदेव्याःसदूतोमर्षपूरितः समाचष्टसमागम्यदैत्यराजायविस्तरात् १ तस्यदूतस्यतद्वाक्य
माकर्ण्यासुरराट्ततः सक्रोधःप्राहदैत्यानामधिपंधूम्रलोचनं २ हेधूम्रलोचनाशुत्वंस्वसैन्यपरि
वारितः तामानयबलाद्दुष्टांकेशाकर्षणविह्वलाम् ३ तत्परित्राणदःकश्चिद्यदिवोत्तिष्ठते
परः सहंतव्योमरोवापियक्षोगन्धर्वएववा ४ ऋषिरुवाच तेनाज्ञप्तस्ततःशीघ्रंसदैत्योधूम्रलो
चनः वृतःषष्ट्यासहस्राणामसुराणांद्रुतंययौ ५ सदृष्ट्वातांततोदेवींतुहिनाचलसंस्थिताम्
जगादोच्चैःप्रयाहीतिपार्श्वंशुंभनिशुंभयोः ६ नचेत्प्रीत्याद्यभवतीमद्भर्तारमुपैष्यति ततोबलान्न
याम्येषकेशाकर्षणविह्वलाम्भिभर्तृसमीपंप्रापयिष्याम् ७॥

मार्षा अमर्षःकोपः समाचष्टअकथयत् १ २ ३ तस्याःपरित्राणदोरक्षाकरः ४ द्रुतंत्वरितं ५ तुहिनाचलेहिमाचलेसंस्थितांसम्य
क्स्थितांतयास्थितां ६ अद्यवर्तमाने मद्भर्तारंममस्वामिनं यद्यहंबलात् हठेननयामिभर्तृसमीपंप्रापयिष्यामि ७॥

६

मा॰ तावत्त्वंभद्रेदेवीतंप्रत्याह दैत्येश्वरेणेति प्रहितःप्रेषितः बलवान्सामर्थ्ययुक्तः बलेनसैन्येनसंवृतः ८ तमसुरं ९ । १० धुताःकंपि
पु॰टी॰ ताःसटाःकेसरायेन सुभैरवमतिभीषणं पपात विवेशस्वीयंवाहनं ११ करयोःप्रहारेण घातेन आस्येनमुखेन अधरेण
२९८

देव्युवाच दैत्येश्वरेणप्रहितोबलवान्बलसंवृतः बलान्नयसिमामेवंततस्तेकिंकरोम्यहम् ८
ऋषिरुवाच इत्युक्तःसोभ्यधावत्तामसुरोधूम्रलोचनः हुंकारेणैवतंभस्मसाचकाराम्बिका
ततः ९ अथक्रुद्धंमहासैन्यमसुराणांतथाम्बिका ववर्षसायकैस्तीक्ष्णैस्तथाशक्तिपरश्वधैः
ततोधुतसटःकोपात्कृत्वानादंसुभैरवं पपातासुरसेनायांसिंहोदेव्याःस्ववाहनं ११ कांश्चित्क
रप्रहारेणदैत्यानास्येनचापरान् आक्रम्यचाधरेणान्यान्सजघानमहासुरान् १२ केषांचित्पाट
यामासनखैःकोष्ठानिकेसरी तथातलप्रहारेणशिरांसिकृतवान्पृथक् १३ विच्छिन्नबाहुशि
रसःकृतास्तेनतथापरे पपौचरुधिरंकोष्ठादन्येषांधुतकेसरः १४ क्षणेनतद्बलंसर्वंक्षयंनी
तंमहात्मना तेनकेसरिणादेव्यावाहनेनातिकोपिना १५ ॥

298

अधःकायेनचरणादिना अधरेणोष्ठेनच १२ पाटयामासविच्छेदकोष्ठानि उदराणि तलस्यविस्तृतांगुलिपाणेःप्रहारे दुर्गा
णघातेन १३ रुधिरंरक्तं १४ क्षयंविनाशंनीतंप्रापितंमहात्मना महाधैर्येणमहाप्रयत्नेनवाकेसरिणासिंहेनाअतिकोपिना अतिक्रोध
२९८

क्षयितं कृत्स्नं क्षपितमिति पाठांतरे नाशितमित्यर्थः कृत्स्नं सर्वं ९ चुकोप प्रचुकोप क्रोधवशात्प्रस्फुरिताधरोऽधरोष्ठो यस्य तौ पूर्व
श्लोको १० बलैः सैन्यैः गच्छतं प्रयातं लोट् लघुशीघ्रं ११ यदि वा युद्धे प्रयियुद्धे तया सह प्रसक्ते केशाकर्षणानयनादौ संश
यः तदाशेषायुधैः सर्वैरसुरैः सा विशेषेण हन्यतां मार्यतामित्यर्थः १२ १३ इति नवनवतितमोऽध्यायः वागीश्वरीकविविरास्यसरोरु

श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनं बलं च क्षयितं कृत्स्नं देवीकेसरिणा ततः ९ चुकोप दैत्याधि
पतिः शुंभः प्रस्फुरिताधरः आज्ञापयामास च तौ चंडमुण्डौ महासुरौ १० हे चंड हे मुण्ड बलैर्बहु
भिः परिवारितौ गच्छतं तत्र गत्वा च सा समानीयतां लघु ११ केशेष्वाकृष्य बद्ध्वा वा यदि वां स
शयो युधि तदाशेषायुधैः सर्वैरसुरैर्विनिहन्यतां १२ तस्यां हतायां दुष्टायां सिंहे च विनिपाति
ते शीघ्रमागम्यतां बद्ध्वा गृहीत्वा तामथाम्बिकां १३ इति मार्कंडेयपुराणे सावर्णिके मन्वं
तरे देवीमाहात्म्ये धूम्रलोचनवधो नाम षष्ठोऽध्यायः ६ ऋषिरुवाच आज्ञप्तास्ते ततो दैत्याश्चंड
मुंडपुरोगमाः चतुरंगबलोपेता ययुरभ्युद्यतायुधाः १ ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थितां
सिंहस्योपरि शैलेन्द्रशृंगे महति कांचने २ ॥

हस्याहार्दान्धकारपरिहारमहाविमर्शा संसारसागरसमुद्धरणैकसारा चण्डीपरिस्फुरतु मद्धृदि भद्रदात्री चंडपुरोगमः पुरःसरः अभ्यु
द्यतानि सज्जान्यायुधानि येषां १ ते दैत्याः ईषद्धासां मंदहासां शैलेंद्रस्य शृंगे हिमाचलसानुनि सिंहस्योपरि स्थितां सिंहारूढाम् कां

मा॰ ते चंडादयः समादातुं गृहीतुमुद्योगं उद्यता उत्साहवंतः आकृष्टान्याकृष्टानि धनूंषि आकृष्टाः कोशेभ्यो निष्कासिता असीन् धारयंतीति
पु॰टी॰ तथा तेषां तद्ग्रहणोद्यतानां वक्षरणार्थं समीपगाः ३ कोपात् प्रतिबिम्बान्मषीवर्णं मेलिकावत्कृष्णं ४ ललाटमेव फलकंप
२५५ ट्टं करालं भीषणं वदनं यस्याः असिपाशौ विद्येते यस्याः ५ विचित्रं नानावर्णं खट्वांगं कंकालं पर्यंकपादं वा तद्धारिणी नरमालाः नरमुंडावली
लक्षणया तन्मुंडानां वा माला विभूषणानि यस्याः द्वीपिनो व्याघ्रस्य चर्म परीधानमधोवासो यस्याः शुष्कमांसं यस्याः अत एवाति

ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः आकृष्टचापासिधरास्तथान्ये तत्समीपगाः ३ ततः
कोपं चकारोग्रमंबिका तानरीन्प्रति कोपेन चास्या वदनं मषीवर्णमभूत्तदा ४ भ्रुकुटीकुटि
लात्तस्या ललाटफलकाद्द्रुतं काली करालवदना विनिष्क्रांतासिपाशिनी ५ विचित्रखट्वां
गधरा नरमालाविभूषणा द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा ६ अतिविस्तारवदना
जिह्वाललनभीषणा निमग्नारक्तनयना नादापूरितदिङ्मुखा ७ सा वेगेनाभिपतिता घातयं
ती महासुरान् सैन्ये तत्र सुरारीणामभक्षयत तद्बलम् ८ पार्ष्णिग्राहांकुशग्राहियोधघंटास
मन्वितान् समादायैकहस्तेन मुखे चिक्षेप वारणान् ९ ॥

भैरवा अतिभयानका ६ अतिविस्तारमतिशयेन विकासितं वदनं यस्याः मुखांतरे जिह्वाया ललनेन लोडनेन भीषणा निमग्ना
नि कोटरप्रविष्टानि नयनानि यस्याः नादेन समंतात्पूरितानि दिङ्मुखानि यया ७ ८ सैन्ये भक्षणप्रकारं तस्याः आह पार्ष्णिग्राहः
पृष्ठरक्षकः वामदक्षिणभागरक्षको वा अंकुशग्राहो महामात्रः योधा गजवाराः वारणान् गजान् ९ ॥

299

योधमिति नराता वक्त्रचर्वनं तुरगैः सह योधान् अश्ववारान् दशनैर्दंतैश्चर्वयंती चर्वयंती अतिभैरवं यथा स्यात्तथा भक्षयदिति शेषः ९
अपोथयत विक्षिपेष ११ मथितानि उन्मोदितानि १२ १३ १४ चंडस्तद्बलं वीक्ष्य इत्यन्वयः दृष्ट्वा १५ क्षिप्तैः प्रसृतैः १६ निविशमानानि

तथैव योधं तुरगै रथं सारथिना सह निक्षिप्य वक्त्रे दशनैश्चर्वयंत्यतिभैरवम् १० एकं जग्राह के
शेषु ग्रीवायामथ चापरं पादेनाक्रम्य चैवान्यानुरसान्यानपोथयत ११ तैर्मुक्तानि च शस्त्राणि
महास्त्राणि महासुरैः मुखेन जग्राह रुषा दशनैर्मथितान्यपि १२ बलिनां तद्बलं सर्वमसुरा
णां दुरात्मनां ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तदा १३ असिना निहताः केचित्केचित्ख
ट्वांगताडिताः जग्मुर्विनाशमसुरा दंताग्राभिहतास्तथा १४ क्षणेन तद्बलं सर्वमसुराणां नि
पातितं दृष्ट्वा चंडोभिदुद्राव तां कालीमतिभीषणां १५ शरवर्षैर्महाभीमैर्भीमाक्षीं तां महा
सुरः छादयामास चक्रैश्च मुंडः क्षिप्तैः सहस्रशः १६ तानि चक्राण्यनेकानि विशमानानि
तन्मुखम् बभुर्यथार्कबिंबानि सुबहूनि घनोदरं १७ ततो जहासातिरुषा भीमा भैरवनादि
नी काली करालवक्त्रांतर्दुर्दर्शदशनोज्वला १८

प्रविशंति अत्र तान्यपि कंतलोपो वार्षः घनोदरं मेघमध्यं प्रविशंत्यर्कबिंबानीव बभुः १७ भीमा भीमं वा क्रियाविशेषणं वक्त्रांतर्मुखां
तरे विकरत्वाद्दुःखेन द्रष्टुं शक्या दशना तैरुज्ज्वला तेजोमयीत्यर्थः १८

मा॰ उत्थाप्य उद्यम्य उत्थायेति केचित्पठंति महासिं महांतं खड्गं हृमिति क्रोधवाचकमव्ययं १९ अत्र श्लोकः छिन्ने शिरसीति मंत्र निपम
पु॰टी॰ रीत्योपेसः २० तां कालीं मुण्डस्य शिरो न छिन्नं किंतु खड्गाग्रप्रहारमात्रेण मृतः २१ २२ मुंडं सदेहं यस्मान्मलिकानिष्क्रांता तां च
३०

उत्थाप्य च महासिं हि देवी चंडमधावत गृहीत्वा चास्य केशेषु शिरस्तेनासिनाछिनत् १९ छि
न्ने शिरसि दैत्येंद्र चक्रे नादं सुभैरवं तेन नादेन महता त्रासितं भुवनत्रयं २० अथ मुंडोभ्यधावत्तां दृ
ष्ट्वा चंडं निपातितं तमप्यपातयद्भूमौ सा खड्गाभिहतं रुषा २१ हतशेषं ततः सैन्यं दृष्ट्वा चंडं
निपातितं मुंडं च सुमहावीर्यं दिशो भेजे भयातुरं २२ शिरश्चंडस्य काली च गृहीत्वा मुंडमे
व च प्राह प्रचंडाट्टहासमिश्रमभ्येत्य चंडिकां २३ मया तवात्रोपहृतौ चंडमुंडौ महापशू युद्धय
ज्ञे स्वयं शुंभं निशुंभं च हनिष्यसि २४ ऋषिरुवाच तावानीतौ ततो दृष्ट्वा चंडमुंडौ महासुरौ उ
वाच कालीं कल्याणी ललितं चंडिका वचः २५ यस्माच्चंडं च मुंडं च गृहीत्वा त्वमुपागता चामुंडे
ति ततो लोके ख्याता देवि भविष्यसि २६ इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहा॰
त्म्ये चंडमुंडवधो नाम सप्तमोध्यायः ७०

२८ श्लोकाः सप्ततमोध्यायः ७०

एडिकां प्राह २३ उपहृतौ प्रापितौ २४ ललितं सविलासं पादितो विकपृक्तमित्यर्थः २५ दृष्ट्वोद्धरादित्वाच्चामुंडा पदस्य वर्णविकारः

300

300

वागीश्वरी सकलवर्णवपुः परेशी ब्राह्म्यादिशक्तिनिवहैः परिषेवितांघ्रिः अष्टच्छदे सरसिजे विहिता सदा सा भूयादनंतसुखदा प
द्मा तिरंची बहुलेषु अनंतेषु क्षपितेषु क्षतत्तयेषु क्षपितेष्विति पाठांतरं १ चंडादीनां वधोत्पन्नेन कोपेन स्वाधीनचेताः दैत्या
नां उद्योगं सर्वसैन्यानामादिदेश २ अद्य वर्तमाने उदायुधा नाम दैत्याः तथा कंबूनां तत्संज्ञानां ३ कोटिवीर्याणि नामकानि कुलानि
णा

ऋषिरुवाच चंडे च निहते दैत्ये मुंडे च विनिपातिते बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः १ ततः
कोपपराधीनचेताः सुंभः प्रतापवान् उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह २ अद्य सर्वबलैर्दै
त्याः षडशीतिरुदायुधाः कंबूनां चतुरशीतिर्निर्यांतु स्वबलैर्वृताः ३ कोटिवीर्याणि पंचाशद
सुराणां कुलानि वै शतं कुलानि धौम्राणां निर्गच्छंतु ममाज्ञया ४ कालका दौर्हृदा मौर्याः का
लकेयास्तथापरे युद्धाय सज्जा निर्यांतु आज्ञया त्वरिता मम ५ इत्याज्ञाप्यासुरपतिः सुंभो
भैरवशासनः निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः ६ आयांतं चंडिका दृष्ट्वा तत्सैन्यमतिभी
षणम् ज्यास्वनैः पूरयामास धरणीगगनांतरं ७ ततः सिंहो महानादमतीव कृतवान्नृप घं
टास्वनेन तं नादमम्बिका चोपबृंहयत् ८

समूहानि कोटिवीर्याणीति पाठे तन्नामकानि धौम्राणां धूम्रवंश्यानां ४ कालकादयश्चत्वारस्तत्संज्ञकाः सज्जाः सन्नद्धाः ५ भैर
वशासन उग्राज्ञः ६ ७ उपबृंहयत् अपाबृंहयत् अडागमाभाव आर्षः ८ ॥

मा· धनुरादीनां भीषणैर्निनादैः कालीजिग्ये सर्वोत्कर्षेणावर्तत धनुरादिशब्दैः कालीशब्द उपलक्षितइत्यर्थः यतोनादापूरितदिङ्मु
पु·टी· खा विस्तारितानना च कर्मणिलिट् तदाह ९ उपश्रुत्य समाकर्ण्य १० भवाय संपदे एतस्मिन्निति देवदानवैः सह संयुगकाले ॥
३०१ ब्रह्मादीनां शक्तयः स्वाभिन्नानि सामर्थ्यानि शक्तिशक्तिमतोरैकात्म्यात् विष्णुशब्देन वराहनृसिंहावपि तदैते तद्रूपैर्ब्रह्मादि
रूपैः १२ यत्तदेवस्यरूपमस्ति यस्येति तस्यदेवस्य शक्तिः तद्वत्तस्यैव १३ यत्तदेवविभजते हंसयुक्तेति हंसयुक्तस्यविमानस्या

धनुर्ज्यासिंहघण्टानां नादापूरितदिङ्मुखा निनादैर्भीषणैः काली जिग्ये विस्तारितानना ९
तंनिनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशं देवीसिंहस्तथाकाली सरोषैः परिवारिता १० एतस्मि
न्नन्तरे भूप विनाशाय सुरद्विषां भवायामरसिंहानामतिवीर्यबलान्विताः ११ ब्रह्मेशगुहवि
ष्णूनां तथेन्द्रस्य च शक्तयः शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः १२ यस्य देवस्य यद्रूपं यथा
भूषणवाहनं तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाययौ १३ हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः
आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते माहेश्वरी वृषारूढा त्रिशूलवरधारिणी महाहि
वलया प्राप्ताचन्द्ररेखाविभूषणा १५ कौमारी शक्तिहस्ता च मयूरवरवाहना योद्धुमभ्याययौ
ग्रे उच्चैः स्थाने स्थिता इयमवर्गाधिष्ठात्री महासृष्टिस्वभावा ब्रह्मा ॥ दैत्यानम्बिका गुहरूपिणी १६ ॥
णी आगमोक्तस्वरूपः १४ महाहीवासुकिरनन्तश्च तौ वलये कटके यस्याः इयं कवर्गाधिष्ठात्री मातृका १५ गुहस्य कुमारस्य यद्रू
पं षडूदनत्वं कुक्कुटघण्टाहस्तादिसन्निवेशो विद्यते यस्याः इयं चवर्गाधिष्ठात्री मातृका १६ ॥

३०१

30/

शार्ङ्गं धनुः खड्गोऽसिः तेन खड्गहस्ता भ्रमस्याः उपायो अभ्युपाययौ इयं टवर्गाधिष्ठात्री १७ यज्ञांगमूर्तिर्वराहो यज्ञवाराहं अतुलमनु
पमं रूपं हरेर्विष्णोः संबन्धि वाराहीं तनुं बिभ्रती इयं तवर्गाधिष्ठात्री १८ नरसिंहस्येयं नारसिंही सटा नाम केसराणामाक्षेपेण समन्तात्प्र
क्षिप्ता सती तेन क्षिप्ता पर्यस्ता नक्षत्राणां संहतिः समूहो यया तस्य अद्भुतोक्तिः इयं पवर्गाधिष्ठात्री १९ इंद्रस्येयमैन्द्री इयं यवर्गाधिष्ठात्री २०
देवशक्तीः प्रति चंडिकाया ईशानायाः सर्वाधिष्ठानायाः परायाः संविदो वचनं हन्यंतामिति २१ अत्युग्रा रौद्रस्वभावा चंडिकाया मुख्या

तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता शंखचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ १७ यज्ञवारा
हमतुलं रूपं या बिभ्रतो हरेः शक्तिः साप्याययौ वाराहीं बिभ्रती तनुम् १८ नारसिंही नृसिंहस्य बिभ्र
ती सदृशं वपुः प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः १९ वज्रहस्ता तथैवैन्द्री गजराजोपरिस्थिता
प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा २० ततः परिवृतस्ताभिरीशानो देवशक्तिभिः हन्यंतामसु
राः शीघ्रं मम प्रीत्याह चंडिका २१ ततो देवीशरीरात्तु विनिष्क्रांतातिभीषणा चंडिकाशक्ति
रत्युग्रा शिवाशतनिनादिनी २२ सा चाह धूम्रजटिलमीशानमपराजिता दूत त्वं गच्छ भगवन् पार्श्वं
शुंभनिशुंभयोः २३ ॥

शक्तिरपराजिताभिधा इयं शवर्गाधिष्ठात्री केचित्तु पैंगाय वर्गाधिष्ठात्र्याः स्थाने चामुंडां तदधिष्ठात्रीमाहुः शिवाः शृगालाः तद्वच्छ
तवन्निनादि शीलं यस्याः २२ सा च सर्वाधिष्ठात्री चंडिका धूम्रं नीललोहितं जटिलं जटायुक्तं ईशानं अपरैरजिता आह इति पदं स
र्वत्र अपराजितायाः अनेन महेश्वरं परोक्षार्थाचिंत्या हे दूत त्वं गच्छ पार्श्वं शुंभनिशुंभयोः २३

मा॰ येचान्येदानवाःयुद्धायतत्रसंग्रामस्थलेनिकटेसमागतास्तांश्चब्रूहीत्यन्वयः २४ तत्संदेशमाह त्रैलोक्यमिति प्रयातगच्छत २५ बल
पु॰टी॰ स्यावलेपाद्गर्वात् मच्छिवाममसंबंधिन्यःसृगालाः अनेनशिवादूत्याःशिवदूत्याःस्वसहचरीगणप्रेरितोवाहव्यः वोयुष्मा
३०२ कंपिशितेनमांसेनतृप्यंतुप्रीणंतु २६ एवंमहादेवंशिवंदूतत्वेनप्रेषयंत्याश्चंडिकायाअत्युत्कर्षंद्योतयन्निगमलोकप्रसिद्धंनामनि
र्वक्ति यतइति दूतस्यभावोदौत्यंदूत्यंतद्भावकर्मणोरित्यमत्र स्वयंस्वतंत्रोपिशिवःपरमानंदघनोपिनियुक्तःप्रशासितः ततो

शुंभोनिशुंभश्चैवदानवावतिगर्वितौ येचान्येदानवास्तत्रयुद्धायसमुपस्थिताः २४ त्रैलोक्यमि
न्द्रोलभतांदेवाःसंतुहविर्भुजः यूयंप्रयातपातालंयदिजीवितुमिच्छथ २५ बलावलेपादथचेद्भ
वंतोयुद्धकांक्षिणः तदागच्छततृप्यंतुमच्छिवाःपिशितेनवः २६ यतोनियुक्तोदौत्येनतया
देव्याशिवःस्वयं शिवदूतीतिलोकेस्मिंस्ततःसाख्यातिमागता २७ तेपिश्रुत्वावचोदेव्याःश
र्वाख्यातंमहासुराः अमर्षापूरिताजग्मुर्यत्रकात्यायनीस्थिता २८ ततःप्रथममेवाग्रेशर
शक्त्यृष्टिवृष्टिभिः ववर्षुरुद्धतामर्षास्तांदेवीममरारयः २९ साचतान्प्रहितान्बाणान्शूलशक्ति
परश्वधान् चिच्छेदलीलयाध्मातधनुर्मुक्तैर्महेषुभिः ३० ॥

देतोःख्यातिंप्रसिद्धिंप्रथांआगतासंप्राप्ता २७ तेपिशुंभप्रधानादैत्याःअमर्षेणासहनयापूरिताकात्यायनीमूलशक्तिर्महालक्ष्मीः
चंडिका २८ अग्रेसेनामुखे उद्धत उत्कटोमर्षोयेषांयद्वामनसोत्कटत्वमनेनसूचितं २९ तैर्दैत्यैःप्रहितान्प्रहितान्लीलयाअना
यासेनहेलयावा आध्मातंसमाकृष्टंयद्धनुस्तेनमुक्तैर्महेषुभिर्महाबाणैः ३० ॥

सर्वेषधानाम्पिशक्त्याशुद्धप्रवृत्तिमालोक्य तद्देशविभूतीनांमत्स्यानांमिवमातृकाणांयुद्धप्रवृत्तिमाह तस्याइति तस्यामहासुरस्यान्याः
तस्थेतिभगवतीवत् शूलपातः शूलेनाघातः विदारितान् उद्धोरितान् पोथितान् निष्पिष्टान् तदानन्तसमये ३१ आक्षेपः प्रासेकः
तेनवीर्यान्नष्टबलान् हतौजसोनष्टसामर्थ्यान् येनयेनरणोद्देशेनयावतिस्म अधावत् तेनतेनवर्त्मना ३२ अतिकोपनेतिसर्वं

तस्यान्यांश्चततः कालीशूलपातविदारितान् खट्वांगपोथितांश्चारीन्कुर्वतीव्यचरत्तदा ३१
कमंडलुजलाक्षेपहतवीर्यान्हतौजसः ब्रह्माणीचाकरोच्छत्रून्येनयेनस्मधावति ३२ माहे
श्वरीत्रिशूलेनतथाचक्रेणवैष्णवी दैत्याञ्जघानकौमारीतथाशक्त्यातिकोपना ३३ ऐन्द्री

पूं

कुलिशपातेनशतशोदैत्यदानवाः पेतुर्विदारिताःपृथ्व्यांरुधिरौघप्रवर्षिणः ३४ तुण्ड
प्रहारविध्वस्तादंष्ट्राग्रक्षतवक्षसः वराहमूर्त्यान्यपतंश्चक्रेणचविदारिताः ३५ नखैर्विदा
रितांश्चान्यान्भक्षयंतीमहासुरान् नारसिंहीचचाराजौनादापूरितदिग्म्बरा ३६

त्रयोजयं ३३ कुलिशंवज्रंतस्यपातेनप्रहारेण रुधिरौघंरक्तप्रवाहं प्रकर्षेणावर्षतीति ३४ तुण्डंघोणातस्यप्रहारेणविध्वस्ता
ध्वस्ताः दंष्ट्राया अग्रेण दारणेनक्षतंवक्षोयेषांतेअसुरान्यपतन् वराहस्यमूर्त्याअनेनसर्वासांमातृकाशक्तीनांतत्तद्दे
वसाहचर्यंद्योतितं शक्तिशक्तिमतोरभेदात्सर्वतः प्रभयेवेतिबोध्यम् चक्रेणविदारितानेतदित्यन्वयः ३५ आजौयुद्धे ३६

मा॰ चंडैरत्युत्कटक्रूरात्युच्चहासैरट्टहासैः शिवदूत्याचंडिकायाभिदूषिताः हुंकृतेनेन बलवीर्यतेजसा परिवर्जिताः चखाद स्वभक्ष तदा पतनस
पु॰टी॰ मकालमेव ३७ मातृगणं प्रपिष्टात्युक्तं विविधैर्नानाप्रकारैरभ्युपायैर्युद्धविधानैः देवारीणां दैत्यानां सैनिकाः सेनायां सम
३०२ वेताः ३८ पलायने अपक्रमे परान्सक्तान् ३९ तस्य रक्तबीजाभिधानं निर्वक्ति रक्तबिंदुरिति समुत्पतति उत्पद्यते तेसमूर्ववत

303

चंडाट्टहासैरसुराः शिवदूत्यभिदूषिताः पेतुः पृथिव्यां पतितांस्तांश्चखादाथ सा तदा ३७
इति मातृगणं क्रुद्धं मर्दद्दैत्यान्मातृगणार्दितान् योद्धुमभ्याययौ क्रुद्धोयंतं महासुरान् दृष्ट्वा
भ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ३८ पलायनपरान्दृष्ट्वा दैत्यान्मातृगणार्दितान् योद्धु
मभ्याययौ क्रुद्धो रक्तबीजो महासुरः ३९ रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः समुत्पतति
मेदिन्यां तत्प्रमाणो महासुरः ४० युयुधे स गदापाणिरिंद्रशक्त्या महासुरः ततश्चैन्द्री स्ववज्रे
ण रक्तबीजमताडयत् ४१ कुलिशेनाहतस्याशु बहु सुस्राव शोणितं समुत्तस्थुस्ततो योधा
स्तद्रूपास्तत्पराक्रमाः ४२ यावंतः पतितास्तस्य शरीराद्रक्तबिन्दवः तावंतः पुरुषा जाता
॥ तद्रूपबलविक्रमाः ४३ ॥

बीजस्य प्रमाणं देहबलोत्साहादीनां सादृश्यं
यस्य सः ४० शक्त्या उपलक्षितः ४१ योधा योद्धारः ४२ यावंतो यत्संख्याकाः ४३ ॥

समंस ४४ ववाह प्रोवाह प्रसस्राव संप्रसारणाभावश्चार्षः वहिरंगमाविति यातोऽपूर्वे वेत्यन्येगतोरक्तात् ४५ ४६ रुधिरस्य स्रावे
णप्रस्रावेणसंभवो विद्यते येषामित्यस्रूतः ४७ श्रतात्यादितिशेषः ४८ सर्वामातृकाः अहनत् लुग्विकरणलोपाभावश्चार्षः स्वादे

तेचापियुयुधुस्तत्रपुरुषारक्तसंभवाः समंमातृभिरत्युग्रेशस्त्रपातातिभीषणं ४४ पुनश्चवज्रपाते
नक्षतमस्यशिरोयदा ववाहरक्तंपुरुषास्ततोजाताःसहस्रशः ४५ वैष्णवीसमरेचैनंचक्रेणाभिज
घानह गदयाताडयामासचैन्द्रीतमसुरेश्वरं ४६ वैष्णवीचक्रभिन्नस्यरुधिरस्रावसंभवैः सहस्रशो
जगद्व्याप्तंतत्प्रमाणैर्महासुरैः ४७ शक्त्याजघानकौमारीवाराहीचतथासिना माहेश्वरीत्रिशू
लेनरक्तवीजंमहासुरं ४८ सचापिगदयादैत्यःसर्वाएवाहनत्पृथक् मातृःकोपसमाविष्टो
रक्तवीजोमहासुरः ४९ तस्याहतस्यवहुधाशक्तिशूलादिभिर्भुवि पपातयोवैरक्तौघस्ते
नासंशतशोसुराः तैश्चासुरासृक्संभूतैरसुरैःसकलंजगत् व्याप्तमासीत्ततोदेवाभय
माजग्मुरुत्तमम् ५१ तान्विषण्णान्सुरान्दृष्ट्वाचंडिकाप्राहसत्वरा उवाचकालींचामुण्डे
विस्तीर्णंवदनंकुरु ५२

वीहतिगणत्वादन् ४९ ५० असरस्य रक्तवीजस्यासृजो रक्तात्संभूतैरुत्पन्नैः उत्तमं भयं विजयनैराश्यप्रदम् ५१ विषण्णान्सभया

मा॰
पु॰टी॰
३०४

वसादान् चंडिकां त्वरया संभ्रमेणोक्तवान्स्तद्वाक्यमाह तत्कालोचितं मा विषीदतेत्यादिवचनं पाठांतरेमाह सतु अट्टहासं चकार का
ली सर्वदैत्यसंहारविधायिनी त्वं गाथिष्ठांची उवाच विस्तीर्णं प्रतिदीर्घं विकासितं ५२ रक्तबिंदून् भूसंसर्गेण महासुरानेव मच्छस्त्रपाते
न संभूतानुत्पन्नान् अतो बीजावस्थितान् रक्तबिंदून् प्रतीच्छ प्रतिगृहाण वेगेनेति तावत्समयमेव प्रक्षेपणात् ५३ एवमनुक्तमपि शेषमावा

304

मच्छस्त्रपातसंभूतान्रक्तबिन्दून्महासुरान्। रक्तबिन्दून्प्रतीच्छ त्वं वक्त्रेणानेन वेगिना ५३ भक्षयंती चर रणे तदुत्पन्नान्महासुरान्। एवमेष क्षयं दैत्यः क्षीणरक्तो भविष्यति ५४ भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे। इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तं ५५ मुखेन काली जगृहे रक्तबीजस्य शोणितं। ततोसावाजघानाथ गदया तत्र चंडिकां ५६ न चास्या वेदनां चक्रे गदापातोल्पिकामपि। तस्याहतस्य देहात्तु बहु सुस्राव शोणितम् ५७ ॥

नां सहस्रशो वृद्धिः शक्ता उत्पन्नसंहारे त्याह भक्षयंती सूत्पन्नान् महासुरान् रणे चर ५४ भविष्यतामनुत्पत्तिमाह भक्ष्यमाणा इति उग्राः
क्रूराः उत्पत्स्यन्ति नव्याः अर्थः तां काली ५५ असौ रक्तबीजः तत्र तासां मध्यात् ५६ गदाया आपात आघातः अल्पिकामपि वेदनां
आबाधां न चकार विदूर्यायाः सर्वशक्तेर्भगवत्याः किं वाच्यं दैत्यप्रहृतगदाघातेन दुःखं स्यात् ५७

स्वा त्

यतस्ततः सर्वतः प्रतीच्छति स्म प्रतिनयाह येमुखे समुद्गताः संप्रविष्टास्तांश्चामुंडाभक्षत्सोदाभक्षयत् ५८ ५९ शस्त्राणां संघैः समूहैः स
मादृतस्ताडितः पाशांतरे सप्तवार्थः ६० नीरक्तो रक्तहीनो भवदिति शेषः भुवि पपात वा तेषां दैत्यानां प्रसृग्मदेन रक्तपानमदेनोद्ध
त उन्मदो जातः समनंतते दृषोद्गमवशगाज्ञाश्चविते पंचकाःस्यर्थः ६१ एकाधिकः शततमोध्यायः वर्गेष्टवर्गपकलयातिविसारिच्छुपं

यतस्ततस्तद्वक्त्रेण चामुंडा स्म प्रतीच्छति मुखे समुद्गता ये स्या रक्तपातान्महासुराः ५८ तांश्चखा
दाथ चामुंडा पपौ तस्य च शोणितं देवी चक्रेण शूलेन वाणैरसिभिरृष्टिभिः ५९ जघान रक्तवी
जं तं चामुंडापीतशोणितं स पपात महीपृष्ठे शस्त्रसंघसमाहतः ६० नीरक्तश्च महीपाल रक्तवी
जो महासुरः ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप तेषां मातृगणो जातो ननर्तासृङ्मदोद्धतः ६१
इति मार्कंडेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये रक्तवीजवधो नामाष्टमोध्यायः ८ राजोवा
विचित्रमिदमाख्यातं भगवन्भवता मम देव्याश्चरितमाहात्म्यं रक्तवीजवधाश्रितम् १ भूयश्चेच्छाम्य
हं श्रोतुं रक्तवीजे निपातिते चकार शुंभो यत्कर्म निशुंभश्चातिकोपनः २ चकर्ममाहात्म्यप्रभावः १२

स्त्वात्मीयशक्तिकचैनैः समवाप्तप्रभूति यद्गतितः समनुगच्छति शक्तिवर्गस्तं संविदोवत महोभवडःहारि एवं रक्तवीजवधेन मातृगणां
देव्यनुगतत्वं महादेव्या महाविभूत्यद्भुतं श्रुत्वा त्योत्तकोनभगवत्याश्चरितं साकल्येन विविदिषुः पृच्छति विचित्रमिदमिति चरितं

किंवात्र सांप्रदायिको मंत्रः प्रदर्श्यते त्वं वेदजननी परेति प्रथमचरित्रस्तोत्रे वाग्भववीजोद्धारः त्वं श्रीस्त्वं ह्रीरित्यनेन मायावीजोद्धारः महामोहेति मोहोत्पादकत्वात्कामराजवीजोद्धारः चामुंडेति ततो लोके ख्यातेति चामुंडापदं शिवायै सततं नमः इत्यत्र यै इति ३ इत्थं विविक्तमिति विशाह्नस्य द्वितीयश्लोके भूय एव इति च इति तेन ऐं ह्रीं क्लीं चामुंडायै विच्चे इति मंत्रोद्धारोभिहितो भवति अन्येपि

ऋषिरुवाच चकार कोपमतुलं रक्तवीजे निपातिते शुंभासुरो निशुंभश्च हतेष्वन्येषु चाहवे ३
हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन् अभ्यधावन्निशुंभोथ मुख्ययासुरसेनया ४ तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः सन्दष्टौष्ठपुटाः क्रुद्धा हन्तुं देवीमुपाययुः ५ आजगाम महावीर्यः शुंभोपि स्वबलैर्वृतः निहन्तुं चंडिकां कोपात्कृत्वा युद्धं तु मातृभिः ६ ततो युद्धमतीवासीद्देव्याः शुंभनिशुंभयोः शरवर्षमतीवोग्रं मेघयोरिव वर्षतोः ७ चिच्छेदास्तांश्शरांस्ताभ्यां चंडिका स्वशरोत्करैः ताडयामास चांगेषु शस्त्रौघैरसुरेश्वरौ निशुंभो निशितं खड्गं चर्म चादाय सुप्रभं अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमं ९ ताडिते वाहने देवी क्षुरप्रेणासिमुत्तमं निशुंभस्याशु चिच्छेद चर्म चाप्यष्टचन्द्रकम् १० ॥

मंत्रोद्धारप्रकारास्संतीत्यत्र प्रयोगाडम्बरभयान्नोल्लिख्यन्ते इति १२ अन्येष्वपि दैत्येषु हतेषु आहवे रणे ३ उद्वहन्धारयन् मुख्यया असुरप्रधानया ४ ५ ६ ७ अस्त्रान् प्रहितान् ८ ९ क्षुरप्रेण सर्वायसेन शरेण १० ॥

अष्टसंख्याकैरतनयदितैरस्वद्धाकारैरस्त्रन्दकैर्युक्तं केचित्तु अष्टंव्यापंतवंदकंकर्पूरंयत्रेत्याहुः १० देवीतामपिद्विधाचक्रे विच्छेदेत्यर्थः ११
कोपेनाध्मातआकृष्टः मुष्टिवत्पातआघातोमुष्टिपातः तेनमुष्टिपातेनापीतंतच्छूलं १२ आविध्याकृष्यभ्रामयित्वाभिन्नाछिन्ना १३ प

छिन्नेचर्मणिखड्गेचशक्तिंचिक्षेपसोसुरः तामप्यस्यद्विधाचक्रेचक्रेणाभिमुखागतां ११ कोपा-
ध्मातोनिशुंभोथशूलंजग्राहदानवः आयांतंमुष्टिपातेनदेवीतच्चाप्यचूर्णयत् १२ आविध्याथग-
दांसोपिचिक्षेपचंडिकांप्रति सापिदेव्यात्रिशूलेनभिन्नाभस्मत्वमागता १३ ततःपरशुहस्तंत
मायांतंदैत्यपुंगवं आहत्यदेवीबाणौघैरपातयतभूतले १४ तस्मिन्निपतितेभूमौनिशुंभेभीमवि
क्रमे भ्रातर्यतीवसंक्रुद्धःप्रययौहंतुमम्बिकां १५ सरथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः भुजैर
ष्टाभिरतुलैर्व्याप्याशेषंनभोबभौ १६ तमायांतंसमालोक्यदेवीशंखमवादयत् ज्याशब्दंचा
पिधनुषश्चकारातीवदुःसहं १७ पूरयामासककुभोनिजघंटास्वनेनच समस्तदैत्यसैन्या
नांतेजोवधविधायिना १८ ॥

स्तुः परश्वधः आहत्यप्रहृत्यअपातयतमूर्छामापादयत् १४ निशुंभे
भ्रातरिनिपतितेमूर्छितेसतिसंभ्रमआययौ १५ ससंभः रथस्थः सन् अशेषंनभोव्याप्यबभौ १६ आयांतमागच्छंतंदुःसहंदुःखेनसो
ढुंशक्यं १७ ककुभोदिशः तेजसोवधस्तिरोभावः विधायिनाकुर्वाणेन १८

मा॰ गांभुवं १९ स्वांभसिंते प्राक्स्वनाः पूर्वोक्ताः सिंहादीनांशब्दाः तिरोहिताः अंतर्गताः २० अशिवंविरूपञ्जासमनंत्रेसुः उद्विग्नाः परमु
पु॰टी॰ त्कृष्टं २१ व्याजहारसमुवाच देवीदानवसंयुगंदर्शनायाकाशेसंगतैः २२ वह्निकूटोग्निशिखरंतेनाभात्तत्सदृशी निरस्ताविना॰
३०९

ततःसिंहोमहानादैस्त्याजितेभेमहामदैः पूरयामासगगनंगांतथैवदिशोदश १९ ततःकाली
समुत्पत्यगगनंक्ष्मामताडयत् कराभ्यांतन्निनादेनप्राक्स्वनास्तेतिरोहिताः २० चंडाट्टहासम
शिवंशिवदूतीचकारवै तैःशब्दैरसुरास्त्रेसुःशुंभःकोपंपरंययौ २१ दुरात्मंस्तिष्ठतिष्ठेतिव्याज के८
हाराम्बिकायदा तदाजयेत्यभिहितंदेवैराकाशसंस्थितैः २२ शुंभेनागत्ययाशक्तिर्मुक्ताज्वाला
तिभीषणा आयांतीवह्निकूटाभासानिरस्तामहोल्कया २३ सिंहनादेनशुंभस्यव्याप्तंलोकत्र
यांतरं निर्घातनिःस्वनोघोरोजितवानवनीपते २४ शुंभमुक्तान्शरान्देवीशुंभस्तत्प्रहितान्
शरान् चिच्छेदस्वशरैरुग्रैःशतशोथसहस्रशः २५ ततःसाचंडिकाक्रुद्धाशूलेनाभिजघान
तं सतदाभिहतोभूमौमूर्छितोनिपपातह २६ ॥

306

शितामहोल्कयाकरणभूतयादेव्यानिराकृता २३ निर्घातश्चोत्पातिकोनभोध्वनिः सिंहनादेनजितवान् कर्मणिक्तवंतः २४
तयादेव्याप्रहितान्मुक्तान् २५ २६ ॥ ३०९

ततइतिनिशुंभस्यमोहानंतरं आत्तंगृहीतंकार्मुकंधनुः २७ २८ दुर्गेसंकटेआर्तैःपीडायानाशिनीतित्राणिनिःप्रत्ययः दुर्गतेर्दारिद्र्यस्यना
शिनीकल्याणीतिपाठांतरे २९ ३० शितातीक्ष्णाधारायस्यतेन ३१ वेगाविद्धेनवेगास्तिमेन ३२ निःसृतोनिष्क्रांतः पाठांतरेपरुषेति

ततोनिशुम्भःसंप्राप्यचेतनामात्तकार्मुकः आजघानशरैर्देवींकालींकेसरिणंतथा २७ पुन
श्चकृत्वाबाहूनामयुतंदनुजेश्वरः चक्रायुधेनदितिजश्छादयामासचंडिकां २८ ततोभगवतीक्रु
द्धादुर्गादुर्गार्तिनाशिनी चिच्छेदतानिचक्राणिस्वशरैःसायकांश्चतान् २९ ततोनिशुंभोवेगे
नगदामादायचंडिकां अभ्यधावततांहंतुंदैत्यसैन्यैःसमाहतः ३० तस्यापततएवाशुगदांचिच्छे
दचंडिकाखड्गेनशितधारेणसचशूलंसमाददे ३१ शूलहस्तंसमायांतंनिशुंभममरार्दनम्
हृदिविव्याधशूलेनवेगाविद्धेनचंडिका ३२ भिन्नस्यतस्यशूलेनहृदयान्निःसृतोपरः महाब
लोमहावीर्यस्तिष्ठेतिपुरुषोवदन् ३३ तस्यनिष्क्रामतोदेवीप्रहस्यस्वनवत्तदा शिरश्चिच्छेदख
ड्गेनततोसावपतद्भुवि ३४ ततःसिंहश्चखादोग्रदंष्ट्राक्षुण्णशिरोधरान् असुरांस्तांस्तथाका
लीशिवदूतीतथापरान् ३५

षंयथाभवेत्तथावदन् ३३ स्वनवदुच्चात्मासयुक्तं ३४ उग्राभिरतितीक्ष्णाभिर्दंष्ट्राभिःक्षुण्णाःछिन्नाःशिरोधराग्रीवायेषांता

मा· कौमार्याः संवंधिन्याशक्त्या ब्रह्माण्याः संबंधिमंत्रैः पूतं तोयं तेन निराकृताः नाशितवीर्योद्यमाः कृताः ३६ ३७ ३८ अत्र श्लोकोधिकः ३९
पु·टी· ४· आदितोष्टमः मातृगणोऽध्यायः रक्तबीजादिदैत्यानिकुरम्बविमर्दयंती देवी कृताश्रिततनुः परितोषयंती शक्रादिदेवनिवहान्मपि
३०७ मार्जयंती हृद्ध्वान्तमम्मनमसाहुरतान्समेधी आरोग्य संमतं सदृशतया संज्ञातं संमितमिति पाठांतरं १ बलस्यावलेपान्मिथ्याहंका

कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः ब्रह्माणीमंत्रपूतेन तोयेनान्ये निराकृताः ३६ मा
हेश्वरीत्रिशूलेन भिन्नाः पेतुस्तथापरे वाराहीतुण्डघातेन केचिच्चूर्णीकृता भुवि ३७ खंडंखंडं
च चक्रेण वैष्णव्या दानवाः कृताः वज्रेण चैन्द्रीहस्ताग्रविमुक्तेन तथापरे ३८ नारसिंह्या तथा दैत्या
नखैरुग्रैर्विदारिताः कालराज्या हताः केचित्शूलपातेन चार्दिताः ३९ केचिद्विनेशुरसुराः केचि
न्नष्टा महाहवात् भक्षिताश्चापरे काली शिवदूती मृगाधिपैः ४० इति मार्कंडेयपुराणे सावर्णि
के मन्वंतरे देवीमाहात्म्ये निशुंभवधो नाम नवमोऽध्यायः ९·२ ऋषिरुवाच निशुंभं निहतं
दृष्ट्वा भ्रातरं प्राणसंमितं हन्यमानं बलं चैव शुंभः क्रुद्धोऽब्रवीद्वचः १ बलावलेपाद्दुष्टे त्वं माडुर्गे ग
र्वमावह अन्यासां बलमाश्रित्य युद्ध्यसे यातिमानिनी २॥

रात् दुष्टेमिथ्यावादिनि योमां जयति संग्रामे यो मे दर्पं व्यपोहतीत्यादिवचनस्यान्यथाकृतत्वात् मामित्येकवचनादेकस्या एव
जयस्य प्रतिज्ञातत्वात् अत एवाह अन्यासामिति अभिमानिनी अहमेकैव बलादिमतीत्यहंकृता २॥

३०७

देवीस्ववचनसत्यतां द्रढयंत्याह एकैवेति एका प्रधाना केवला सजातीयभेदवर्ज्या एवकारेण विजातीयभेदशून्या अत्र जगति भेदप्रती
तिरूपे अपरा का मम परसंविदात्मिका द्वितीया न कापि स्वगतभेदहीनेत्यर्थः उपलभ्यमानभेदो न मत्तो व्यतिरिक्त इत्याह पश्येति सं-
गपाप्मन्दृष्या द्विगृषित तया देव्यस्वभावत्वान्न मम परमात्मरूपाया मया दर्शिता पि विभूतिर्वत्व पश्यसीत्यभिप्रायेणाह दुष्टेति महि
भूतयो मय्येव स्वतंत्रया प्रादुष्कृता मय्येव विशंत्यो मदैकमत्येन तिष्ठंत्यो भवंतीति पश्यपवाक्यस्यात्र कर्मत्वं ३ तस्या देव्यास्तनौ विदानं

देव्युवाच एकैवाहं जगत्यत्र द्वितीया का ममापरा पश्यैता दुष्ट मय्येव विशंत्यो मद्विभूतयः
ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयं तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदाम्बिका ४
देव्युवाच अहं विभूत्या बहुभिरिह रूपैर्यदास्थिता तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव
ऋषिरुवाच ततः प्रववृते युद्धं देव्याः शुम्भस्य चोभयोः पश्यतां सर्वदेवानामसुराणां च दारु-
णं ६ शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः तयोर्युद्धमभूद्भूयः सर्वलोकभयंकरम् ७

दक्षनामके विस्तीर्णे देहे लयमैकध्यं अनेन विविधाभ्यः स्वशक्तिभ्यो ब्रह्मादिप्रादुर्भाववत्तच्छक्तीनामपि तस्मिंल्लयदर्शनेनाभि
न्ननिमित्तोपादानत्वं देव्याः संविदो दर्शितं ५ विभूत्यापैश्वर्येण इह जगति स्वस्वभावात्मके आजौ रणे अनेनान्यासां बलमाश्रि
त्येति यद्देवेन परिभाषितं स्ववचनमपि सत्यं देव्या कृतमिति दर्शितं ५६ शितैः तीक्ष्णैः दारुणैः क्रूरैः भूयोधिकं ७॥

बभंज आममर्द तेषां देव्या प्रयुक्तानामास्त्राणां प्रतीकारो वारुणास्त्रादिना निवारणं तत्कर्तृभिः स्वैः ८ उग्रं यत् हुंकारो
च्चारणं तदादिभिः करणैः ९ तेन शरशताच्छादनेन कुपिता १०।११ शतचन्द्रं फलकं भानुमत् रश्मिमत् खड्गचर्मणोरुभयोर्विशे

308

दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथाम्बिका बभंज तानि दैत्येन्द्रस्तत्प्रतीकारकर्तृभिः मुक्ता
नि तेन चास्त्राणि दिव्यानि परमेश्वरी बभंज लीलयैवोग्रहुंकारोच्चारणादिभिः ९ ततः शरश
तैर्देवीमाच्छादयत सोऽसुरः सापि तत्कुपिता देवी धनुश्छिच्छेद सायकैः १० छिन्ने धनुषि दैत्ये
न्द्रस्तदा शक्तिं समाददे चिच्छेद देवी चक्रेण तामप्यस्य करे स्थिताम् ११ ततः खड्गमुपादाय श
तचन्द्रं च भानुमत् अभ्यधावत्ततो देवीं दैत्यानामधिपेश्वरः १२ धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्क
करामलं तस्यापतत एवाशु खड्गं चिच्छेद चंडिका १३ हताश्वः स तदा दैत्यश्छिन्नधन्वा विसार
थिः जग्राह मुद्गरं घोरमम्बिकानिधनोद्यतः १४ चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः
तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान् १५

षणं दैत्यानामधिपानामीश्वर इति वक्तव्ये गमकत्वात्समासः १२ अर्कस्य करैः रश्मिभिरमलं निर्मलं चकाराद्दस्य रथादीनां समुच्चयः
क्वचिदश्वांश्च पातयामास रथं सारथिना सहेति श्लोकार्धः पठितः १३ अम्बिकाया निधने उद्यत उद्युक्तः १४ तथापीत्यायुधाभा

देव्याहृदये तलेनप्रसृतांगुलिकरेणचपेटया १६ १७ उत्प्लुत्य उ ीय तत्रापिगगनेपि सादेवीनिराधारा आधाररहिताभूत्वा १८
नियुद्धंभुजयुद्धं सिद्धानांदेवानांमुनीनांचविस्मयकारयती तितया १९ उत्पात्यचरणयोर्गृहीत्वाधरण्याभुवस्तले २० २१ जग

समुष्टिंपातयामासहृदयेदैत्यपुंगवः देव्यास्तमपिसादेवीतलेनोरस्यताडयत् १६ तलप्रहा
राभिहतोनिपपातमहीतले सदैत्यराजःसहसापुनरेवतथोत्थितः १७ उत्प्लुत्यचप्रगृह्योच्चै
र्देवींगगनमास्थितः तत्रापिसानिराधारायुयुधेतेनचंडिका १८ नियुद्धंखेतदादैत्यश्चंडि
काचपरस्परं चक्रतुःप्रथमंसिद्धमुनिविस्मयकारकं १९ ततोनियुद्धंसुचिरंकृत्वातेनाम्बिका
सह उत्पात्यभ्रामयामासचिक्षेपधरणीतले २० सक्षिप्तोधरणींप्राप्यमुष्टिमुद्यम्यवेगवान्
अभ्यधावतदुष्टात्माचंडिकानिधनेच्छया २१ तमायांतंततोदेवीसर्वदैत्यजनेश्वरम् जगत्यां
पातयामासभित्वाशूलेनवक्षसि २२ सगतासुःपपातोर्व्यांदेवीशूलाग्रविक्षतः चालयन्स
कलांपृथ्वींसाब्धिद्वीपांसपर्वताम् २३

त्यांभुवि २२ गतासुःगतप्राणः देव्याःशूलस्याग्रेणाग्रेणतेनविक्षतोविहितव्रणः चालयन्निति क्रियाभाव आर्षः २३ ॥

मा॰ प्रसन्नंतमोमेघाघावरणानाविलं स्वास्थ्यंस्वभावानुसारित्वं २४ उत्पातसूचकायेमेघाः सोल्का उल्कादिमंतः प्राक्दैत्यवि
पु॰टी॰ नाशात्पूर्वंमार्गवाहिन्योनुत्पथगामिन्यः २५ हर्षेणनिर्भरंपूर्णंमानसंयेषां ललितंरमणीयं २६ अन्येगंधर्वावीणादीनवादयन्
३०५ पुण्याश्चानुकूलाः अग्नयआहवनीयादयस्तेषः शांताःप्रदक्षिणादर्चिषस्तेधूमानिर्धूमाः दिग्भिर्जनिताये शब्दाः पूर्वंमुत्पातसूचका

ततःप्रसन्नमखिलंहतेतस्मिन्दुरात्मनि जगत्स्वास्थ्यमतीवापनिर्मलंचाभवन्नभः २४ उ-
त्पातमेघाःसोल्कायेप्रागासंस्तेशमंययुः सरितोमार्गवाहिन्यस्तदासंस्तत्रपातिते २५
ततोदेवगणाःसर्वेहर्षनिर्भरमानसाः बभूवुर्निहतेतस्मिन्गंधर्वाललितंजगुः २६ अवा
दयंस्तथैवान्येननृतुश्चाप्सरोगणाः ववुःपुण्यास्तथावाताःसुप्रभोभूद्दिवाकरः जज्वलु
श्चाग्नयःशांताःशांतादिग्जनिताःस्वनाः २७ इतिमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवी
माहात्म्येशुंभवधोनामदशमोध्यायः १० ऋषिरुवाच देव्याहतेतत्रमहासुरेंद्रेसेन्द्राःसु
रावह्निपुरोगमास्तां कात्यायनींतुष्टुवुरिष्टलाभाद्विकाशिवक्त्राब्जविकासिताशाः १

यानिरुक्तिर्देवीपुराणेदर्शिता।

स्तेचशांताः नष्टाइत्यर्थः २७ आदितस्त्वाधिकःशततमोध्यायः अथैतासांत्रिसृणांदेवीनांनिर्गुणात्मकतत्गुणावतारणा
मभिन्नानामपिभेदःप्रदर्श्यते तत्रपदैस्त्रिभिर्वालिर्वेद्दोवागादित्रिपदाथवा उत्पत्तिस्थितिनाशेषुसत्वादित्रिगुणाश्रयेतित्रिगुणा ३०५

309

अत्रचत्रिगुणया निर्गुणयाइव अहंसर्वमिदंभूतंत्वंचदेविनसंशयः त्वयामयाचदेवेशिओतप्रोतमिदंजगदितितत्रैवदेवींप्रति
शिववचनादुभयोरभेदउक्तः अतएवमुख्यमहालक्ष्मीजन्यानांब्रह्मादीनांस्त्र्यादिकर्तृणांसशक्तीनांतद्भेदकत्वतत्पालकत्व
तत्संहारकत्वादीनिप्राधानिकरहस्येसमभिहितानीतिबोध्यम् तथाचतत्रसत्त्वस्यासहसंभूयविरिंचोरजसाजीजनत् विभेदश
गवान्रुद्रस्तद्गौर्यासहवीर्यवान् अण्डमध्येप्रधानादिकार्यजातमभूत्ततः तत्सर्वंपालयामासतत्स्थासद्दजनार्दनः संजहा
रजगत्सर्वंसहगौर्यामहेश्वरइति एवंचचराचरंसर्वंमहालक्ष्म्याअभूत्तद् अहंत्वंचसमुत्पन्नौब्रह्मादेवश्चसर्वतइति द्वयोर
भेदउक्तस्तत्र तथाचसतिभूतत्वाधिष्ठातृहरेर्योगनिद्रासंज्ञयादिकायाअपिमहाकाल्यामूलशक्तेर्महालक्ष्म्याअभेदादेवत
याविसृज्यतेविश्वंसैवविश्वंप्रसूयते साविद्यापरमामुक्तेर्हेतुभूतासनातनीत्यादिना सर्वात्मत्वेनक्रियमाणास्तुतिर्नवि
रोधिनी एवंजडस्वभावायाःप्रकृतेश्चेतनरूपायाश्चितेरधिष्ठानाधिष्ठेययोरभेदत्वात् योगनिद्राजगत्पतेः सैषाप्रसन्ना
वरदेत्यादिनाजडचितोःसामानाधिकरण्यं तथाचमूलभूतजडशक्तेर्महामायाकुण्डलिनीत्यादिशब्दैर्व्यवक्रियमाणा
याअधिष्ठात्रीचिच्छक्तिरेवमुभयोरभेदादुभयसंज्ञाभिरभिधीयते तथाचोक्तंकूर्मपुराणेमायायावाक्यं नमेनारायणा
द्भेदोविद्यतेहिविचारतः तन्मयाहंपरंब्रह्मसविष्णुःपरमेश्वरइति एवंतमोमयीकालीसंज्ञाशक्तिरपिनिद्रामोहादिभिः
पुरुषस्यज्ञानावरकत्वान्महामायेत्युच्यते सावेयंशक्तिःशक्तिमदधिष्ठितैवोपास्याशक्तिमतः शक्त्याश्रयत्वेपिकार्यो
त्पत्तौशक्तेरेवप्राधान्यमेवंमुक्तिदातृत्वंसर्वाश्रयत्वादिकंचेतिसर्वंसमंजसं इतिनागोजिभट्टः एतासांप्रादुर्भावोपासन
कालस्तुतंत्रोक्तः इत्येवंसंस्तुताकालीतत्त्वबोधार्थमेवच शत्रोर्वधनिमित्तंचतृंपदश्रेपरंहिसा मधुकैटभनाशस्यहेतवेदेव
हितैषिणी शैशिरेववरात्रेतुप्रादुर्भूताममाम्बिकेइति अत्रशैशिरेतीतेइतिचैत्रनवरात्रेइतिबोध्यम् ॥१॥

मा॰ तथा महालक्ष्मीरहं शक्रपुनः स्वायंभुवेऽन्तरे हिताय सर्वदेवानां जाता महिषमर्दिनी मदीयाः शक्तिलेशा ये तन्न देवशरीरिण ;
पु॰टी॰ श्रृतं मया तैः संभूतैः रूपं परमशोभनं आयुधानि च देवानां यानि यानि सुरेश्वर मच्छक्तयस्तदाकारा सा पायुधानि ममाभवन्
३१॰ वर्षा तेन वरा जेतुं त्वं नाम महिषमर्दिनीति दैत्यौ शुंभनिशुंभाख्यौ भ्रातरौ संबभूवतुः याचितस्तपसा ताभ्यां ब्रह्मा विश्वस्
रो विभुः अवध्यत्वं जगत्यस्मिन् पुरुषैरखिलैरपि अयोनिजा तु या कन्या देहकोशसमुद्भवा अजातपुंस्पर्शरतिरविलंघ्यप
राक्रमा तथास्तु नौ वधः संख्ये तस्यां कामाभिभूतयोः इति चाभ्यर्थितो ब्रह्मा ताभ्यां प्राह तथास्त्विति ताभ्यामुपद्रुते लो
के ज्ञो देवैः संप्रयाचितः तयोर्लयाय देवेशो ब्रह्मा प्रार्थितवांशिवं विचिन्त्यापि रहस्येतां कोपयित्वा यथातथं तद्वर्ण
कोशजां शक्तिमकामां कन्यकात्मिकां निशुंभशुंभयोर्हन्त्रीं देवेभ्यो दातुमर्हसि एवमभ्यर्थितो याचा भगवान्नील॰
लोहितः कालीत्याह रहस्येतां लीलया साचुकोप च भूयसी च तवापीति रंगोश्मिति मेवपुः क्रीडोक्तिरपि काली
ति च देतकथमन्यथा देवस्यावत्तया देवी तपश्चरितुमाययौ गौतमस्याश्रमे तत्र ब्रह्माणं तपसा ययौ ततस्तां वरदो ब्र
ह्मा गौरवर्णं रूपं ददौ स्वयं कोशात्कात्वाम्बुदश्याम्यात्कन्यका समजायत सा तु मायात्मिका शक्तिर्योगनिद्रा हरेः स्मृता
ततः प्रत्यागता देवी कौशिकी महिमाहतः किं तु देवेन मां दृष्ट्वा यास्रष्टा कौशिकी मया तादृशी कन्यका लोके न भूता
न भविष्यति अजातपुंस्पर्शरतिरभ्रष्टा चाति सुन्दरीति शिवपुराणे अस्याः रूपं तु सरस्वत्यष्टहस्ता तु वाणं च मुसलं तथा
शूलं च चक्रं तथा शंखं घंटां च लांगलं तथा धनुर्वै तानि दिव्यानि हस्तैर्देवी बिभर्ति सा श्वेतपर्वतसंकाशा श्वेतवस्त्रविभूषिता
नानारत्नसमाकीर्णा वेदविद्याविनोदिनी आषाढे नवरात्रे तु पूज्या शुंभनि
बर्हिणीति यामले ॥

310

नतिः समस्ततत्त्वसत्तां महत्तां परैश्वर्यमिच्छादिशक्तीनिच योऽस्य समभुन्नयेऽस्या याप्यापिनां कृतपदारुह्याब्जकोशे विसंप्रकाशय
तीनी मिसरस्वतीकी देव्या इति तत्र पुरुहे इंद्रसहिताः सुरा वह्निपुरोगमः पुरः सरो येषां अग्निपुरोगमं त्वं चलत्ती तं चेतस्त्या यान्ने
नैव नारायणीस्तुतिरभिहिता यदुक्तं तत्र नारायणीस्तुतिर्नाम स्तुतं परमशोभनं पुरंदरस्तदाह हि देवैरग्निपुरोगमैरिति क
तिकियतीनां शक्तीनां भावः कमेवा कात्य तदयनं निवासस्थानं यस्याः सा कात्यायनीति सर्वासां शक्तीनां परस्परमनेनैकं
सूचितमिति इष्टस्य संभाविवयस्य राज्याधिकारस्य च लाभात्प्राप्तेर्हेतोर्विकासीनि विकस्वराणि वक्त्राब्जानि तैर्विकासिताउ

ऋषिरुवाच देव्या हते तत्र महासुरेंद्रे सेंद्राः सुरा वह्निपुरोगमास्तां कात्यायनीं तुष्टुवुरिष्टल
ाभाद्विकासिवक्त्राब्जविकासिताशाः १ देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिल
स्य प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य २ आधारभूता जगतस्त्वमेका मही
स्वरूपेण यतः स्थितासि अपां स्वरूपस्थितया त्वयैतदाप्यायते कृत्स्नमलंघ्यवीर्ये ३ त्वं वै
ष्णवी शक्तिरनंतवीर्या विश्वस्य बीजं परमासि माया संमोहितं देवि समस्तमेतत्त्वं वै प्रसन्ना

शोतिताः प्रकाशिता दिशो यैः १ प्रपन्नाः शरणागतास्तेषामार्तिहरे दुःखनाशिनि प्रसीदेति पुनरुक्तिर्भक्त्यतिशयेन ईश्वरी
स्वतंत्रा सर्जनादौ नियंत्री च २ जगत आधारकत्वे हेतुः महीति यतो यस्माद्धेतोः अलंघ्यवीर्ये नित्यादिते हे देवि कृत्स्नं चराच
रात्मकं जगदाप्याय्यते वर्धते यतोऽपां स्वरूपेणास्थितया ३ अलंघ्यवीर्यत्वं स्पष्टयति त्वमिति अनंतवीर्यत्वमाह विश्व
स्येति परमा माया महामाया मोहिनी तदाह संमोहितमिति किंच मुक्तिसरणिप्राप्त्यादिकारिणी च त्वमेवेत्याह त्वं वै इति
त्वमेव प्रसन्ना विहितप्रसादा भुवि जगति अनेन श्लोकद्वयेनोपलक्षणतया सार्वात्म्यमुक्तम् ४

मा॰
पु॰टी॰
३११

विद्याश्चतुर्दश अंगानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश आयुर्वेदो धनुर्वेदो गान्धर्वम
र्थशास्त्रकमिति समस्ताश्चतुःषष्टिकलाश्च तव भेदा अंशाः पातिव्रत्यप्रत्ययसौन्दर्यलावण्यपतातरुणपाणिपेताः समस्ताश्च स्त्रि
यस्तवांशाः सकलं जगच्च त्वदंशं देवेम्बत्वयैकया मुख्यया संविदात्मिकया पतज्जगदेतद्वं दिक्प्राप्तमित्याह त्वयेति एवं च
त्वन्नः स्तव्यभूतस्य कस्याप्यभावाद्याथार्थपताने तव का स्तुतिः स्तव्यः स्तोतुमर्हस्तस्य परतया श्रेष्ठभावेनोत्कृष्टाश्च परतया ज्ञ
गद्भावेनापरोक्तिर्भगवत्यास्तु परापरपरा स्तुतिरीतया का स्तुतिर्नकापीत्यर्थः ५ तदेवाह सर्वभूतेति सर्वत्वभूताश्च मायदा

311

विद्याः समस्तास्तव देवि भेदाः स्त्रियः समस्ताः सकलं जगच्च त्वयैकया पूरितमम्बसर्वं का ते
स्तुतिः स्तव्यपरापरोक्तिः ५ सर्वभूता यदा देवी भुक्तिमुक्तिप्रदायिनी त्वं स्तुता स्तुतये का वा
भवंतु परमोक्तयः ६ सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते स्वर्गापवर्गदे देवि नारायणि
नमोस्तु ते ७ कलाकाष्ठादिरूपेण परिणामप्रदायिनि विश्वस्योपरतौ शक्ते नारायणि नमो॰ ८

देवीभुवतिभुक्तिमुक्त्योः प्रकर्षेण दायिनी दात्री च यदा त्वमस्माभिः स्तुता तदा भवत्याः स्तुतये परमाश्च ता उक्तयो वचनानि का
वा भवेतन का अपि युक्ता योग्या भवन्तीत्यर्थः ६ भुक्तिमुक्तिप्रदायित्वं देव्या विवृणोति सर्वस्येति बुद्धिर्निश्चयात्मकं ज्ञानं तद्रूपेण
हृदि संविदक्षपिकवरेण भोगसाधनकर्मसुस्थिततया स्वर्गदे मोक्षसाधनज्ञानसुस्थिततया मुक्तिदे अतएव नारोजीवसमूहस्य हृ
दयमयनं यस्याः इति नारायणी तेत्त संभं ७ अष्टादश निमेषास्तु काष्ठास्त्रिंशत्तु ताः कलाः तास्तु त्रिंशत्क्षणस्ते तु मुहूर्ता द्वाद
शोत्यादिकालकालनानारूपेणाद्यं तेन विश्वस्य जगतः परिणामान्यथावस्थितिः तं प्रदातुं शीलं यस्याः अतो विश्वस्योपरतौ ना

क्षणादिकालैर्विकारसंख्यकलात् ८

३११

सप्तशतीनामधेयस्यशे श्रीपुराणमयेश्रविधमानगुणाछन्नविकाखेइतिद्वितीय
पीयुषं: १०

सर्वमंगल्यानां सर्वेषामानंदानामीप्सितानां मंगलेसाधुमंगल्यं मंगलानांचमंगलमित्यर्थः यद्वा सर्वमंगलामंगलाचेतिनामद्व
यं तदुक्तं देवीपुराणेसर्वाणिहृदयस्थानिमंगलानिशुभानिच ददातिचेप्सितांल्लोकेतेनसासर्वमंगला भक्तानामार्तिहरणी
मंगलातेनसास्मृतेति शिवाचतुर्थीकलासाचशिवप्रदत्वाच्छिवेत्युच्यते शिवसंहितेतंचतच्छेमंत्यतइतिश्रुतेः तदुक्तं शि
वाशुक्तिःसमाख्याताितत्प्रदत्वाच्छिवास्मृतेति सर्वानर्थान्धर्मादीन्पुमर्थान्भक्तानां साधकानिष्पादयित्री तदुक्तं धर्मादी
न्साधितानस्यात्सर्वलोकस्यसर्वदेति अतोदेवीसमाख्याता लोकेसर्वार्थसाधिका शरणपालनेरक्षणेसाधुःशरण्या
तस्याःसंबुद्धिः तदुक्तं विपद्भिभयघोरेषुशरणंशरणागतान् शरण्यातेन सादेवीमुनिभिःपरिकीर्तितेति त्र्यम्बके
त्रिनेत्रे तदुक्तं सोमसूर्यानलास्त्रीणित्र्यम्बकासास्मृतानुधैरिति वस्तुतस्तुत्रिभिर्मात्रादिभिरम्यतेशाब्द्यतेइति त्र्यम्बका

सर्वमंगलमंगल्येशिवेसर्वार्थसाधके शरण्येत्र्यम्बकेगौरिनारायणिनमोस्तुते ९ सृष्टिस्थि
तिविनाशानांशक्तिभूतसनातने गुणाश्रयेगुणमयेनारायणिनमोस्तुते १० शरणागत
दीनार्तपरित्राणपरायणे सर्वस्यार्तिहरेदेविनारायणिनमोस्तुते ११

गौरि अवदातदेहे तदुक्तं योगाग्निदग्धदेहाया पुनर्जाताहिमालयात् शंखेंदुकुंदधवला ततोगौरीतुसास्मृतेति
कौशिकीसंबंधादियंगौरीपार्वतीतिहिकस्या नारायणी नारायणःसर्वजगद्व्यापकः तथाचश्रुतिः यच्चकिंचित्क्वचि
द्दृश्यतेश्रूयतेपिवा अंतर्बहिश्चतत्सर्वंव्याप्यनारायणःस्थितइति स्मृतिश्च जलायनानराधारासमुद्रशयनापि
वा नारायणीसमाख्याता नरनारीप्रवर्तिका वसन्त्यत्रसर्वेभूतेभ्यंतदिनायतः देव्याव्याप्तमिदंसर्वंजगत्स्थावर
जंगममितिअस्यमंत्रश्लोकस्याष्टनामात्मकस्यसमावर्तनंमहाफलमितिकालिकापुराणेस्पष्टं ९ लक्षणापाख्या।

लक्ष्मीदेवीसंबंधि ... सप्तशतीटीकायांपूर्णं:

शरणगतानामभीष्टदाने नदीनाः सर्वङ्गः खभाजस्तेषां ङः खद्गातेन आर्त्ता रोगादि पीडितास्तेषां तन्नाशेनेन परित्राणं॰ पालनं तस्मिन्परायणे आसक्ते तदेवाह सर्वस्येति पाठांतरेण गतः कारणेन निर्माचिङ्गरेङ्कर्ये ११ कुशो दर्भः तेन हृतं कौशं पवित्रकं तेन अंभसो जलस्य क्षरिके सेचिके केचित्तु कौशं जलं तत्संगायं कोशः करकमण्डलं भसः क्षरिके इत्यर्थः १२ अहिः स

हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि कौशांभःक्षरिके देवि नारायणि नमोस्तु ते १२
त्रिशूलचंद्राहिधरे महावृषभवाहिनि माहेश्वरीस्वरूपेण नारायणि नमोस्तु ते १३ मयूरकु
कुटवृते महाशक्तिधरेनघे कौमारीरूपसंस्थाने नारायणि नमोस्तु ते १४ शंखचक्रगदाशा
र्ङ्ग॰ गृहीतपरमायुधे प्रसीद वैष्णवीरूपे नारायणि नमोस्तु ते १५ गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृ
तवसुन्धरे वराहरूपिणि शिवे नारायणि नमोस्तु ते १६ नृसिंहरूपेणोग्रेण हंतुं दैत्यान्कृतो
द्यमे त्रैलोक्यत्राणसहिते नारायणि नमोस्तु ते १७ किरीटिनि महावज्रे सहस्रनयनोज्ज्व॰
ले वृत्रप्राणहरे चैन्द्रि नारायणि नमोस्तु ते १८

र्पः १३ मयूरस्य कुक्कुटं वर्हते नु वृते कुक्कुटः कृकवाकुः पिञ्छे पुत्रे वचरणायुध इति कोशः तदुक्तं भारते भुजेन शोभिविहा॰ रणाय शक्तिने न समाहृतेति कौमारी कुमारपा शक्तिस्तस्या रूपेण संस्थानं प्रतीकसन्निवेशो यस्याः १४ शंखादीनि गृही तानि परमाणायुधानि कूरेण सहिते सम्यक् हिते समो वाहित तयो रिति समोमकारस्य लोपः १७ किरीटि निशक्रट

मदं दैत्यस्य हत्वा घोरो रावो महाट्टहासो यस्याः १९ शिरसां मुण्डानां माला विभूषणानि यस्याः २० महाविद्या उपनिषद्रहस्यं श्रद्धा आस्तिकता पुष्टिः समृद्धिः स्वधा स्वस्ते ध्रुवा स्थितिः महती रात्रिर्विमोहिनी अविद्यात्मिका दुरुच्छेद्य विमोहो वा छेदकत्वा हिंस्यत्वात्स्फुरणान्महती रात्रिर्विद्यात्मिका च उभयत्रापि महद्वा त्वं वीर्यं यस्याः २१ मेधा धारणावती मतिः सरोजा ने प्रोशासे न विद्येते यस्याः सा सरस्वती पशुपत्यादि वाग्रूपिणी श्रीपरा वरा श्रेष्ठा भूतिर्विभूतिरैश्वर्यं ता बभ्रुर्विष्णुः विपुलेन क्रुद्धेन विषाण बभ्रुर्नो क

शिवदूतीस्वरूपेण हतदैत्यमहाबले घोररूपे महारावे नारायणि नमोऽस्तु ते १९ दंष्ट्राकरालवदने शिरोमालाविभूषणे चामुण्डे मुण्डमथने नारायणि नमोऽस्तु ते २० लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टि स्वधे ध्रुवे महारात्रि महावीर्ये नारायणि नमोऽस्तु ते २१ मेधे सरस्वति वरे भूते बाभ्रवि तामसि नियते त्वं प्रसीदेशे नारायणि नमोऽस्तु ते २२ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते २३ एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् पातु नः सर्वभीतिभ्यः कात्यायनि नमोऽस्तु ते २४ ज्वालाकरालमत्युग्रमशेषासुरसूदनं त्रि

पिले विश्रुतत्वमः तस्येयं शक्तिर्बाभ्रवी तामसि उपलक्षणमन्ययोरेतत् तम आदि त्रिगुणयुक्ते नियतिर्दैवमदृष्टं ईशिस्वतंत्रेति शेषि २२ किं बहुना यं सर्वस्तोत्रसंग्रहस्तमाह सर्वस्वरूपेऽइति त्राहि रक्ष परस्मैपदमार्षं २३ भीतिभ्यो भयेभ्यः पाठांतरे भूतेभ्यो भूतनिकारेभ्यः प्राणिभ्यश्च २४ ज्वालाभिः करालं विकटं अतएवात्युग्रं अतिक्रूरं सर्वदैत्यनिवर्हणं नो स्मान् भीतेर्भयात् २५

मार्कं०

मा० अन्यान्येपिश्लोकाः पठ्यंते तेचोक्ताः घंटेत्यर्थः तत्त्वात्पवनीतं शोक्तिरीत्यनन्तकुलत्वाश्रोपेक्षिताः हिनस्तीति प्रगणहाव्यथने आपूर्य
पु० टी० एकाशखायनीकृत्यनः पात्विति हिरुक्तिः प्रसादनादिष्ववितह्या यक्तं विषादेविस्मयेहर्षे दैन्येकोपेव्यथाशणे प्रसादने संभ्र
मेचहिरुक्तं नदुष्यतीति प्रसादनेदेव्याः विस्मयेचदेवीचरित्रस्मरतेरतिस्नोकांतरावाः हर्षेचतेहेठावाद्यमानेरोवदेत्यानां
३१२ विनाशनात् सुतानिवपुत्रानिव २६ असुराणामसृक्रक्तंवसाचतयोः पंकंकर्दमस्तेनचर्चितोविलिप्तः तेनतवकरे उज्वलोदे

हिनस्तिदैत्यतेजांसिस्वनेनापूर्ययाजगत् साघंटापातुनोदेविपापेभ्योनःसुतानिव २६
असुरासृग्वसापंकचर्चितस्तेकरोज्वलः शुभायखड्गोभवतुचंडिकेत्वांनतावयं २७ रोगा
नशेषानपहंसितुष्टारुष्टासिकामान्सकलानभीष्टान् त्वामाश्रितानांनविपन्नराणांत्वामा
श्रितात्याश्रयतांप्रयांति २८ एतत्कृतंयत्कदनंत्वयाद्यधर्मद्विषांदेविमहासुराणां रूपैर
नेकैर्बहुधात्ममूर्तिंकृत्वाम्बिकेतत्प्रकरोतिकान्या २९

दीप्यमानः २७ पुनरपिभक्तिरोद्रेकेणप्रार्थयते
रोगानिति अशेषान्समग्रान् तुष्टासिपोषयसि वर्धयसि अभीष्टान्प्रियान् विपत् इष्टवियोगलक्षणा आश्रयतांप्र
त्येषामाश्रयरादेवीवद्भवंतीत्यर्थः २८ अलंवाभवतुत्वाश्रविनाशमसियत्रयावर्तमानचरित्रस्यापिमहिमानंमयिचेतनंदे
ममदेइत्याह एतदिति कदनंवधः तेषांवधेनिमित्तविशेषणद्वारेणाह धर्मद्विषामिति अनेकैरूपैर्ब्रह्मादिसहस्रब्रह्म
रूपादिमूर्तिभिः आत्मनोमूर्तिंशरीरंतत्तन्मूर्तिकंबहुप्रकारंकृत्वा हेअम्बिकेशाक्तात्मिकेमहागौरिकान्यापराकरोतितत्का

३१३

विद्यासु अष्टादशसु विवेकदीपेषु यथात्मावभासकेषु शास्त्रेषु अध्यात्मविद्यासु मन्वाद्युक्तेषु आद्येषु वेदेषु उपनिषद्रूपेषु व
कात्वदन्या परा विद्यते कूटस्थचिद्रूपब्रह्मजीवेश्वरकैक्यापादिकाः ज्ञानादिनिरूपणेषु संविद्भगवत्या निसर्गतायास्तेषां प्रतिपा
दनात्प्रागेव विद्यमानसद्भावात् इति ज्ञानस्य विद्यात्मकस्य देवीस्वरूपत्वेन संदर्शितं इदानीमविद्यात्मिकाया अपि भगवत्याः
स्वरूपविस्तारकत्वं महच्चित्रमित्याह ममत्वेत्यादि भवत्या विद्यात्मिका विमोहिनी ममत्वमेव गर्तो अन्धकूपस्तस्मिन्महान्धका

विद्यासु शास्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु च का त्वदन्या ममत्वगर्तेऽतिमहान्धकारे विभ्रा
यत्येतदतीव विश्वं २० रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो दस्युबलानि यत्र दावानलो य
त्र तथाब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वं २१ विश्वेश्वरि त्वं परिपासि विश्वं विश्वात्मिका
धारयसीति विश्वं विश्वेशवन्द्या भवती भवन्ति विश्वाश्रया ये त्वयि भक्तिनम्राः २२ देवि प्र
सीद परिपालय नोऽरिभीतेर्नित्यं यथासुरवधादधुनैव सद्यः पापानि सर्वजगतां प्रशमं न
याशु चोत्पातपाकजनितांश्च महोपसर्गान् २३ ॥

रेऽन्धतमसे विश्वं विशेषेण भ्रामयतीति स्वस्वभावस्य विस्मारकत्वादित्यर्थः अनेन विद्याविद्योभयात्मिकैकैव भगवत्यभिहि
तेति दर्शितं २० तत्र तत्र सर्वात्मिका सर्वशक्तिः स्थिता त्वं परितः पासि रक्षसि दस्युबलानि चौरसैन्यानि २१ यतो वि
श्वेश्वरी ततो विश्वं पालयसि यतो विश्वात्मिका ततो धारयति यतो भवती विश्वेशानां ब्रह्मविष्ण्वादीनां वन्द्यास्तस्मा अतो
ये त्वयि अभिव्यापिकायां भक्त्या हार्देन नम्रास्ते विश्वाश्रया भवन्ति संप्राप्त भगवतीसारूप्यात् २२

मा॰ टी॰ ३१८

देवीति यथाधुनैव सद्यधवात्सुरारणैवयथाद्यवैपरिपालिताः तथानित्यमस्मदेवारिभीतेः परिपालय अतः प्रसीद प्रशमे प्रकर्षे
णनाशंप्रापय शीघ्रमेवपापानिप्रायनोदुःखसूचकानि अत एवोत्पातानांउत्पातसूचकानांकर्मणांपाकेन फलनिष्पत्त्याज
नितानुपसर्गानुपद्रवान्मूकेंपनिर्चीनारीनप्राप्तउत्पातिसमकालमेव प्रशमंनयप्रापयसर्वंजगतांसर्वेषांभुवनानां २२
प्रणतानानंनमाणांविश्वस्यदुःखनाशिनि त्रैलोक्यवासिनांसर्वेषांब्रह्मादीनांईशे स्तोत्रेयोग्ये ३४ जगतामुपकारकंवरम्

प्रणतानांप्रसीदत्वंदेविविश्वार्तिहारिणि त्रैलोक्यवासिनामीड्येलोकानांवरदाभव देव्युवा
च वरदाहंसुरगणावरंयन्मनसेच्छथ तंवृणुध्वंप्रयच्छामिजगतामुपकारकं ३५ देवाऊचुः स
र्वबाधाप्रशमनंत्रैलोक्यस्याखिलेश्वरि एवमेवत्वयाकार्यमस्मद्वैरिविनाशनं देव्यु॰ वैवस्वतेन्तरे
प्राप्तेऽष्टाविंशतितमेयुगे शुंभोनिशुंभश्चैवान्यावुत्पत्स्येतेमहासुरौ नन्दगोपगृहेजाता यशोदा
गर्भसंभवा ततस्तौनाशयिष्यामिविन्ध्याचलनिवासिनी ३८ ॥

यच्छामि प्रतिपादयामि ३५ सर्वासांबाधानांप्रकर्षेणशमनेअस्माकंदेवानांयेवैरिणोदैत्यदानवास्तेषांनाशने ३६ एतदेव
मदेवमनवरतयाकरिष्ये इत्यभिप्रायेणाह वैवस्वतेन्तरे इति कलिद्वापरयोःसंधौतयोरुत्पत्तिः ३७ अस्मानन्दजायाःस्वरूपम्
र्निरहस्येध्यायेभिहितं यथानव नन्दाभगवतीनाममयाभविष्यतिनन्दजा सास्तुतापूजिताभक्त्यावशीकुर्याज्जगत्त्रयम् कन
कोत्तमकांतिः सुकान्तिकनकाम्बरादेवीकनकमालाढ्याकनकोत्तमभूषणा इन्दिराकमलानन्दा लक्ष्मीः साश्रीरुक्मांबुजासनेति

[illegible] ३८ ॥

314

३१८

वैप्रचित्तान्विप्रचित्तिदानववंशोत्पन्नान् ३९ ४० व्याहरिष्यंति अभिधानं करिष्यंति अस्यास्वरूपं रहस्ये यथा तत्र या
रक्तदंतिका नाम देवी प्रोक्ता मयानघ तस्याः स्वरूपं वक्ष्यामि शृणु सर्वभयापहम् रक्ताम्बरा रक्तवर्णा रक्तसर्वांगभूषणा
रक्तायुधा रक्तनेत्रा रक्तकुंचितमूर्धजा रक्तदंती रक्तनखा रक्तदंष्ट्रातिभीषणा वसुधेव विशाला सा सुमेरुयुगलस्तनी दी
र्घौ लम्बावतिस्थूलौ तावतीव मनोहरौ कर्कशावतिकांतौ तौ सर्वानन्दपयोनिधी स्वभक्तान्पाययेद्देवी सर्वकामदुघौ

पुनरप्यतिरौद्रेण रूपेण पृथिवीतले अवतीर्य हनिष्यामि वैप्रचित्तांस्तु दानवान् ३९ भक्षयं
त्याश्च तानुग्रान्वैप्रचित्तान्महासुरान् रक्तादंता भविष्यंति दाडिमीकुसुमोपमाः ४० ततो मां
देवताः स्वर्गे मर्त्यलोके च मानवाः स्तुवंतो व्याहरिष्यंति सततं रक्तदन्तिकाम् ४१ भूयश्च
शतवार्षिक्यामनावृष्ट्यामनंभसि मुनिभिः संस्तुता भूमौ संभविष्याम्ययोनिजा ४२ ततः
शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन् कीर्तयिष्यंति मनुजाः शताक्षीमिति मां ततः ४३

खड्गं पात्रं च मुसलं लांगलं च बिभर्ति सा आख्याता रक्तचामुंडा देवी योगेश्वरीति च अनया व्याप्तमखिलं जगत्स्थाव
रजंगमं इमां यः पूजयेद्भक्त्या स व्याप्नोति चराचरं अधीते य इदं नित्यं रक्तदंत्या वपुःस्तवं तं सा परिचरेद्देवी पतिं प्रि
यमिवांगनेति इयमपि ह्यपरतंत्रे चतुर्थांगे वर्तीरीत्याहुः केचित् ४१ अनंभसि जलाभावे अयोनिजा पार्वत्याः कौ
शिकीवत् ४१ यद्यस्मात् यन्मुनीन्निरीक्षिष्यामि तदुपलक्षणात् ये जागरिष्यामि ततः शताक्षीमिति ४२

मा॰ तत्र तस्मिन् अवतारे भरिष्यामि पोषयिष्यामि सुनान् सुराः इति सम्बोधनं आवृष्टेर्वृष्टिं यावत् प्राणधारकैः
पु॰टी॰ प्राणानां जीवनैः ४३ शाकैर्विभर्ति पोषयति लोकान् पत्रमूलकरीराग्रफलकांडाधिरूढकाः त्वक्पुष्पकवचं
३१५ चेति शाकं दशविधं स्मृतं तत्रैव शताक्ष्यवतार एव दुर्गमो रुरुपुत्रः पुरुषान्नेतेम्लति रिति ब्रह्मणो वरः असुरवधे काल
रात्रिर्हंतीति काशीखंडे तद्वधे नेताः शक्तयस्तत्रैव निर्दिष्टाः शताक्षी स्वरूपं तु मूर्तिरहस्ये यथा तत्र शाकंभरी नील
वर्णा नीलोत्पलविलोचना गंभीरनाभिस्त्रिवलीतनुमध्या मनोहरा सुकर्कशसमुत्तुंगवृत्तपीनघनस्तनी भक्ता
न्पालयते देवी निर्मदिव्यासनस्थिता शिलामुष्टिस्रवां दधर्गीकमलं कमलालया पुष्पपल्लवमूलादिफलशाक

ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः भरिष्यामि मुनी शाकैरावृष्टेः प्राणधारकैः ४३
शाकंभरीति विख्यातिं तदा यास्याम्यहं भुवि तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम् ४४
दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले रक्षां
सि भक्षयिष्यामि मुनीनां त्राणकारणात् ४५ ॥

समुद्भवान् प्राणिनां जीवनायाय बिभर्ति शाकमूलकान् कामानंतरसैर्युक्तान्क्षुत्तृण्मृत्युजरापहान् शाकंभरी
शताक्षी सा सैव दुर्गा प्रकीर्तिता उमा गौरी सती चंडी कालिका सैव पार्वती शाकंभरीं स्तुवन्ध्यायन् जपन्संपूजयन्न
मन् अक्षय्यमश्नुते शीघ्रमन्नपानामृतानि चेति चत्वारिंशत्तमे युगे वैवस्वतेंतरे स्याः प्रादुर्भावः यदुक्तं लक्ष्मी
तंत्रे तस्मिन्नेवांतरे शाकं चत्वारिंशत्तमे युगे इति ४४ दुर्गमासुरं हंतीति दुर्गा भीमं भयंकरं त्राणस्य कारणात्तहे ३१५

315

आनम्रमूर्तयो देहा येषां अमुष्याः स्वरूपं तु मूर्तिरहस्ये भीमापि नीलवर्णा सा दंष्ट्रादशनभास्वरा चंद्रहासं च डमरुं शिरः पा
नं च बिभ्रती एकवीरा कालरात्रिर्निह्नात्स्याड्ररत्पयेति पंचाशत्तमे चतुर्युगे वैवस्वतमन्वंतर एव भीमावतार इति लक्ष्मीतंत्रे
शृंकाल्पशः प्रवर्षिता चैत्रेऽस्या ४९ अरुणाख्यो अरुणनामा दैत्यः भ्रमर्या इदं भ्रामरं असंख्येया अगणनीयाः षट्पदा
भ्रमरा यत्र भ्रमरवासिनी च सैव विनष्टोस्थिता अस्याः स्वरूपं च तत्रैव तेजोमंडलदुर्धर्षा भ्रामरी चित्रकांतिभृत् चित्रानुलेप-

तदा मां मुनयः सर्वे स्तोष्यंत्यानम्रमूर्तयः भीमादेवीति विख्यातं तन्मे नाम भविष्यति ४९
यदारुणाख्यस्त्रैलोके महाबाधां करिष्यति तदाहं भ्रामरं रूपं कृत्वा संख्येयषट्पदं ५० त्रैलो
क्यस्य हितार्थाय वधिष्यामि महासुरं भ्रामरीति च मां लोकास्तदा स्तोष्यंति सर्वतः ५१ इत्थं
यदा यदा बाधा दानवोत्था भविष्यति तदा तदावतीर्याहं करिष्याम्यरिसंक्षयं ५२ इति मा
र्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये नारायणीस्तुतिर्नामैकादशोऽध्यायः ११

नानारीसर्वाभरणभूषिता चित्रभ्रमरपाणिः सा महामारीति गीयते महामाया महाकाली महालक्ष्मीः तथाष्टषेसा
दि वैवस्वतेंतरे षष्टितमे चतुर्युगे भ्रामर्यवतार इति लक्ष्मीतंत्रे इयमपि कालंशाप्येवेति ५० वधिष्यामि हनिष्यामि वध
हिंसायामित्यस्य रूपं लोका देवमनुष्यादयः सर्वतः सर्वत्र लोकेषु ५१ अरीणां दैत्यानां सम्यक् निःशेषेण तयं विना
शं ५२ इति मार्कण्डेयपुराणव्याख्याने पण्डितभट्टरामदेवविरचिते चतुरन्तरः प्राततमोध्यायः ११ ॥

वर्षो नर्त्तहिमरश्मिसमानकान्तिर्ग्लादेकमूर्तिरनुभातसमस्तविश्वा सत्कर्मसत्फलविधानमहत्त्वरित्रा सा सिंचता चिन्निरसैर्दृदयं ममेशा
एवं त्रिचरित्रात्मकं त्रिमूर्त्यनुगुणानन्मानप्प्वतारान्विश्वानुग्रहाय प्रादुष्कृतानभिधायेदानीं चरितत्रितयपाठकश्रोत्रादीनामभ्युदयापव
र्गफलप्राप्तये फलमभिधातुं प्रदर्शयति एभिरिति मधुकैटभवधादिलक्षणैः सकलां मे हि कीर्त्यात्मत्रिकीर्ति समाहितएकाग्रचित्तः १ तान्युक्तानि

316

देव्युवाच एभिः स्तवैश्च मां नित्यं स्तोष्यते यः समाहितः तस्याहं सकलां बाधां नाशयिष्याम्यसंशयं १
मधुकैटभनाशं च महिषासुरनाशनं कीर्तयिष्यंति ये तद्वद्वधं शुंभनिशुंभयोः २ अष्टम्यां वा चतुर्द
श्यां नवम्यां चैकचेतसः श्रोष्यंति चैव ये भक्त्या मम माहात्म्यमुत्तमं ३ न तेषां दुष्कृतं किंचिद्दुष्कृतोत्था
न चापदः भविष्यति न दारिद्र्यं न चैवेष्टवियोजनं ४ शत्रुतो न भयं तस्य दस्युतो वा न राजतः न शस्त्रा
नलतोयौघात्कदाचित्संभविष्यति ५ तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः श्रोतव्यं च सदा
भक्त्या परं स्वस्त्ययनं महत् ६

चरितानि निर्दिशति मधुकैटभनाशमिति २ अत्रानुष्ठेयं यागादिकालमाह अष्टम्यामिति उभयोः पक्षयोरेतास्तिथयः कृष्णायां वा चतुर्दश्यामि
ति कीलकोक्तेः श्रोष्यंति चान्यान्श्रावयंति तमसेउद्भूतमुत्तमम् ३ श्रोत्रादीनां फलमाह नेति दुष्कृतं पापं दुष्कृतोत्था स्वातत्रिदैवकाः इष्टवियोजनं वि
रहः ४ दस्युतः चौरेभ्यः तोयौघउदीपः ५ सदा नित्यं स्वस्ति कल्याणं तत्स्वायनं प्राप्यते मार्गस्य परमुत्कृष्टम् महत् अत्यल्पम् ६

महामारीमहाजननक्षयकरी देवतातस्याः समुद्भवो येषांतान् उत्पातान् नानाविधान् उपद्रवान् अशेषान् समस्तान् त्रिविधमाध्यात्मिकं रोगरागद्वेषात्मकं आधिभौतिकं भूतप्रेतयक्षाद्यावेशनिबन्धनं आधिदैविकं वज्रपातदाविद्धानि ध्यक्षादि दिव्यंभौममन्तरिक्षं चेत्यादि त्रिविधमुत्पातम् निष्पातं मम माहात्म्यं शामयेन्नाशयेत् ७ सम्यगिति समाधानेन आयतने मम गृहे नवि मोक्ष्यामि न त्यजेयं तदायतनं तत्र मम सान्निध्यं सन्निहितत्वं स्थिरं अचलं ८ बलिप्रदाने पशाद्युपहारः पूजायाम्

उपसर्गानशेषांस्तुमहामारीसमुद्भवान् तथात्रिविधमुत्पातंमाहात्म्यंशमयेन्मम ७ य
त्रैतत्पठ्यतेसम्यङ्नित्यमायतनेमम सदानतद्विमोक्ष्यामिसान्निध्यंतत्रमेस्थिरं ८ बलिप्र
दानेपूजायामग्निकार्येमहोत्सवे सर्वंममैतन्माहात्म्यमुच्चार्यंश्राव्यमेवचा ९ जानताजा
नतावापिबलिपूजांतथाकृतां प्रतीच्छिष्याम्यहंप्रीत्यावह्निहोमंतथाकृतं १० शरत्काले
महापूजाक्रियतेयाचवार्षिकी तस्यांममैतन्माहात्म्यंश्रुत्वाभक्तिसमन्वितः ११ सर्वबाधा
विनिर्मुक्तोधनधान्यसमन्वितः मनुष्योमत्प्रसादेनभविष्यतिनसंशयः १२

तत्पुष्पादिनार्चने अग्निकार्ये हवने महोत्सवे पुत्रजन्मविवाहादिषु सर्वं सकलं उच्चार्यं पठ्येयं श्राव्यं श्रोतव्यम् ९ जानता विधिविदेन अजानता तद्विपरीतेन तथाविधिविधेन मन्माहात्म्योच्चारश्रवणेरस्मति प्रीत्या भक्त्या वह्निहोमं च कृतं प्रतीच्छिष्यामि स्वीकरोमीत्यर्थः पाठान्तरे प्रतीच्छ्याति अर्थेद एगार्थ इति केचित् १० शारत्काले इषशुक्लप्रतिपदारभ्य क्रियमाणा दुर्गोत्सवात्मिका नवरात्र्यां महापूजा वार्षिकी वर्षादवारंभादागता चैत्रशुक्लप्रतिपदमारभ्य नवरात्रौ विधीयमाना

मा पु
टी
३१७

उत्पत्तीरुत्पत्तयः प्रादुर्भावाः द्वितीयार्थे प्रथमा युद्धेषु शिक्षणपलक्षणं महासंग्रामादिषु च १६ उपपद्यते कल्याणं नैकसंततश्च सदै
वस्यात् नंदते समृद्धिमान् भवति १७ शांतिकर्मणि उपसर्गोपशांतौ उग्रास्वतिदुष्टासु दिनासु १८ उपसर्गा ईतयो दिव्या
भौमांतरिक्षा उपद्रवाः शमं शांतिं दारुणा मरणपर्यवसानाः दुःस्वप्नं स्वप्नाध्यायोक्तं विपरीतसूचकं १९ बालग्रहाः पूतना

श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः पराक्रमं च युद्धेषु जायते निर्भयः पुमान् १६ रिपवः
संक्षयं यांति कल्याणं चोपपद्यते नंदते च कुलं पुंसां माहात्म्यं मम शृण्वतां १७ शांतिकर्मणि सर्वत्र त
था दुःस्वप्नदर्शने ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम १८ उपसर्गाः शमं यांति ग्रहपीडाः सुदा
रुणाः दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते १९ बालग्रहाभिभूतानां बालानां शांतिकारकं सं
घातभेदे च नृणां मैत्रीकरणमुत्तमं २० दुर्वृत्तानामशेषाणां बलहानिकरं परं रक्षोभूतपिशाचा
नां पठनादेव नाशनं २१ सर्वं ममैतन्माहात्म्यं मम सन्निधिकारकं पशुपुष्पार्घ्यधूपैश्च गंधैर्दीपै
स्तथोत्तमैः २२

द्यास्तैरभिभूतानां निःश्रितानीभूतानां शांतिकारकं शांतिसाधनं संघातभेदे सौहृदोच्छेदे मैत्रीकरणं भेदनाशनां मित्रपर्थः उ
त्तमं उत्कृष्टं २० दुर्वृत्तानां दुष्टचरितानां हिंसाराणां अशेषाणां समूलोन्मूलानां बलस्य हानेः करणतः परं निरतिशयं नाशनं दुर्वृ
त्तानां रक्षोभूतेत्यादि २१ सन्निधिकारकं सन्निकर्षसाधनं पशुः बलिसाधनं अर्घ्यमष्टांगं उत्तमैः दीप्तिमद्भिः शुद्धैश्च २२ ॥

317

प्रोक्षणीयैः पंचामृताभिषेकैः प्रक्षालनैः अन्यैश्च विविधैर्भोगैः स्रक्चन्दनपानकादिभिः प्रदानैः ब्राह्मणेभ्यः पात्रे
भ्यः प्रतिपादनैः वासोलंकाररत्नादीनां वत्सरेण अयनद्वयोपलक्षकेण वर्षेण या मम क्रियते प्रीतिरहर्निशं प्रतिदिन
मित्यर्थः इत्युत्तरेणान्वयः २३ अस्मिन्नुदितचरितयात्मके देवीमाहात्म्ये सकृत् एकवारं श्रवणमुपलक्षणं पठनस्यापि त
च्छ्रवणादीनां प्रत्येकं फलमाह श्रुतमिति २४ जन्मनां पूर्वोक्तानां प्रादुर्भावानां दुष्टानां दैत्यानां निवर्हणं संतापनं त

विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशं अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेण या २३
प्रीतिर्मे क्रियते सास्मिन् सकृदुच्चरिते श्रुते श्रुतं हरति पापानि तथारोग्यं प्रयच्छति २४
रक्षां करोति भूतेभ्यो जन्मनां कीर्तनं मम युद्धेषु चरितं यन्मे दुष्टदैत्यनिवर्हणं २५ तस्मिं श्रुते
वैरिकृतं भयं पुंसां न जायते युष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः २६ ब्रह्मणा च
कृतास्ताः प्रयच्छंति शुभां मतिं अरण्ये प्रांतरे वापि दावाग्निपरिवारितः २७ दस्युभिर्वा
वृतः शून्ये गृहीतो वापि शत्रुभिः सिंहव्याघ्रानुयातो वा वने वा वनहस्तिभिः २८ ॥

स्मिन्नित्यन्वयः २५ तस्मिन् दैत्यनिवर्हणे युद्धे देवानां स्तुतयः शक्रादयः इत्यादिकाः ब्रह्मर्षिभिः कृताः नमो देव्याः इत्यादि-
काः ऋषिभिः सहितदेवानां ताः स्तुतयः २६ ब्रह्मणा च मधुकैटभवधे विश्वबोधनार्थं त्वं स्वाहा इत्यादिकाः शुभां भोगापवर्ग-
साधनपरां अरण्ये वने प्रांतरे दूरशून्ये अध्वनि २७ दस्युभिः पाटच्चरैः आवृतो वशीकृतः अनुयातः पश्चाद्द्रुतः २८

मा॰ क्रुद्धेनराज्ञावध्योयमित्याज्ञप्तः अथवाबंधगतः कारागतः आघूर्णितः परिभ्रामितः पोतेयानपात्रे २९ सर्वास्वबाधासुघ
पु॰टी॰ रापीडासवेदनयादुःखेनाभ्यर्दितः पीडितः ३० संकटाद्दुःखात् ३१ । ३२ अंतरधीयत अंतर्हिताभवत् ३३ निरातंकानिर्बा
३१८

राज्ञाक्रुद्धेनचाज्ञप्तोवध्योवंधगतोपिवा आघूर्णितोवावातेनस्थितः पोतेमहार्णवे २९
पतत्सुचापिशस्त्रेषुसंग्रामेभृशदारुणे सर्वबाधासुघोरासुवेदनाभ्यर्दितोपिवा ३०
स्मरन्ममैतच्चरितंनरोमुच्येतसंकटात् ममप्रभावात्सिंहाद्यादस्यवोवैरिणस्तथा ३१ दू
रादेवपलायंतेस्मरतश्चरितंमम ३२ ऋषिरुवाच इत्युक्त्वासाभगवतीचंडिकाचंडविक्र
मा पश्यतांसर्वदेवानांतत्रैवांतरधीयत ३३ तेपिदेवानिरातंकाः स्वाधिकारान्यथापुरा य
ज्ञभागभुजः सर्वेचक्रुर्विनिहितारयः ३४ दैत्याश्चदेव्यानिहतेशुंभेदेवरिपौयुधि जगद्वि
ध्वंसकेतस्मिन्महोग्रेतुलविक्रमे ३५ निशुंभेचमहावीर्येशेषाः पातालमाययुः एवंभग
वतीदेवीसानित्यापिपुनः पुनः संभूयकुरुतेभूपजगतः परिपालनम् ३६

धाः स्वाधिकारान्चक्रुः ३४ दैत्याश्चपातालमाययुः शेषास्तेभ्यः शिष्टाः सार्थेनसंबंधः ३५ एवंप्रथमाध्यायादारभ्य
भगवत्कादिसादेवीसादिनाराज्ञादृष्टान्भगवत्याउत्पन्नान्मधुकैटभादीन्तत्रपित्वापुनोपसंहरतेमाह एवमित्यादिनासंभूयआवि
३१८

पुनरपि देव्या माहात्म्यमुपनयति तयैतदिति ऋद्धिं धनं संपद्वृद्धिं ३७ व्याप्तमिति संवित्स्वभावत्वात् तया महाकाल्या पराशक्तिरूपया महान् कालयति सर्वमादिनाशयति महामायाम नृत्यमपि मोहिनी त्विति तो स्वरूपेयस्यास्तया व्याप्तं स कलमिति संबंधः ३८ काले संहारे महामारी संहारशक्तिः सृष्टिः सृष्टिशक्तिः अजा जन्मरहिता काले स्थितिसमये नृणां चैतेषां नाशे तस्याभावः संभावनीयेत्यापायेनाह सनातनी अविनाशिनी अविनाशी वाग्रे स्वयमात्मेति अविनाशित्वतदृद्धीतिस्त्र

तयैतन्मोह्यते विश्वं सैव विश्वं प्रसूयते सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति ३७ व्याप्तं तयैतत्सकलं ब्रह्माण्डं मनुजेश्वर महाकाल्या महाकाली महामायास्वरूपया ३८ सैव काले महामारी सैव सृष्टिर्भवत्यजा स्थितिं करोति भूतानां सैव काले सनातनी ३९ भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे सैवाभावे तथालक्ष्मीर्विनाशायोपजायते ४० स्तुता संपूजिता पुष्पैर्धूपगन्धादिभिस्तथा ददाति वित्तं पुत्रांश्च मतिं धर्मे गतिं शुभां ४१ इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये फलानुकीर्तनं नाम द्वादशोऽध्यायः ९५

तिस्रस्तयोः ३९ भवकाले संपत्समये अभावे अलक्ष्मीसमये ४० ४१ आदितः पंचोत्तरः शततमोऽध्यायः इति षड्भिर्मदरा मचंद्रविरचिते मार्कण्डेयपुराणव्याख्याने देवीमाहात्म्योद्योते ध्यायः यत्पादपंकजरजोमकरंदभृंगाः पीत्वा पदुः प्रियतलता निजहार्दसितां सद्भक्तिमद्भि[illegible]रनुगीतसमान्मभावो नरसंप्राविस्तु महिमास्फुरतान्ममांतः ॥

319

एवं देवीमाहात्म्यं संपूर्णमभिधायेदानीं विपन्नाशायतच्छरणाश्रयणमुभयोः श्रेय इति तद्देवभूपः श्रद्धादार्ढ्यायोपदि शति एवमिति पूर्वोक्तप्रकारेण १ विद्यातत्त्वज्ञानेन तयैव क्रियते तयैव भगवद्विष्णुमायानुरूपयामोहनं च क्रियते तदाहुस्त येति अपरे च तयैवेदं तु भूतयामोहमेष्यन्ति २३ एवं देवीमाहात्म्यमेयोपसेवनप्रतिपाद्य मार्कंडेयः क्रोष्टुकिं प्रतीति निवेदयति इतीति संशितं तीक्ष्णं व्रतं यस्य ४ देवीशरणाश्रयणे निर्वेदो मुख्यमंगमित्याशयेनाह निर्विण्ण इति मम

ऋषिरुवाच एतत्ते कथितं भूप देवीमाहात्म्यमुत्तमं एवंप्रभावा सा देवी ययेदं धार्यते जगत् १
विद्या तयैव क्रियते भगवद्विष्णुमायया तया त्वमेष वैश्यश्च तथैवान्ये विवेकिनः मोह्यन्ते मो
हिताश्चैव मोहमेष्यन्ति चापरे २ तामुपैहि महाराज शरणं परमेश्वरीं आराधिता सैव नृ
णां भोगस्वर्गापवर्गदा ३ मार्कण्डेय उवाच इति तस्य वचः श्रुत्वा सुरथः स नराधिपः प्र
णिपत्य महाभागं तमृषिं संशितव्रतं ४ निर्विण्णोऽतिममत्वेन राज्यापहरणेन च जगाम
सद्यस्तपसे स च वैश्यो महामुने ५ संदर्शनार्थमम्बाया नदीपुलिनसंस्थितः स च वैश्यस्त

त्वेन स्वीयत्वनिश्चयेन राज्यस्यापहरणेन च निर्विण्णो दुःखाक्रान्तः ५ पुलिनं तटं देवीसूक्तं ऋग्वेदादिप्रसिद्धं त्रिभुवरितेषु त्रिसूक्तमिति केचित् अन्ये तु नमो देव्या इत्यादिकं पंचमाध्यायोक्तमाहुः कात्यायनीतंत्रोक्तरीत्या जंतोर पश्चिमतत्त्वे नारीत्यादिकं चिंतयेद्देवीसूक्तमित्यपरे प्राणायामः संस्थितं बीजं वोमवीजं ऊतारानं त्रिकोणविन्दुनारा

महीमयींमृन्मयीं अर्हणांपूजां ७ निराहारौकृतानशनौतन्मनस्कौदेवीध्याननिष्ठौसमाहितौसंयतकायचेष्टौ निजस्वगात्र
स्वशरीरस्यासृजारक्तेनोक्षितंवलिंचपुष्पादिनैवेद्यादिकंच ८ यतात्मनोर्निरुद्धमनसोः प्रसन्नमाविर्भूयेतिशेषः ९ कुलनं
दनेतिसम्बोधनंत्वनार्थितयायोग्यं वाञ्छितं प्राप्यतांलभ्यतां १० अविभ्रंशितिभ्रंशेणनाशेनाचलं अत्रैवअस्मिन्नेवजन्मनि

न्नौतस्मिन्पुलिनेदेव्याःकृत्वामूर्तिंमहीमयीं अर्हणांचक्रतुस्तस्याःपुष्पधूपाग्नितर्पणैः नि-
राहारौयतात्मानौतन्मनस्कौसमाहितौ ददतुस्तौवलिंचैवनिजगात्रासृगुक्षितं ८ एवंसमा
राधयतोस्त्रिभिर्वर्षैर्यतात्मनोः परितुष्टाजगद्धात्रीप्रत्यक्षंप्राहचंडिका ९ देव्युवाच यत्प्रार्
थ्यतेत्वयाभूपत्वयाचकुलनंदन मत्तस्तत्प्राप्यतांसर्वंपरितुष्टाददामितं १० मार्कंडेयउ॰
ततोवव्रेनृपोराज्यमविभ्रंश्यन्यजन्मनि अत्रैवचनिजंराज्यंहतशत्रुवलंवलात् ११ सोपिवैश्यो
निजंज्ञानंवव्रेनिर्विण्णमानसः ममेत्यहमितिप्राज्ञःसंगविच्युतिकारकं १ देव्युवाच स्वल्पै
रहोभिर्नृपतेस्वंराज्यंप्राप्स्यतेभवान् हत्वारिपून्नःस्खलितंतवतत्रभविष्यति १२ मृतश्च
भूयःसंप्राप्यजन्मदेवाद्विवस्वतः सावर्णिकोमनुर्नामभवान्भुविभविष्यति १४

हतंशत्रूणांवलंयत्रतद्राज्यं ११ निजंस्वात्मीयंज्ञानंतत्त्वज्ञानंनिर्विण्णमानसः विरक्तचित्तःज्ञानंविशेषयति ममेत्यहमितीति
रूपेवंरूपोयःसंगस्तस्यविच्युतेः सकारकविनाशस्यकारकंसाधनं प्राज्ञः प्रकृष्टतायांप्रवुद्धत्वात् १२ अस्खलितंअभ्रंशिनींनत

मा॰
पु॰टी॰
३२॰

संसिद्धैः मत्कृते १५ ॥ देव्याः सकाशात् भविता भविष्यति ८ कात्यायनीतंत्रे अष्टसप्तत्युत्तरायणं श्लोकानां शतपंचकं श्लो
कं शतपंचकं प्रोक्तं सप्तशतीस्तोत्रे तत्तत्सप्तशतसंख्यया विभज्यानुदयान्मंत्रमिति कात्यायनीमते वाराहीतंत्रेव प्रोक्ते
को भगवानेको मार्कंडेयास्तु मार्गणाः देवाः पंचर्षयस्त्रिंशद्देवीद्वादशकं तथा इतवेशेषोऽभवद्देवो ह्यभजो वाचेति भाषि
तः अर्धानि द्वे वा परयोर्मध्ये षोडशषोडश अर्धानि सप्तचेहैव श्लोकाः पंचशतं तथा श्लोकानां चतुरशीतिः व्या
याश्च त्रयोदश एवमावृत्तयः सप्तशतं वेतर्पणस्य चेति मंत्रविनिर्णयः मारिचकल्पे अर्गलं ह्रदितं दंतिकीलकाप

वैश्य वर्य त्वया यश्च वरो स्मत्तो भिवांछितः तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति १५
मार्कंडेय उवाच इति दत्वा तयोर्देवी यथाभिलषितं वरं बभूवांतर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता १६ एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः १७ इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये वरप्रदानं नाम त्रयोदशोऽध्यायः १३ देवीमाहात्म्यं सावर्णिमन्वंतरमष्टमं समाप्तम् ॥

लं दंतथा अर्गलं कीलकं चादौ पठित्वा कवचं पठेत् शाविन्त्यं पठेदादौ मध्ये सप्तशतीस्तवं प्रांते वजपनीयं तद्देवीसूक्तमंत्र
नमे एवं संपुटितं स्तोत्रं सर्वकामार्थसिद्धिदं अर्गलं हृदयं यस्य सर्वत्र कवचः स्वतः भविष्यतीति निश्चित्य शिवेन रचितं पुरा कील
कं हृदये यस्य संकीलितमनोरथः भविष्यति न संदेहो नान्यथा शिवभाषितं पातमारो प्रांतं चांते जपेन्मंत्रं नवार्णं चांतेस

नरं तत्स्वं चंडिकायाः प्रसिद्धं इति पाठक्रमविनिर्णयः अर्थं पठेन्न १७ प
उतरः पाठक्रमो यथा

३२॰

प्रोक्तमन्वन्तरमिति सावर्णिकमिति १२ शिवहत्यामाहात्म्यं सर्वैश्वर्यस्य महादेवस्य हतत्वरूपं ३ एवमुक्तमनूद्यान्यदवतारयति

मार्कंडेय उवाच सावर्णिकमिदं प्रोक्तं सम्यङ्मन्वन्तरं तव तथैव देवीमाहात्म्यं महिषासुरनाश
ने १ उत्पत्तिर्यस्तथा देव्या मातृणां च महाहवे तथैव संभवो देव्याश्चामुंडाया यथाभवत् २
शिवदूत्याश्च माहात्म्यं वधः शुंभनिशुंभयोः रक्तबीजवधश्चैव सर्वमेतन्मयोदितं ३ श्रूयतां
मुनिशार्दूल सावर्णिकमथापरं दक्षपुत्रश्च सावर्णिर्भावी यो नवमो मनुः कथयामि मनो
स्तस्य ये देवा मुनयो नृपाः ४ पारा मरीचिगर्भाश्च सुधर्माणस्तथा सुराः एते त्रिधा भविष्य
न्ति सर्वे द्वादशका गणाः ५ तेषामिन्द्रो भविष्यस्तु सहस्राक्षो महाबलः अद्भुतो नाम कुलि
शी गजेन्द्रवरवाहनः ६ सोऽभवत्कार्तिकेयो यो वह्निपुत्रः षडाननः अद्भुतो नाम शक्रो भा
वी तस्मिन्नवमे मनोः ७ मेधातिथिर्वसुः सत्यो ज्योतिष्मान्द्युतिमांस्तथा सप्तर्षयोऽन्यः सव
नस्तथान्यो हव्यवाहनः ८ धृष्टकेतुर्बर्हकेतुः पंचहस्तो निरामयः पृथुश्रवास्तथार्चि
ष्मान्भूरिद्युम्नो बृहद्बलः एते भूते सुतास्तस्य दक्षपुत्रस्य वै नृपाः मनोस्तु दशमस्यान्यच्छृ
णु मन्वन्तरे द्विज ९ इति दक्षपुत्रसावर्णमन्वन्तरं नवमं ५।

श्रूयतामिति भावी भविष्यः ४ पारादयो देवास्त्रिधा द्वादशगणसहिताः प्रत्येकं भविष्यंतीत्यर्थः ५ ६ ७ ८ ९ दशमे मन्वन्तरे ॥

मा॰ रंभ्रतित्वात्तंदर्शयति मन्वंतरेचदशमइत्यादिना ११ देवानांप्राणशतानांधिष्ठातृत्वाच्छतं १२ सहस्राक्षवज्रित्वादिभि

पु॰ टी॰

३२१

मन्वंतरेतुदशमेब्रह्मपुत्रस्सुधीमतः सुवाशिनोनिरुद्धाश्चद्विप्रकाराः सुराः स्मृताः ११
यत्प्राणानांशतंभावितद्देवानांतदाशतं शतसंख्याहितेदेवाभविष्याभाविनोमनोः १२
शांतिरिन्द्रस्तदादेवःसर्वैरिन्द्रगुणैर्युतः सप्तर्षीन्मुनिवोयत्नेयभविष्यंतिवैतदा १३ आ
पोमूर्तिर्हविष्मांश्चसुकृतीसत्यएवच नाभागोऽप्रतिमश्चैववसिष्ठश्चैवसप्तमः १४ सु
क्षेत्रश्चोत्तमौजाश्चभूरिषेणश्चवीर्यवान् शतानीकोवृषभोनिरमित्रोजयद्रथः १५
भूरिद्युम्नःसुपार्श्वश्चसुतास्तेतनयामनोः भविष्यायर्मपुत्रस्यसावर्णस्यांतरेशृणु १६
इतिब्रह्मपुत्रपुत्रमन्वंतरंदशमं विहंगमाःकामगाश्चनिर्वाणरतयस्तथा विप्रकारा
भविष्यतिपंचैकस्त्रिंशकोगणः १७ मासस्तुदिवसायेतुनिर्वाणरतयस्तुते विहंगमा
रात्र्याख्यामुहूर्ताःकामगागणाः १८ इन्द्रोवृषाख्योभवितातेषांप्रख्यातविक्रमः हवि
ष्मांश्चवरिष्ठश्चऋष्टिरन्यस्तथारुणिः १९ निश्चरश्चानघश्चैववविष्टिस्त्वोमहामुनिः स

गुणैः १३ १४ १५।१६ एकादशंमन्वंतरंनिरूपयितुमाह विहंगमाइति १७ तेषामधिकारंविभजते मासास्त्विति मुहूर्ते
भ्यश्चागणामौहूर्ताः १८ मनीन्द्रंदर्शयति हविष्मानिति सार्धेन १९ अन्यश्चेति विष्टिविशेषणम् २०॥

सप्तर्षयोनरेतासिनमिदेवतेजाश्चसत्तमः ९

२१ द्वादशमन्वन्तरं वक्तुं प्रतिजानीते द्वादश इति सवर्ण एव सावर्णिः पूर्वैर्मनुभिः समानवर्णत्वात्सर्वे मनवः सावर्णा एव २२ २३ २४ २५

सर्वत्रगः सुशर्मा च देवानीकः पुरूद्वहः क्षेमधन्वा दृढायुश्च भाविनस्तत्सुता नृपाः २१ इति धर्म
पुत्रमन्वन्तरमेकादशं द्वादशो रुद्रपुत्रस्य प्राप्ते मन्वन्तरे मनोः सावर्णाख्यस्य ये देवास्तान्यश्च शृणु
ष्वतान् २२ सुकर्माणः सुमनसो हरिता रोहितास्तथा सुवर्णाश्च सुरास्तत्र पंचैते दशका ग
णाः २३ तेषामिन्द्रस्तु विज्ञेय ऋतधामा महाबलः सर्वैरिन्द्रगुणैर्युक्तः सप्तर्षीनपि मे शृणु
द्युतिस्तपस्वी सुतपास्तपोमूर्तिस्तपोनिधिः तपोरतिस्तथैवान्यः सप्तमस्तु तपोधृतिः २५
देववानुपदेवश्च देवश्रेष्ठो विदूरथः मित्रवान्मित्रविन्दश्च भाविनस्तनया नृपाः २६ रुद्रपुत्रम
न्वंतरे द्वादश त्रयोदशस्य पर्याये रौच्याख्यस्य मनोः सुतान् सप्तर्षींश्च नृपांश्चैव यद्देवा
निशामय २७ सुधर्माणः सुरास्तत्र सुकर्माणस्तथापरे सुशर्माणः सुरास्तेत सप्तमस्ता
श्रुतिसत्तम २८ महाबलो महावीर्यस्तेषामिन्द्रो बृहस्पतिः भविष्यत्यथ सप्तर्षीनादतो
मे निशामय २९ धृतिमानव्ययश्चैव तत्त्वदर्शी निरुत्सुकः निर्मोहः सुतपाश्चान्यो निष्प्रक
म्पश्च सप्तमः

त्रयोदशं मन्वन्तरं प्रतिपादयति त्रयोदशस्येति पर्याये परिवर्तने रुचेः प्रजापतेरपत्यं रौच्यः गर्गादित्वाद्यञ् २७ २८ २९ ३०॥

तस्यैव रौच्यस्य मनोः सुताः ३१ आदितः समाप्तिकः षण्णवतितमोऽध्यायः रौच्यस्य मन्वंतराधिकारप्राप्तिः पितृप्रसादादिति प्रपंचयन्तु विप्रजापतेः पितृस्तवोदीरणतत्प्राप्तिरिति प्रतिपादयति रुचिरिति यत्र सूर्योऽस्तमितस्तत्र शेते इति शीलं यस्य स तथा अनेन यायावरवानप्रस्थधर्मे विहृत्या पृथिवीमिमां चचार १ अनग्निः श्रौतस्मार्ताग्निहीनः अनिकेतं गृहशून्यं एकाशिनं वा निया. वसथो गृहं माश्रयोऽस्य स्यात् एवं विमुक्तः संगो येन तस्य रुचेः पितरो स्वयं प्रोचुरित्यन्वयः २ पुण्यः पावनत्वात् दाराणां

तन्मार्त्तिं ११ अण्डं विशिनष्टि ब्रह्मस्वरूपमिति ब्रह्मणः सद्रूपस्य निर्विशेषस्य स्वमसाधारणं रूपं अशेषाणां जगतां परम
यनं स्थानं सर्गे आदिभूतं स्थितौ मध्यभूतं अन्ते संहारे अन्तभूतं स्वभाव बीजात्मना वस्थानमित्यादिना मण्डाज्ज्ञानं भवदजा
यतेति तृतीयेनान्वयः १२

भा पु
टी
२४१

तस्य जगज्जन्मादिहेतुत्वमाह यत इति यतो यस्मादभिन्ननिमित्तोपादानात्कारणात् आविर्भूतमिति शेषः इदमिति प्रत्यक्षतयोप
लभ्यमानं ब्रह्माण्डात्मकं जगत् यस्मिन्नेव चाशेषं सकार्यकारणं स्थितं सदात्मकतयावस्थितं यस्य स्वशैशास्थितौ स्थितः ईक्षणस्वभावः
कारणं तत्कार्यं वर्तमाने पितद्रूपमेवेत्याह यदिति यः स्वरूपो यस्य तत्स्वरूपं स्वस्वभावप्रकाशात्मकं सदेवादिकं जगत्स्थावरजंगमा
त्मको विश्वप्रपंचश्च यत्स्वरूपमेवेत्यर्थः आत्मायावापृथिवी अंतरिक्षं सूर्य आत्मा जगतस्तस्थुषश्चेति श्रुतेः १२ किंच यः सर्वभूतः अक्ष

341

यतोऽखिलमिदं यस्मिन्नशेषं च स्थितं द्विज यत्स्वरूपं जगच्चेदं सदेवासुरमानुषम् ३ यः सर्वभू
तः सर्वात्मा परमात्मा सनातनः अदित्या मम भवता सम्यक् सर्वमाराधितस्तया १४ कौतुकं तव
च भगवञ्छ्रोतुमिच्छामि यत्स्वरूपं विवस्वतः यत्कारणं ह्यादिदेवः सोऽभवत्कश्यपात्मजः १५
यथा चाराधितो देव्या सोऽदित्या कश्यपेन च आराधितेन चोक्तं यत्तेन देवेन भास्वता १६ प्रभा
वे चावतीर्णस्य यथावन्मुनिसत्तम भवता कथितं सम्यक् श्रोतुमिच्छाम्यशेषतः ७

नीत्यासर्वस्य व्यवहाराय परिकल्पितस्य साधनादेः स्वरूपस्य यथावद्विदादिमत्त्वत्कार्यकारणावस्थितः समर्थः तत्रहेतुः सर्वात्मा
सर्वमात्मा यस्य सर्वस्य वात्मा सर्वात्मत्वेनोपहितत्वमाशंक्योक्तं परमात्मेति निर्विकार चिदानंदघनः सनातनः कालानवच्छिन्नः
ति निर्विशेषं ब्रह्मैव जगत्पालनायादित्यां भास्वान्प्रकाशातिशयप्रकृतेजा यतन कर्मणा रतं प्रेरणेन रवत्स्य प्रादुर्भावः किंतु मत्के छा
न विधायिकेनावतारकृदित्याह सर्वमिति तयादित्या १४ एवं सामान्येन विदादिमत्स्वस्वरूपप्रश्नं कृत्वा तद्विशेषविजिज्ञासया पृच्छति

२४१

श्लोकत्रितयेन पृष्टान्यत्स्वरूपादीन्प्रक्रमेणोत्तरयंस्तत्र यत्स्वरूपमित्यस्य प्रश्नस्योत्तरमाह विशुद्धेति निर्विशेषब्रह्मणस्ता
दृशीः स्वशक्त्यात्मिकाः स्वाभिन्नाः शक्तीराह तत्र विशुद्धेति प्रकाशैकरसस्यापि एकरूपत्वात्संविदात्मकतया प्रकटा तत्र हेतुः परमा
निर्विशेषबोधपरामर्शस्वभावतयोत्कृष्टा विद्या ज्ञानक्रियात्मिका सम्यगसैव विदाभासेषु विभ्वितता ज्योतिःप्रकाशाः जीवा
त्मानः तेषां भाः प्रकाशात्मिका स्वस्वविषयासंवित् जीवात्मनां शरीरतिरोभावादिषु तस्याः संविदो नाशमिवाशंक्याह
शाश्वती शश्वद्भवत्वात् न तु जीवात्मवदाविर्भावतिरोभावाद्यज्ञाता तस्यैव जगतदंकुरभावेणोच्छूनत्वात् स्फुटा जग
जननकारीनां सम्यक्व्याख्यानां तत्स्वभावतया स्थितानेषु स्फुटा बीजस्याकुरायमाणत्वादिफलबीजाद्यवस्थापेनेनसस्यकस्यापि तत्का
र्यकारित्वासंभवात्मकत्वैवमेव च सूक्ष्मात्मनां कैवल्यं ब्रह्मात्मैकं तस्य च सूक्ष्मत्वं साधनेस्थूलादिभ्यो विविच्य तदात्मकतयावस्थानं

मार्कण्डेय उवाच विशुद्धा परमा विद्या ज्योतिर्भाः शाश्वती स्फुटा केवलं ज्ञानमाविर्भावः प्राका
म्यं संविदेव च १८ बोधश्चावगतिर्व्याप्तिर्विज्ञानमेव च इत्येतानीह रूपाणि तस्य रूपस्य भास्वतः

ज्ञानं ज्ञप्तिरूपं तस्यैव च ज्ञानस्य श्रोत्रादीन्द्रियद्वारेण निर्गतस्य रूपादिविषयावभासनात्मकत्वमाविर्भाव आविर्भावो नाम रूपादिप्रख्या
प्रादुर्भावः अत एव सर्वात्मकत्वात्प्राकाम्यमिच्छानभिघातानन्तदात्मनावस्थानेनस्थूलभौतिकवशीकरणस्वभावः तेषु भूता
दिषु करूपेष्वव्यावर्तमानेषु अतीतेषु च व्याहतानागतप्रसक्तभावासंविदित्यर्थः १८ तस्यैव प्रसक्तया निर्विशेषब्रह्मसाक्षा
त्कारो बोधः तस्यैव समवगतिः अनुष्ठानक्रमेणैव तत्प्राप्तिरित्यर्थः व्याप्तिरनुभूतविषयासंप्रमोषो ब्रह्माभ्यासितविंज्ञाताम
णिनं प्रमाणापादनादिभावलक्ष्यविभवत्वात् तदेवेंद्रियद्वारानिर्गतविषयान्तःकरणेऽध्यात्मकप्रज्ञानक्रमेणसर्वावस्था
सविशिष्टाहंतास्वभावतया स्फुरणं विज्ञानमित्येतानि रूपाणीह जगति तस्य रूपस्य रूपादिहीनस्य विशुद्धदयः शक्त्यो
मूर्तयः नहि शक्तिं विना शक्तिमतो रूपं किंचिदुपलभ्यते शक्तिर्हि शक्तिमतोऽभिन्नेति तद्रूपनिरूपणेन भास्वतः स्वरूपमुक्तम् १९

भा॰ पु॰
टी॰
३५२

342

एवं यत्स्वरूपं विवस्वतः स्वस्वप्रभस्य निर्विकारसर्वाकाराकारितत्वं चिदात्मस्य स्वरूपमभिहितमिदानीमरविंदाक्षप्रपाद्यन्नमपरिग्रहणे
निमित्तं वदन् स्वस्वरूपमिस्मितदेवप्रपंचयन्नाह अयतामिति चकारेण स्वरूपनिरूपणेनैवाविर्भावद्योतकः २० तत्रप्रलयावशिष्टं
कारणात्मनावस्थितं परमात्मात्मकं स्वरूपमाह निष्प्रभइति निष्प्रभे प्रभया ज्योतिरादिप्रकाशशून्ये अस्मिन्जगति अतएव नि
रालोके सकलभावप्रकाशशून्ये आलोकः भावप्रकाशसाधनं उद्योतः तत्र हेतुः सर्वतः दिग्विभागस्थापितमसा अन्धकारेणा वृता
वृते नाहते तथा च श्रुतिः असद्वेदं नामरूपप्रकाशशून्यमग्रे आसीमम आसीमससाह्ध्मप्रकेतमिति स्फतिश्च तत्तमसिमितनं
भीरंनतेजोनतमस्ततम् अनाख्यमनभिव्यक्तं सत्किंचिदवशिष्यतइति अनेन प्रागुक्ताया मायाया अपि सत्वं निषिध्य तच्छेना
विहितं यदासीत्तम सत्त्वमहिप्राज्ञायनेतितमोमात्रादाण्डे स्मतिमाह इहदिति व्यापकं पकं स्फुरत्वं अतारं नत्वं व्यापकं वा

अयतां च महाभाग विस्तराद्रूदतो मम यत्र श्वानसि वेराविर्भावो यथाभवत् २० निष्प्र
भेस्मिन्निरालोके सर्वतस्तमसावृते बृहदण्डमभूदेकमक्षरं कारणं परम् २१ तस्मिन्नदंतद
तस्यो भगवान् पितामहः पद्मयोनिः स्वयं ब्रह्मा यः स्रष्टा जगतां प्रभुः २२

शब्दात्मकमोंकारवर्णात्मकं च परं कारणमिति विवादाध्यासितानां व्यतिरिक्तानां जगदतः पातितं महदादीनामपिका
रणं स्रष्टृजगत्पालनाया अवताराणामनेकानां मूलभूतं च पुरुषावतारस्यैव सर्वावतारवीजभूतत्वात् तथा चोक्तं भागवते
जगृहे पौरुषं रूपं भगवान्महदादिभिः संभूतं षोडशकलमादौ लोकसिसृक्षयेति वैराजं रूपमुक्त्वा एतन्नानावताराणां निधानं
वीजमव्ययम् यस्यांशांशेन सृज्यंते देवतिर्यङ्नरादयः इत्यादि २१ तदण्डे तस्यांतः स्थः सूत्रात्माप्राणरूपो भगवानिति सर्जने
सर्वप्रमुखः सर्वेषामपि सर्वजत्वात् पितामहः अण्डांतराविर्भूतलोकपद्मोद्भवः स्वयमीश्वरः ब्रह्मा ब्रह्मात्मकत्वात् जग
तांस्रष्टा यतः प्रभुः प्रभवणशीलः विभेदसर्वभुवनभूतभौतिकाध्यात्माधिदैवाधिभूततत्तत्तया विभागेनस्थापयामासेत्यर्थः २२

तस्यतदंतरेचराचरस्यजगतःशब्दद्वारेणसृष्टिमाह तस्मादिति तस्यब्रह्मणोमुखान्निःश्वासोत्पन्नाकाशवाय्वात्मकप्रयत्नवि
शेषतयाश्रुतःशब्दात्मकोमितिशब्दोमहान्व्यापकोभूत्प्रादुर्बभूवेत्यर्थः अस्यशब्दात्मकस्यवाचकस्यवाच्यमर्थविभागंमात्रात्रि
तयात्मकस्याह ततइति अकारमात्रायाभूरितिप्रादुर्भूतंउकारमात्रायाभुवरिति तस्मादनंतरंस्वरितिमकारमात्रायावाच्यं
बभूव २३ एतेषांसमाख्यामाह एताइति तिस्रोभूरादयोकारादिवाच्याव्याहृतयोजल्पितानितदेवचविवस्वतोजगत्स्था
पकस्यस्थूलंवैराजात्मकंस्वरूपमित्यर्थः तस्यसूक्ष्मंरूपमाह ओमिति अस्मात्स्वरूपात्स्वकाशाद्धिरण्यवैश्वानरादिसमष्टिव्य
ष्टिरूपावस्थात्रितयसाक्षिजीवात्मकसूक्ष्मस्वरूपप्रादुर्भावइत्याह सूक्ष्मरूपमितिसर्वास्पदत्वात् परमुत्कृष्टंस्थूलस्यसूक्ष्मे

तस्मात्स्वरादोमितिमहानभूच्छब्दोमहामुने ततोभूस्तद्भुवस्तस्मात्तस्मात्स्वस्तदनंतरम् २३ एताव्या
हृतयस्तिस्रः स्वरूपंतद्विवस्वतः ओमित्यस्मात्स्वरूपात्तुसूक्ष्मरूपंरवेःपरम् २४ ततोमहदिति
स्थूलेजनंस्थूलतरंततः तपस्तपस्ततःसत्यमितिस्थानानिसप्तधा २५ स्थितानितत्स्वरूपाणि
भवंतिनभवंतिच अभावभावयोर्भावंयतोगच्छंतिसंशयम् २६

णीवस्तत्वात् तस्यैवचभावाभावयोःस्थूलेनान्वयाद्व्यावृत्तेश्चसंसारस्तूपलंभः २६ एवंभूर्भुवःस्वरादयोलोकाव्याहृतय
ओंकारवाच्याःसूक्ष्मामूर्तीरवेश्चिदादिस्वस्याभिधायाध्रुनामानभोगानंदादिनास्थूलामूर्तीर्महदादयोरवेर्भवंतीत्याह ततइति
तस्मादोंकारादेवजातमित्यत्रशेषः इत्थंसप्तधारवेर्मूर्तानिरूपाणियानिस्थितानितानिभवंतिसद्रूपाद्ब्रह्मणोभिन्नत्वात्सभा
भांजिसंति मूर्तामूर्तानिभूतानिरज्जुरगजलतरंगादिन्यायेनाविषयातावन्मात्रकल्पितत्वात्तानेनसर्वंखल्विदंब्रह्मेतिश्रु
त्याब्रह्मात्मकतयाभिहितत्वान्नभवंति सुषुप्तिप्रलयादिषुसर्वस्यविशेषस्यविलयदर्शनादसत्त्वाभांजिभवंति तदोंका

राच्छिन्नकाशादाविर्भूतानि मूर्तानि अमूर्तानि च सदसदात्मानि विकल्पभांजि सत्यानि असत्यानि ते पुभवंति न भवंति च सदसद्भावविक
ल्पने हेतुमाह भावाभावयोरिति स्थूलसूक्ष्मयोः सदसतोर्भावे भावनायां यतो हेतोः संशयं स्थूलस्य सूक्ष्मस्य च निरूपणो गच्छं
ति गहनत्वानंतत्वाभ्यां दुर्लभत्वाच्चिदादितस्य स्थूलामूर्तिरपि च्छेद्यापर्वं सूक्ष्मस्यापि सदसद्रूपत्वेन परमाणोरप्यत्य
णीयस्त्वादचिंत्यत्वमेवेत्युभयोरपि सान्दिग्धत्वमेवेति यदुक्तमभियुक्तेन श्रीसाम्बेन स्थूलत्वं ते भक्तिगहनं नैवलक्ष्यं
नैतत्सूक्ष्मत्वं वा तदपि सदसद्रूपत्वाभावादचिंत्यम् ध्यायामीत्थं कथमविदितं त्वामनाद्यंतमंत तस्मात्वर्क प्रणायितिमयि
सात्मनैव प्रसीदेति २९ अस्य सर्वलोकस्याधिष्ठानं चिदाकाशात्मकं मात्रोर्णिरूपमाह आद्यंतमिति यज्जगत आदौ सर्गे
मूलकारणं अंते प्रलये च शिष्टं विलयाधिष्ठानं सर्वविलयस्याधिष्ठानावधित्वात् यत्परं पालकं धारकं च सूक्ष्मं परमाणोर्यो

आद्यंतं यत्परं सूक्ष्ममरूपं परमे स्थितम् ओमित्युक्तं मया विप्र तत्परं ब्रह्म तद्विदुः २७ स वासु
देवः स परः स विष्णुर्हरिरच्युतः तपो दमः शमः सत्यं यस्मादेव प्रसूयते २८

णीयान्महतो महीयान् इति श्रुतेः अरूपमनिर्देश्यं परमं चिदानन्दपरसंपत्रा स्वभावं स्थितं स्थितिरूपतया
प्रादुर्भूतं देशकालाद्यपरिच्छिन्नतया वेद्याचिंत्यम् अस्य वाचकमाह ओमित्युक्तमिति हे विप्र भागुरे मया पूर्वमोंकारनिरू
पणे उक्तमर्धमात्रावाच्यं तुरीयचैतन्यं यत्परं ब्रह्म ब्रह्माभिधानं चितया भिधेयं तद्विदुर्ज्ञानिनः सनकादयो ज्ञानयः २७ सर्वलोके स्थि
तमित्युक्तं प्रपंचयति स वासुदेव इति वासुदेवः सकलजगदावासप्रकाशात्मा परमेश्वरः व्यापनप्रवेशनतया विष्णुः स्वेच्छया सर्वं
संहरतीति अव्ययो विनाशी अस्योपलब्धिसाधनान्येतद्धर्मान् तप आदीनि सपवेत्याशयेनाह तप इति तानसर्वकं स्वधर्मात्र
स्थानं तपः दमस्तत्साधनं करणनिरोधः शमोऽन्तःकरणनिरोधः सत्यं मूर्तामूर्तात्मकः प्रपंचो यस्मादेव प्रसूयते २८

तस्यैवोक्तधर्मस्थापनतद्विरोधिदुष्टनिग्रहाद्याश्रयधारित्वमाह सचक्रपाणिरिति चक्रशार्ङ्गे सर्वायुधोपलक्षके विभुर्विविधम
त्स्यकूर्मादिभवनशीलः दैत्यांतको धर्मविरोधिनाशकः परः पालकः स एव च परमात्मा सूर्यः सवति प्रेरयति सर्वमिति प्रेरणो
रेफाल्कि पौत्रि पातितो स एव प्रेरणास्पदे विश्वस्मिन्स्थितो ध्वान्तनीशूर्द्रादिकाभावयन्प्रकाशयन्स्थितः इत्यर्थः अनेन सूर्येऽ
श्वयत्स्वरूपं विवस्वत इति तस्योक्तं परापरस्वरूपं द्विविधमादित्यस्याभिहितम् २९ आदितः पंचदशाधिकः शततमोऽध्या
यः ब्रह्मा विसर्गदेशात्रिगुणपरतन्त्रं गणज्ञः साम यथा साम भूर्भौमस्वर्गभास्वान्स्तुत विविधरुचिर्विश्वतेजो नतः ते नः मार्ताण्ड

सचक्रपाणिः शार्ङ्गी च विष्णुर्दैत्यांतकः परः सूर्यः स एव विश्वस्य भावयन्ध्वान्तनीः स्थितः २९ इति
मार्कण्डेयपुराणे वंशानुकीर्तने आदित्यमाहात्म्ये परस्वरूपप्रतिपादनं नाम सप्तमोऽध्यायः ११५
मार्कण्डेय उवाच तस्मादण्डाद्विभिन्नात्त ब्रह्मणो व्यक्तजन्मनः ऋचो बभूवुः प्रथमं प्रथमाद्वदना
न्मुने १ जपापुष्पनिभाः सद्यस्तेजोरूपा न संहताः पृथक्पृथग्विभिन्नास्ता रजोरूपवहास्ततः २
यजूंषि दक्षिणाद्वक्त्रादनिरुद्धानि काञ्चनम् यादृग्वर्णस्तथा वर्णान्यसंहतिधराणि च ३

ध्येदं मूर्तिस्तिमिरहृदनघो ज्योतिषां ज्योतिरेको विश्वात्मा मूर्तमूर्तिर्ददतु समिहिरो भद्रभद्रः सुभद्रम् एवं सूर्यस्य विश्वात्म
नः परं तदंगगतमपरं च स्वरूपमभिधायेदानीं तस्यैव वर्णादिप्रतिपाद्यं परविम्बभूतं स्वरूपमाह तस्मादिति १ ऋचां वर्णस्वरूप
माह जपापुष्पनिभा इति तेजोरूपमं ते संहतं यासां प्रकाशात्मकब्रह्मविश्रान्तत्वात् यतः पृथक्कृत्वरूपतया स्थिताः ततो रजो
रूपास्तस्य विभिन्नत्वात् २ अनिरुद्धानि असंश्लिष्टं वच्छन्दोभिरभेद्यानीत्यर्थः यजूंषि दक्षिणाद्वक्त्रादीनं कांचनं यादृग्वर्णं तादृक्के
षां वर्णास्तानि संहतिः समूहोऽसंहतिः एकत्वेनावस्थानं तं धारयंतीति तथा व्यवहारः स्मरणात् ३

344

तानि गायत्र्यादीनि सप्त छन्दांसि च पश्चिमाद्वक्त्रान्निर्गतानीत्यन्वयः ४ भृंगवदंजनचयवज्रप्रभायस्त्रकृत्स्नवर्णमित्यर्थः या
वन्निश्शेषसाकल्येनाशेषं घोरस्वरूपं तत्र हेतुमभिप्रायेणाह आभिचारिकं मूलकर्माद्युपयोग्यं पौरोत्सादनहेतुं शांतिकं चरा
त्तस्य भूतप्रेतपिशाचादिभ्य आगतस्योपद्रवस्योत्सादकम् ५ सत्त्वप्रायं शांतिकत्वात् रजःप्रायं पौष्टिकत्वात् तमःप्रायमा
भिचारिकत्वात् अत एव सत्त्वहेतुत्वात्सौम्यमूर्तिं मारणादिहेतुत्वात्सौम्यमूर्तिरित्यर्थः ९ ऋगादीनां गुणविभागमाह

पश्चिमं यद्विभोर्वक्त्रं ब्रह्मणः परमेष्ठिनः आविर्भूतानि सामानि ततश्छंदांसि नामथ ४ अथ
र्वाणमशेषं च भृंगांजनचयप्रभम् यावद्घोरस्वरूपं तदाभिचारिकशांतिकम् ५ उत्तरात्प्रक
टीभूतं वदनात्तस्य वेधसः सत्त्वप्रायं तमःप्रायं सौम्यासौम्यस्वरूपवत् ६ ऋचो रजोगुणाः सत्त्वं
यजुषां तु गुणोऽस्य वै तमोगुणानि सामानि तमःसत्त्वमथर्वसु ७ एतानि ज्वलमानानि तेजसा
प्रतिमेन वै पृथक्पृथगवस्थानं भांति पूर्वमिवाभवत् ८ ततस्तदाद्यं यत्तेज ओमित्यस्याभिश
ब्द्यते तस्य स्वभावाद्यत्तेजस्तत्समावृत्य संस्थितम् ९

ऋच इति ७ एतेष्वनादिसिद्धमेकत्वमनेकत्वं चेति संप्रदायपूर्वकाप्रवृत्तिरित्याशयेनाह एतानीति ज्वलमानानि भ्राज
मानानि ऋगादीनि पृथक्पृथगवस्थानं गायत्र्यादिछंदोवद्धा ऋचः तद्विलक्षणानि यजूंषि ऋचो गीतिविशिष्टाः सा
मानीत्येवमवस्थानं भांजि सेवमानानि पूर्वं पूर्वकल्पे यथाभवंस्तथास्मिन्कल्पेपीत्यर्थः यथापूर्वमकल्पयदिति श्रु
तेः ८ तस्य ऋगादेर्मंत्रोमयत्वात्परतेजआवरकत्वमाह तत इति ।

तत्सामान्यं अन्तर्भूतं यत्क्रांतं तच्चाद्यं सर्वकारणं यत्तेजो भर्गाख्यं ॐमित्यक्षरवाचकेनाभिशब्द्यते अभिधीयते तेन सच्चिदादिस्वरूप
तेजश्चिदानंदात्मकं त्रिगुणकामसंकल्पनोल्लासेन समाहृत्याच्छादय संस्थितमिति वेदानां त्रिकाण्डात्मकानामविद्यावद्विष
यत्वं दर्शितम् तथा च गीतासु ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् इत्याद्युप
क्रम्य अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः अधश्च मूलान्यनुसंततानि कर्मानुबंधीनि मनुष्यलोके इत्या
दि ९ एतेषां निर्दिशन्नां चतुर्णां वेदानां तेजसः साम्यमाह यथेति यजुषां तेजः सात्विको यथा तथा सत्वरूपात्मक विश्वं

यथा यजुर्मयं तेजस्तद्वत्साम्नां महामुने एकत्वमुपयातानि परे तेजसि संश्रये १० शांतिकं पौष्टि
कं चैव तथा चैवाभिचारिकम् ऋग्यादिषु लयं ब्रह्मन् चितयं विश्वतागमत् ११ ततो विश्वमिदं सद्य
स्तमोनाशात्सुनिर्मलम् विभावनीयं विप्रर्षे तिर्यगूर्ध्वमधस्तथा १२ ततस्तन्मण्डलीभूतं छन्दो
ऽसंतेज उत्तमम् योगेन तेजसा ब्रह्मन्नेकत्वमुपयातितत् १३

ति सत्वरूपत्वात्सामसमपि साम्नां तादृशमेव तेजः विश्रांतेः सत्वरूपासामप्रयोज्यगीतस्य दृष्टान्तेषां सूकत्वं तेजसः एतेषां
विश्रांतिस्थानमाह एकत्वमिति एतानि ऋक्सामानि परे तेजसि भर्गाख्ये संश्रये आधारे एकत्वमुपयातानीत्यर्थः १० एव
मृगाथर्वणामेकं तमसामाह शांतिकमिति त्रयीविप्रयोजनाश्च विशांतिः प्रधानं कर्म राजसं यजुःषु सत्वप्रधानेनाप्या
एकत्वात्पौष्टिकं कर्म सामसु तमःप्रधानकत्वात्संहारकत्वेनाभिचारिकं एवं चितयं क्रमेण त्रिषु वेदेषु लयं विश्रांतिमगम
त् ऋग्वादिभ्यः शांतिकादिभागं पृथक्कृत्य चतुर्थो यथर्वाख्यो वेदः प्रकाशित इति भावः ११ एवं वेदात्मकस्य तेजो मण्ड

मा उ
टी
२४५

लस्वभावनीयस्य प्रलयकालीनतमोनिमग्नविश्वप्रकाशकत्वमाह ततइति विभावनीयस्याविर्भावनीयं विश्वमासीदिति शेषः १२ त्वत्र
सांगायज्ञादीनां वेदाश्रितानामिदंच्छान्दसं परेणातेजसा ओंकाराख्येन चित्प्रकाशेन तमार्त्तण्डलावभासब्रह्मप्रकाशयोर्भेदइत्यर्थः १३
तदेव तत्तेजोरूपं मण्डलमादित्यसंज्ञामगमत् तत्र प्रवृत्तिनिमित्तमाह आदावेवेति आदौभव आदित्यइत्यर्थः दातिणात्यइतिवत्
अव्ययात्मकमनश्वरस्वभावं कारणं न बीजस्य कारणस्येवांकुरोत्पत्तौ तस्यामप्याभावइतिभावः १४ उक्तानां वेदानां मण्डलेमापन

345

आदित्यसंज्ञामगमदावेव यतोभवत् विश्वस्यास्य महाभाग कारणं चाव्ययात्मकं १४ प्रातर्मध्य
न्दिने चैव तथा चैवापराह्णिके त्रयीतपति सा काले ऋग्यजुःसामसंज्ञिता १५ ऋचस्तपंति पूर्वा
ह्णे मध्याह्ने च यजूंषि वै सामानि चापराह्णे वै तपंति मुनिसत्तम १६ शांतिकमृक्षु पूर्वाह्णे यज
ष्वंतरपौष्टिकम् विस्पष्टं साम्नि सायाह्णे आभिचारिकमंततः १७ मध्यन्दिने पराह्णे च समये चैवा
भिचारिकम् अपराह्णे पितॄणां तु साम्ना कार्याणि तानि वै १८ विसृष्टावृग्मयो ब्रह्मा स्थितौ वि
ष्णुर्यजुर्मयः रुद्रः साममयोंते च तस्मात्तस्याशुचिर्ध्वनिः १९

कालविभागमाह प्रातरिति प्रातर्ऋक्मध्यन्दिने यजुः अपराह्णिके सायंकाले साम १५ तदेव स्पष्टयति ऋचइति १६ शांत्या
दिवेदानुगुणमाह शांतिकमिति अंतरेमध्ये विभक्तिलुगार्षः विस्पष्टं नियमितं १७ समेपूर्वापरकोटिसमते मध्यन्दिने इत्यावि
भक्तस्याह्णोपरमर्धमपराह्णस्तस्मिन्पितॄणां कार्याणि श्राद्धानि १८ विसृष्टौ विसर्गे अंते संहारे तस्य साम्नो ध्वनिराशुचिरासमं
तात्स्खुचिर्विश्रांतिहेतुत्वात् यद्वा तस्मान्नियमिताहृगादीनां प्रातरादिकालादस्मात्तत्स्वर्गादेरशुचिर्विशुद्धो ध्वनिरित्यर्थः १९

उक्रमादित्यस्वरूपमुपसंहरति तदेवमिति भगवान्निरतिशयैश्वर्ययुक्तः भास्वान् प्रकाशातिशयवान् वेदात्मा आत्मस्वरूपं यस्य
वेदेषु प्रतिपाद्यत्वेन संस्थितः वेदविद्यास्त्रयी तेषामात्मा स्वभावः परः पालनशरणादियोगादुत्कृष्टः पुरुषः शर्ण्य उच्यते २० रजआदी
नाश्रित्य सर्गादीनां हेतुर्ब्रह्मादिसंज्ञामभ्येति तथापि शाश्वतः सनातनब्रह्मात्मक एव २१ वेदैः करणभूतैः सदा नित्यं द्विजैः
सर्वैः क्रमप्रकारेण वेदमूर्तिः ऋग्मूर्तिर्मूर्तिर्भूयः आद्यो ब्रह्मात्मा कारणं च अखिलानां ऋग्भ्यादीनां मूर्तानां भूतानां चिदादि

तदेवं भगवान्भास्वान्वेदात्मा वेदसंस्थितः वेदविद्यात्मकश्चैव परः पुरुष उच्यते २० सर्गस्थित्यंत
हेतुश्च रजःसत्वादिकान्गुणान् आश्रित्य ब्रह्मविष्ण्वादिसंज्ञामभ्येति शाश्वतः २१ वेदैः सदेज्यः स
तु वेदमूर्तिरमूर्तिराद्यो विखिलमूर्तमूर्तिः विश्वाश्रयं ज्योतिरवेद्यधर्मा वेदान्तगम्यः परमः परेभ्यः २२
इति मार्कण्डेयपुराणे वंशानुकीर्तने आदित्यमाहात्म्ये सूर्यवर्णने नाम द्वितीयोऽध्यायः ११९ मार्क
ण्डेय उवाच तस्यैवं तप्यमानेन तेजसूर्ध्वमधस्तथा शिरसाभिनतया मासप्रणयोनिः प्रजापतिः १

ऊं विना सत्वादयो नयस्मात्स्मृतिः तदाह विश्वस्याश्रयमाधारभूतं ज्योतिः प्रकाशः अवेद्यधर्मा न स्वरत्वाविज्ञादयो वेद्यस्य धर्मा
यं तन्न तथा वेदानामंते निश्चयै गम्यः प्राप्यः वेदांतैर्वा तत्त्वमसि अहं ब्रह्मास्मीत्यादिभिर्वा गम्यो हेयो हाता योग्यः परेभ्य उत्कृष्टे
भ्यो ब्रह्मादिभ्योपि परम उत्कृष्टश्चिदानंदसंपन्नो नित्य इत्यर्थः २२ आदितः षोडशाधिकः शततमोध्यायः सर्वात्मा सर्वयोगी सकल
भुवनपः सर्वकृत्सर्वरूपः सर्वस्यांतर्नियंता विविधसुखवपुर्यत्कृपातः मूर्तिः प्रातर्मध्ये दिनान्ते दुरितहरहरिर्हरेर्गजः सामसंस्था

ण्यमुद्रा

मा पु दिश्यादस्मद्गुणैरखिलकृतिफलो भास्करो भास्वभावः एवमादित्यस्य परापरात्मकं स्वरूपमभिधायेदानीं प्रभावं चावतीर्णस्थि
टी तिरूपमादित्यस्य प्रभावमाह तस्येति तस्यादित्यस्य १२ आपः प्राणा जीवितहेतवो येषां प्राणिनो प्राणिभवंति अंभसा
३५६ प्यायनहेतुना ३ ४ यत्मयं यत्प्रकृतिकं सर्वमयः सर्वस्य सामान्यस्य प्रकृतिभूतः विशेषव्याप्या विश्वमूर्तिः यस्यांज्योतिः
परः प्रकाशः तं योगिनः स्वात्मनिज्ञानकर्मप्रचोदकत्वेन ध्यायंतीत्यर्थः ५ एतत्स्वपंचयति यद्रति प्रकारादीनां प्रणवस्थि

रश्मिः कृतापि मे नाशं प्रयास्यति तेजसा भास्वतः सृष्टिसंहारस्थितिहेतोर्महात्मनः २ अप्प्राणाः
प्राणिनः सर्वे आपः शुष्यंति तेजसा नचांभसा विना सृष्टिर्विश्वस्यास्य भविष्यति ३ इति संचिंत्य भ
गवान्स्तोत्रं भगवतो रवेः चकार तन्मयो भूत्वा ब्रह्मा लोकपितामहः ४ ब्रह्मोवाच नमस्ते यन्मयं
सर्वमेतत्सर्वमयश्च यः विश्वमूर्तिः परंज्योतिर्यं ध्यायंति योगिनः ५ यऋङ्मयो यो यजुषां नि
धानं साम्नां च यो योनिरचिंत्यशक्तिः त्रयीमयः स्थूलतयार्धमात्रास्वरूपो गुणपारयोगी ६

तानां तिसृणां मात्राणां वाच्यः स्थूलमूर्तिः ऋग्गादिव्याहृत्यादिभिर्लोकस्मृतिरितरेषु गताविश्वादिका सूक्ष्मामूर्तिरर्धमात्रा ध्यान
योरधिष्ठानं यार्धमात्रा सर्वैर्भोक्ताऽस्मात्स्वरूपा च स्वरूपं यस्य सगुणानां सत्वादीनां स्थूलसूक्ष्मत्वादितया परिणतानां पारः समाप्ति
लेन पुरुषत्वेन गुणातीतस्वरूपस्त्वर्थः अनेन प्रणवस्वरूपं परापरयोगिभिर्भगवतो भास्वतो मण्डलस्थं दर्शितम् ६

तुरीयपरमार्थभावस्वरूपमस्मत्स्वैव सर्वात्मत्वमाह तमिति सर्वस्य हेतुं निमित्तं तत्त्वोपाधिमांशं च्चाह परमात्मा निरुपाधिक चैत
न्यरूपं यस्य अम्बादौ तु वेदसर्वे स्वात्मत्वात् परं ज्योतिर्द्वादशार्कव्यापकं मार्तण्डाभिधेयं भर्गं तस्य भौतिकत्वं निवारयति अवह्निरूप
भौतिकप्रकाशव्यतिरिक्तं वह्निर्हि भौतिके भ्यः स्थानादिभ्यः समित्यते वेदात्मतया सर्वोक्तविष्णुव्यापकशब्दात्मकवेदस्व
भावतया स्थूलं विश्वं हेहकं चकारात्मत्वं सत्त्वगुणानाज्य वह्निं मं चन्द्राप्यायकं चैवं त्रिविधं स्थूलसूक्ष्मपरात्मकं भास्वन्तं
रश्मिमन्तं आद्यं सर्वकारणं अतएव परेभ्यः परमं तमस्येनमस्यामि १ एवमोंकारात्मकं चिदादित्यं परापररूपतया प्रादुर्भूतं स्त
त्वा प्रणवस्य मात्रात्रितयाधिष्ठातृणां स्वनिर्माणे सृष्ट्यादौ ब्रह्मादीनां शक्तत्वं समग्रशक्तिनिर्भरं चिदादित्यशक्त्यंशेभ्य एवे

तं सर्वहेतुं परमात्मरूपमादौ परं ज्योतिरवह्निरूपम् । स्थूलं च वेदात्मतया नमस्ये भास्वन्तमाद्यं परमं
परेभ्यः १ सृष्टिं करोमि यदहं तव शक्तियाया तस्येरितो जलमहीपवनाग्निरूपाम् । तद्देवतादिवि
षयां प्रणवादिशीर्षां नान्येच्छया स्थितिलयावपि तद्वदेव २

त्याह सृष्टिमिति तव याद्या सृष्टिरूपा शक्तिः सैव त्वां साहं ब्रह्मा जलादिपांचभौतिकरूपां सृष्टिं तद्देवादिदेवमर्त्यतिर्य
गादिविगुणविषयां प्रणवश्चित्त्वकाशो ब्रह्मा विष्ण्वादौ प्रारंभे अशेषे अविद्यमानशेषे महाप्रलये च यस्यां सा परमकारण
प्रलयशिष्टां तां सृष्टिमात्मनः इच्छया न करोमि किं तु तवैव शरणशक्तिमनाशमम्बश्रेणाविशप्रेरित इत्यर्थः यदुक्तं भा
गवते प्रचोदिता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि स्वलक्षणा प्रादुरभूत्किलास्यत इति एवं स्थितिल
यकर्त्रभिमानयोर्विष्णुरुद्रयोरुभयोः स्वव्यापमतिदिशति स्थितिलयावपि तद्वदेवेति विष्णुः रुद्रश्चोभौ परादि मस्य
तव तिष्ठासया संजिहीर्षया च स्थेमलयकारिणावित्यर्थः २ ॥

347

रसादिपंचभूतविसृष्टात्वत्त्वमेव जगद्रक्षकइत्याह वह्निस्त्वमेवेति जलशोषणतो जलादानेन पृथिव्यां बीजादीनां सृष्टिं विधत्से हे प्रा
ध जगतो विकारं गच्छतामोषध्यादीनां पाकं अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधमिति
वत्तुर्विधस्य भक्ष्यादेर्जठराग्निरूपत्वेन पाकं परिणामं करोषि अत्र वह्निसहचरः पवनोऽपि संगृहीतो बोद्धव्यः हे भगवन्निरतिशयैश्वर्य
युक्त त्वमेव च व्यापी व्यापको गगनस्वरूपः एवं विश्वं सर्वमिदं पंचधा भूत्वा परिपासि पतिनो रक्षसीत्यर्थः ९ किं चाथियतः परमा
त्मरूपस्त्वमेवेत्याह यज्ञैरिति परमार्थविदः तत्त्वज्ञा हे विवस्वन् विशेषेण जगद्वासयति स्थापयतीति तत्संबोधनं अवि

वह्निस्त्वमेव जलशोषणतः पृथिव्यां सृष्टिं करोषि जगतां च तथाद्यपाकम् व्यापी त्वमेव भगवन्ग
गनस्वरूपस्त्वं पंचधा जगदिदं परिपासि विश्वम् ९ यज्ञैर्यजंति परमार्थविदो भवंतं विष्णुस्वरूपम
खिलेष्टिमयं विवस्वन् ध्यायंति चापि यतयो नियतात्मचित्ताः सर्वेश्वरं परममात्मविमुक्तिकामाः १०
नमस्ते देवरूपाय यज्ञरूपाय ते नमः परब्रह्मस्वरूपाय चिंत्यमानाय योगिभिः ११

लेष्टिमयं निखिलयज्ञप्रकृतिं विष्णुस्वरूपमाधियज्ञं यज्ञैर्ब्रह्मयज्ञादिभिरनेकैर्गीतादिष्टैः त्वामेव यजंतीति यतयः परमहंसा
नियतं निरुद्धमात्मा देहं चित्तं च यैस्ते यतयो यतनशीला आत्मनः स्वस्य संसाराद्विमुक्तिकामाः संतः सर्वेश्वरमंतर्यामिनं पर
ममात्मानं चिदानंदं ध्यायंतीति निदिध्यासनेन साक्षात्कुर्वंतीत्यर्थः १० यज्ञेषु इज्यमाना देवा रुद्रादयः चिंत्यमानाय ध्यायमा
नाय परब्रह्मस्वरूपाय योगिभिर्योगावहितैः ११

एवंस्तवाशार्थ्यते उपसंहरेति नवतेजसः संहतिः सप्तद्रः सृष्टेर्विघातायभवति यतोहंवदिच्छयैवाहंसृष्टौसमुद्यतः उद्युक्तः
१२ सर्गकर्त्तृणासर्गकर्त्तानप्रेत्त्वमार्थे ब्रह्मणापिसंस्तुतः शिभास्वतः प्रभवातिशयोनेनयोतितः परंकेवलं १३ १४
१५ आदितः सप्तदशाधिकः शततमोध्यायः ॥ आभिः स्तवंयजुर्भिर्यपचितिविषयंसामभिर्गीयमानंविश्वस्याभास
कंयत्परमरुचिधरंचक्रत्रयहृदयेणम् ध्यायंतेयोगिनोयत्परश्चिदभयदंतन्मदात्मासभावंभानोरूपंमहेज्यंपरग
उपसंहरतेजोयतेजसः संहतिस्तव सृष्टेर्विघातायविभोसृष्टौचाहंसमुद्यतः १२ मार्कण्डेयउवाच
इत्येवंसंस्तुतोभास्वान्ब्रह्मणासर्गकर्तृणा उपसंहृतवांस्तेजः परंस्वल्पमथाधारयत् १३ चकारचततः
सृष्टिंजगतांपद्मसंभवः तथातेषुमहाभागः पूर्वकल्पांतरेषुवै १४ देवासुरादीन्मर्त्यांश्चपश्वादी
न्वृक्षवीरुधः ससर्जसर्ववक्त्रलान्नरकांश्चमहामुने १५ इतिमार्कण्डेयपुराणेवंशानुकीर्तनेमार्त
ण्डमाहात्म्येब्रह्मस्तुतिर्नामसप्तदशोध्यायः ११७ मार्कण्डेयउवाच सृष्ट्वाजगदिदंब्रह्माप्रविभाग
मथाकरोत् वर्णाश्रमसमुद्राद्रिद्वीपानांसर्वंयथा १ देवदैत्योरगादीनांरूपस्थानानिसर्वशः
देवेभ्यएवभगवान्करोत्कमलोद्भवः २ ब्रह्मणस्तनयोयोभून्मरीचिरितिविश्रुतः कश्यपस्तस्य
पुत्रोभूत्काश्यपानामकश्यपः ३
तिनिलयंमण्डलस्यप्रपद्ये एवंसर्वत्तेनसर्वेकर्त्रासर्वेश्वरेणब्रह्मणापिस्तुतोभास्वानितितस्योत्कर्षनिरूपयन्कार
णंचादिदेवः सोभवत्कश्यपात्मजइतिप्रष्टुः प्रसंगात्तदभिधानमुपक्रमते सृष्ट्वेति १ वेदेभ्योवाद्दतिभ्यः २ सकश्यपो
मरीचिपुत्रः काश्यपानांकश्यपगोत्रीयाणांदेवदैत्यादीनामादिपुरुषइत्यर्थः ३

तनयाः कुमार्यः तस्य कश्यपस्य तासां संतता बह्वः ४ ५ सुषाव सुषुवे ६ क्रोधाः क्रोधवशा नाम राक्षसगणाः ७ श्येनी गृध्री भासी
शुक्रीत्यादयः कन्यकाः खगमाः खेचराः ८ संततिर्वंशः ९ तस्याः संतत्या तेषां पुत्ररूपाणां वंशकर्तॄणां पर्वतानां स्त्रीरूपाणां ९ राजसा रा

दक्षस्य तनया ब्रह्मंस्तस्य भार्यास्त्रयोदश। बह्वस्तत्संतता व्याप्ता सन्देवदैत्योरगादयः ४ अदितिर्ज
नयामास देवांस्त्रिभुवनेश्वरान्। दैत्यान्दितिर्दनुश्चोग्रान्दानवानुग्रविक्रमान् ५ गरुडारुणौ
च विनतायस्सुतौ सितवेगौ कद्रूः सुषाव च नागांश्च गन्धर्वांस्सुषुवे मुनिः ६ क्रोधायाजज्ञिरे क्रो
धावशायां चाप्सरोगणाः ऐरावतादीन्मातङ्गानिरा च सुषुवे द्विज ७ ताम्रा च सुषुवे श्येनीप्रमुखाः
कन्यका द्विज यासां प्रसूताः खगमाः श्येनभासशुकादयः ८ इलायाः पादपा जाताः प्रधायाः सौ
नसां गणाः अदितेर्यायासत्सुतस्तस्याः कश्यपस्यातिसंततिः ९ तस्याश्च पुत्रदौहित्रैः पौत्रदौहित्रका
दिभिः व्याप्तमेतज्जगत्सर्वं तेषां नामानि चैव मुने १० तेषां कश्यपपुत्राणां प्रधाना देवतागणाः
सात्विका राजसास्ते ते तामसास्तु ते गणाः ११ देवान्यज्ञभुजश्चक्रे तथा त्रिभुवनेश्वरान् ब्रह्म
ब्रह्मविदांश्रेष्ठ परमेष्ठी प्रजापतिः १२ तानबाधन्त सहिताः सपत्ना दैत्यदानवाः राक्षसाश्च त
थायुद्धं तेषामासीत्सुदारुणम् १३

तसा गणाः तामसा दैत्यदानवगणाः ११ हे ब्रह्मविदांश्रेष्ठ १२ सपत्नाः शत्रवः दिव्यं वर्षसहस्रं सुदारुणं युद्धमासीदित्यन्वयः १३

348

दैत्यदानवैर्देवताः पराजीयंत पराभूताः कर्मणि जयिनः जयशीलाः ४ निराकृतान् विप्रकृतान् अदितिः परं यत्नं महातपः
शावणप्रचक्रमे आरेभे इति द्वयोरन्वयः ५ आच्छिन्ना नीता यज्ञभागा येषां तान् क्षुधाशोकेन सवितुः विवस्वत इति हेतोः ६
तस्याः परं यत्नं दर्शयति एकाग्रेति एकचित्ता नियता नियमिता निरुद्धाहारा यया परमश्रोर्णनियमं पादाग्रासनजल
पवनाशनादिरूपमास्थिता राशिं समूहं ७ तामेव स्तुतिमाह नमस्तुभ्यमित्यादिना सर्वत्र विदादित्यस्य पराविस्वस

दिव्यं वर्षसहस्रं तु पराजीयंत देवताः जयिनश्चाभवन्निप्रबलिनो दैत्यदानवाः ४ ततो निराकृता
न् पुत्रान् दैतेयैर्दानवैस्तथा हृतत्रिभुवनान् दृष्ट्वा अदितिर्मुनिसत्तम ५ आच्छिन्नयज्ञभागांश्च
क्षुधार्त्तानपीडितान् भृशं आराधनाय सवितुः परं यत्नं प्रचक्रमे ६ एकाग्रा नियताहारा परं नियममा
स्थिता तुष्टाव तेजसां राशिं गगनस्थं दिवाकरम् ७ अदितिरुवाच नमस्तुभ्यं परं सूक्ष्मं सौषुम्णं
बिभ्रते तनुम् धाम धामवतामीशं धामाधारं च शाश्वत ८ जगतामुपकाराय त्वामहं स्तौमि गो
पते आददानस्य यद्रूपं तीव्रं तस्मै नमोऽस्तु ते ९

जनस्थापनविलापनादिरूपं ब्रह्मस्वरूपेण स्तनादितिस्वरूपेण परं तत्त्वं स्तवं स्तत्र मध्यनाडी स्थितं सूक्ष्मां मूर्तिमाह परं पालना
दिशरणादिस्वभावं सूक्ष्मं योगिगम्यं सुषुम्णा या मध्यधाम्नः परानन्दात्मिका या इयं सौषुम्णी तीर्णा सोमाप्यायन हेतुं
स्वरूपं बिभ्रते तस्मै नमः नमः शब्दयोगी चतुर्थी सोमाप्यायनाभिप्रायेणाह धामवतां तेजस्विनां सोमाग्न्यादीनां धामधा
मन् तन्मतेजस्वि तेजोमूर्ते अतएव शाश्वत प्रेरक अतएव च धाम्नां तेजसां स्थलानां भुवनानां चाधारस्थान भूत तत्रहेतुः शा

मृतशत्रुवविनाशिनिसर्गः ९९

मा० षु
टी
३४९

स्तुभगणाश्रमाथाराणेवाद्यसर्जनारश्मीराह जगतामिति उपकाराय मेघध्यादीनां पाकाय तवाय अददानस्य कषिणादिमरीचिमि
रात्रुषतः तदायमवतीव्रं तोदां शैषिकं रूपं तस्मै तं नमामीत्यन्वयः १९ चर्मसर्जनारश्मीः पुनराह गृहीतमिति कालेनाष्टमासा
त्मकेन पादान्तरेष्टमांशेन वा इन्दुमयं सोमात्मकं रसं विसृष्टं गृहीतमादत्तं यत्तवरूपं विश्रुतः तदाह अतितीव्रं तीतावरतरं
तत्र तास्मीति शर्व स्लोकस्यैवायं प्रपंचः २० एवं वृष्टिसर्जनारश्मीराह नमेवेति नमेवाम्बुपितं रसं सर्वं सुस्रुतो विसृजतः वर्षणा
य वर्षिणी चन्द्राचेतनाकेतनादिमरीचिप्रकाशनाय यदाप्यापकममिष्टदिपुष्टादिहेतुकं रूपं दधत तस्मै मेघाय मिहति

गृहीतमष्टमासेन कालेनेन्दुमयं रसम् विश्रुतस्तव यद्रूपमतितीव्रं नमामि तत् २० नमेवस्रुव
तः सर्वं रसं वै वर्षणाय यत् रूपमाप्यायकं भानोस्तस्मै मेघाय ते नमः २१ वार्युत्सर्गविनिष्पन्नम
शेषं चौषधीगणम् पाकाय तव यद्रूपं भास्करं तं नमाम्यहम् २२ तच्च रूपं तवातीव हिमोत्सर्गा
दिशीतलम् तत्कालसस्यपोषाय तरणेतस्य ते नमः २३

सिञ्चति वर्षतीति मेघस्तस्मै पर्जन्यरूपाय ते तुभ्यं नमः २१ इदानीं पाकरूपः शारदा मरीचीराह वार्युत्सर्गेण वर्षोत्सर्गेण
विशेषेण निष्पन्नं सरसीभूतं यदशेषमोषधीनां धान्यादीनां गणं यस्य पाकाय पक्वतादिरश्मिसर्जनेन बीजपोषाय तव रूपं
तं त्वां भास्करं नमामीत्यन्वयः २२ बीजादीनां शुष्करूपाणामाप्यानाय हिमसर्जनादिमरीचीराह तच्चेति तच्च तव रूपं हि
मसम्मिहिकादेर्हैमंते शिशिरे हिमान्वादेरुत्सर्गेण हिमसर्जनादिमरीचिविसर्जनेन शीतलं अतीव तीव्रां शीतं तत्का
लस्य तत्कालोत्पन्नस्य सदस्य सस्यपोषाय हे तरणे तस्य ते तुभ्यं नमः २३

श्रीःविभावसो २८

रदानीममृतादिमरीचीर्वासंतिकादर्शयति नातितीव्रमिति ग्रीष्मादाविवनातितीव्रं शिशिरादाविवनातिशीतंच शीतोस्रसामर
सद्रूपंग्रसनपवनोमयंवसंततोयन्नवरूपेन तस्मैहेदेवस्यतत्वनानाविधरूपलीलाग्रहणक्रीडादिपरतेनमः २४ एवमादित्यांशुद्वादिर
श्मीनांस्वरूपमागाधारेणसोमात्मतयापरिणतानांसोमात्मानंभगवंतंस्तौति आप्यायनमितिअशेषाणांमर्त्यतिर्यगादिसहि
तानांदेवानांपितृणांचाप्यायकंपरंश्रेयस्करंयन्नवरूपंसस्यानांपाकस्यहेतवेतस्मैनमः २५ तत्रसोमस्वरूपंवदन्स्तौतियद्रू

नातितीव्रंचयद्रूपंनातिशीतंचयत्तव वसंतर्तौरवेसोम्यंतस्मैदेवनमोनमः २४ आप्यायनमशे
षाणांदेवानांचतथापरम् पितृणांचनमस्तस्मैसस्यानांपाकहेतवे २५ यद्रूपंजीवनायैकंवी
रुधाममृतात्मकम् पीयतेदेवपितृभिस्तस्मैसोमात्मनेनमः २६ आम्भांयदर्केरूपाभ्यांरूपंविश्व
मयंतव समेतमग्नीषोमाभ्यांनमस्तस्मैगुणात्मने २७ यद्रूपमृग्यजुःसाम्नामैकेनतपतेतव
विश्वमेतत्त्रयीसंज्ञंनमस्तस्मैविभावसो २८

यमितिजीवनायजीवातवेयद्रूपंवीरुधामोषधीनांममृतात्मकंयसंदेवादिभिःसोमरूपंक्रमादिनापीयतेतस्मैसोमात्मने
नमः २६ अग्नीषोमात्मकमरीचीनालम्ब्यादित्यंस्तौति आम्भामिति सर्वलोकहृदयोस्ताभ्यांपाकाप्यायनहेतुभ्यांअग्नीषोमा
भ्यांसर्वकालानुगतपर्यायेणिभ्यांसमेतंसामरस्यात्मतयास्थितंयद्विश्वमयंतवरूपंतस्मैगुणाःप्रकृतयःप्रधानमरामाएवा
दयोविकृतयश्चव्रह्मशेषाणितादिरूपायातवश्चवातपित्तादयोज्योतिःसलिलपवनादयश्चात्मास्वरूपंयस्यतस्मैनमः २७

तेजोमयात्लामरणंग्रौघकौनविश्वमेतन्नपतेत्वयीदेवत्वत्तस्मैविभावसोऽकसमा

मा पु॰ टी ३५

350

एवंविश्वमयस्वरूपमपरं प्रतिपाद्य तस्यैव स्थूलसूक्ष्मं बीजात्मकं परं रूपं सर्वाधिष्ठानं स्तौति यदिति तस्मात्तोयोग्न्यादिव्यवहा
रप्रकाशनाया विष्णुताबेजोमण्डलात्मकाप्यरं रूपमोमित्यस्यावाचके तचिन्त्रकाशात्मके सर्वाधिष्ठानेनाभिसर्वेषु वेदेषु शास्त्रे
अस्थूलं सर्वभावतद्विकारोपलक्षणं अस्थूलमनणुअह्रस्वमदीर्घमित्यादिश्रुतिप्रतिपादितसकारणे देहद्वयादिभ्यो व्यतिरिच्य
मानं नचहेतुः अनंतदेशकालाकारादिभ्यः परिच्छेदशून्यं यतो मलस्वरूपाधिमलानान्नातं तस्मै सदात्मने शतिसिद्धिदानं

यत्तु तस्मात्परं रूपमोमित्युक्ताभिशब्दितं अस्थूलानंतममलं नमस्तस्मै सदात्मने २९ मार्कंडेय उ
वाच एवं स्तुता नियता देवी चक्षेत्रैव महर्निशम् निराहारा विवस्वंतमाशिताथ यिक्षुर्तते ३० ततः
कालेन महता भगवांस्तपनो मुने प्रसन्नतामगात्तस्मा आगताय मणो द्विजोत्तम ३१ स ददर्श महा
कूटं तेजसोम्बरमाश्रितं भूमौ च संस्थितं भास्वज्ज्वालामालातिदुर्दृशम् ३२ तं दृष्ट्वा स तदा देवी
साध्वसं परमं गता जगाद मे प्रसीदेति न त्वां पश्यामि गोपते ३३ यथा दृश्यवती शर्वं मम त्वादृश्य तु
दुर्दृशं संघाततेजसस्तद्वदिह पश्यामि भूतले ३४

दद्युरूपाय परब्रह्मणे नम इत्यर्थः २९ ३० दासाय मणो दत्तश्चुमा आदित्याः ३१ महाकूटं महाराशिं यदेवाम्बरं गगनमाश्रितं
भूमौ च तदेव संस्थितं भास्वद्भिर्दीप्यमानाभिर्ज्वालानां मालाभिरतिशयेन दुर्दर्शं दुःखेन द्रष्टुं शक्यं स तदुर्दर्शमित्यर्थः ३२
साध्वसं भयं गोपते मरीचीनां पते स्वामिन् ३३ स तदुर्दर्शं यद्दर्शं संघातं राशिं व्योम भूसंस्थयो तेजसो विशेषान्तदुर्द
र्शनाद्भ मदनुग्रहाय मूर्तिमन्तं द्रष्टुं शक्यं प्रादुष्कुर्वितिभावः ३४

तदाह प्रसादमिति पश्येयं चर्मचक्षुर्भ्यां प्रकटमनुभवेयं रूपं स्वेच्छया शरीरेण साकारं हे भक्तेष्वनुकम्पक अनुग्रहविधायिन् स्वता
नादित्वाद्देवान् ३५ त्वं धातेत्यादिना यथा जगतः सृष्ट्यादिविनिर्माणे याऽमूर्तस्वभावोऽपि मायागुणत्रयोपाधिग्रहणात्स्वेच्छया
ब्रह्माद्याकारान्मूर्त्यासितथा मम माप्यनुग्रहाय मूर्तिं स्वेच्छानिर्मितां मा उत्सुकं विनाशयेनाह त्वमिति धाता ब्रह्मा प्रमाग्रपराग
तिरूपाद्यः ३६ लोकपालमूर्तिरपि भवांल्लोकानुग्रहायाविर्भूतस्तथा मम भक्तत्राणे पालनाय प्रवर्तस्वेत्याशयेनाह त्वं ब्रह्मेति
अजो रुद्रः समीरो वायुः तव सकलात्मनः सर्वात्मनः स्वधाम्नो तितेजस्विनः किं लोके मर्त्यस्त्वं भवति नाकिंचिदित्यर्थः ३७

प्रसादं कुरु पश्येयं यद्रूपं ते दिवाकर भक्तानुकंपक विभो भक्तोऽहं पाहि मे सतान् ३५ त्वं धाता विसृजसि देव विश्वमेतत्त्वं पासि स्थितिकरणाय संप्रवृत्तः त्वय्यंते लयमखिलं प्रयाति चैतत्त्वत्तोऽन्या न हि गतिरस्ति सर्वलोके ३६ त्वं ब्रह्मा हरिरजसंज्ञितस्त्वमिन्द्रो वित्तेशः पितृपतिरम्बुपः समीरः सोमोऽग्निर्गगनमहीमहीधराब्धिः किं स्तव्यं तव सकलात्मनः स्वधाम्नः ३७ यजंते त्वामनुदिनमात्मकर्मसक्तास्त्वा नत्वा हि विविधपदैर्द्विजा जपंति ध्यायंते विनियतचेतसो भवंतं योगस्थाः परमपदं प्रयांति मर्त्याः ३८

किं च भोगमोक्षतत्साधनानां च त्वमेवाधिष्ठाता फलदाता चेत्याह यत्त इति निजकर्मानुष्ठानात्मकैर्यज्ञैरात्मनः स्वाभाविकस्व
कर्माणि सक्ता द्विजा ब्राह्मणा वर्णिकास्त्वां यजंते इति शेषः तथा तव त्वतो विविधपदैस्त्रिपद्यादिभिस्त्वामेव तदभिधेयं विदादिमं जपं
तिमानसहस्यामेवं ते इत्यर्थः ये च निरुद्धचित्ता मर्त्या योगे ब्रह्मात्मैक्येन तत्साधने च स्थिताः परमं पदं परं ब्रह्म त्वं च तदर्थपा
दाभिधेयं प्राप्नुवंतीत्यर्थः जननमरणधर्मकाश्च अजरामरा गुणोचितयातीता भवंतीति भावः ३८

मा पु
टी
३५१

351

किंबहुना सर्वात्मना सर्वं कर्म त्वं तावत्तत्तनि संग्रहरश्माशयेनाहरतेपसीति गर्भीकरोषि स्वगर्भस्थगर्भं विपत्स्व प्रकटयसि मयूखैः प्र
काशयसि स्वमयूखैर्गर्भस्थैः स्वैः तृणमणान स्वन्दात्मना पचसि ते ह्लादयसि स्वतो करोषि स्वगम्भो विज्ञानमयो ग्णो वाऽज्ञानो विषयनान
वेकस्य विभूतयो ऽशावयपरिच्छेदा इति भावः ३९ इति भावप्रदीपे षडधिकशतादितिः शततमोऽध्यायः अग्नीषोमात्मयोनिर्विहितकृ

तपसि पचसि विश्वं पासि गर्भीकरोषि प्रकटयसि मयूखैर्ह्लादयस्यम्बुगर्भैः सृजसि कमलजन्मा पाल
यस्यच्युताख्यः क्षपयसि च युगान्ते रुद्ररूपस्त्वमेकः ३९ इति मार्कण्डेयपुराणे मार्तण्डमाहात्म्ये अदि
तिस्तुतिर्नाम चतुर्थोऽध्यायः १०८ मार्कण्डेय उवाच ततस्तेजस्समस्तस्मादाविर्भूतो विभावसुः अदृश्य
ततदादित्यानमताम्रोपमः प्रभुः १ अथ तां प्रणतां देवीं तस्य संदर्शनान्मुने प्राह भास्वान्वृणुष्वेष्टं वरं
मत्तो यदिच्छसि २ प्रणता शिरसा सा च जानुपीडितमेदिनी प्रत्युवाच विवस्वन्तं वरदं समुपस्थितं ३
देव प्रसीद पुत्राणां हृतं त्रिभुवनं मम यज्ञभागाश्च दैतेयैर्दानवैश्च बलाधिकैः ४

तिकलंकमकृतस्य कारः सोऽभ्रमो यास्त्रिसंध्योऽपणा विप्रणा वपुषाप्यणीयान्महीयान् सर्वार्थः सर्वनामा सकलकुलपतिः सर्वलो
कोशनेशः पायान्नो देवदेवोऽमरदनुजगणैः संस्तुतस्त्वं उराश्मिः अदित्या अहरहपनकर्मणीलिकारः तमेनाग्निष्यातेन ताम्रेणोपमा य
स्य १ तस्य मार्तण्डस्य सम्यग्दर्शनाद्धेतोः प्रणता २ जानुभ्यां पीडिता क्षोणी मही यया सा समुपस्थितमाविष्कृतमूर्तिम् ३ ४ ३५१

तन्निमित्तं देवानां त्रिभुवनयज्ञभागलब्ध्यर्थं ५ ६ ७ वारितस्करः तस्करास्तेरोसंसारयाही ८ अशेषतः समग्रान्तुत्वत्पुत्राणां वि
शत्रून् निर्वृता आनंदवती भवेति शेषः ९ निवृत्ता तपसः सकाशात् सापि सा तथाहितः संप्राप्तसमाखिलवाञ्छितमभिमतं यया
१० रश्मिसहस्रांशो रवेः सूर्यस्यातिस्तस्मः करो रश्मिरवतारं देवमातुरदितेरुदरे जठरे चक्रे अनेनापरिच्छिन्नतेजस्त्वं द्योतितम्

तन्निमित्तं प्रसादं त्वं कुरुष्व मम गोपते भ्रंशेन तेषां भ्रातृत्वे गतानां नाशय तद्द्विषन् ५ यथा मे तनया
भूयो यज्ञभागभुजः प्रभो भवेयुरधिपाश्चैव त्रैलोक्यस्य दिवाकर ६ तथानुकंपां पुत्राणां सुप्रसन्नो
रवे मम कुरु प्रपन्नार्तिहर स्थितिकर्त्ता त्वमच्युत ७ मार्कण्डेय उवाच ततस्तामाह भगवान् भास्क
रो वारितस्करः प्रणतामदितिं विप्र प्रसादसुमुखो विभुः ८ सहस्रांशेन ते गर्भे संभूयाहमशेष
तः त्वत्पुत्रशत्रून् दितिजान् नाशयाम्याशु निर्वृता ९ इत्युक्त्वा भगवान् भास्वानन्तर्धानमुपागमत् निवृ
त्ता सापि तपसः संप्राप्ताखिलवाञ्छिता १० ततो रश्मिसहस्रांशः सोषुम्णाख्यो रवेः करः विप्राव
तारं स चक्रे देवमातुरथोदरे ११ कृच्छ्रचान्द्रायणादींश्च सा च चक्रे समाहिता शुचिः स्माराधयामे
तं दिव्यं गर्भमिति द्विज १२ ततस्तां कश्यपः प्राह किंचित्कोपप्लुताक्षरम् किं मारयसि गर्भा
ण्डमिति नित्योपवासिनी १३

११ शुचिर्नीरुग्व्रतिका समाहिता सावधाना कृच्छ्रं नाम व्रतं त्र्यहमापस्त्र्यहं पयस्त्र्यहं पयश्चैव कृच्छ्रं चान्द्रायणं नाम चन्द्रह्रासवृद्ध्योर्ग्रासा
दीनां ह्रासाधिकीभावादिविधानम् १२ गर्भस्थितमण्डं नित्योपवासिनी सती किं मारयसि इति शाब्दो भिन्नक्रमः नित्योपवासि

श्रीमत्स्याद्वंतंतीकतीयः १२

हेकोपन क्रोधन यदेतद्गर्भाण्डं पश्यसि तन्मया मारितं किं तदित्यत आह विपक्षाणां रिपूणां मृत्युरेवैतद्भविष्यतीत्यन्वयः १४ सुराणामर
णिरुत्पत्तिस्थानं १५ आद्याभिः प्रधानाभिः आदरात् श्रद्धया १६ १७ आभाष्य संबोध्य १८ तेन या कश्यपवचनान्मृतादण्डाज्जातो

मा पु
टी
१५२

352

सा च तं प्राह गर्भाण्डमेतत्पश्यसि कोपन न मारितं विपक्षाणां मृत्युरेतद्भविष्यति १४ मार्कण्डेय
उवाच इत्युक्ता तं तदा गर्भमुत्ससर्ज सुरारणिः जाज्वल्यमानं तेजोभिः पत्युर्वचनकोपिता १५ तं
दृष्ट्वा कश्यपो गर्भमुद्यद्भास्करवर्चसम् तुष्टाव प्रणतो भूत्वा ऋग्भिराद्याभिरादरात् १६ संस्तूय
मानः स तदा गर्भाण्डात्प्रकटोऽभवत् पद्मपत्रसवर्णाभस्तेजसा व्याप्तदिङ्मुखः १७ अथान्तरि
क्षादाभाष्य कश्यपं मुनिसत्तमम् सतोयमेघगम्भीरा वागुवाचाशरीरिणी १८ मारितं ते यतः
प्रोक्तमेतदण्डं त्वया मुने तस्मान्मुने सुतस्तेऽयं मार्तण्डाख्यो भविष्यति १९ सूर्याधिकारं च विभुर्ज
गत्येष करिष्यति हनिष्यत्यसुरांश्चायं यज्ञभागहरानरीन् २० देवा निशम्येति वचो गगनात्समुपाग
तम् प्रहर्षमतुलं याता दानवाश्च हतौजसः २१ ततो युद्धाय दैतेयानाजुहाव शतक्रतुः सह देवैर्मुदा
युक्ता दानवाश्च समभ्ययुः २२ तेषां युद्धमभूद्घोरं देवानामसुरैः सह शस्त्रास्त्रदीप्तिभिर्दीप्तसमस्त

मार्तण्डसंज्ञकः १९ सूर्याणां द्वादशानामधिकारं स्वामित्वं २० हतौजसो नष्टतेजस्काः २१ दानवा देवैः सह समभ्ययुर्युद्धाय सम्मुखं
जग्मुः २२ शस्त्रास्त्राणां दीप्त्या संदीप्तानि प्रज्वलितानि समस्तानां भुवनानामन्तराणि मध्यानि यत्र तत् २३

२४ तेजसां योनिमनन्यस्थानं मार्तण्डं मन्तानां चराचराणां मनुष्याणां कं अदितेश्चेत हि शोभनं तत्रयोनिमग्नांते जसा देवादीनां
२५ २९ भूमंवर्त्तुलमग्निपिण्डं तेन सदृशः अतिस्फुटं समतिशयेन प्रकटं वपुर्न दधे धारयामास तेजसो बहिश्चनात् २१ आदितः पंचो
नविंशतितमः शततोपर्यध्यायः येनायन्तः समस्ताकृतिरतिमलमोथ्यवत्तदेवाङ्गरीयाज्ज्योतिर्नीरानिलेमोप्रकिरति सततं पञ्च

तस्मिन्भ्रमे भगवता मार्तण्डेन निरीक्षिताः तेजसा दह्यमानास्ते भस्मीभूता महासुराः २४ ततः
प्रहर्षमतुलं प्राप्ताः सर्वे दिवौकसः तुष्टुवुस्तेजसां योनिं मार्तण्डमदितिं तथा २५ स्वाधिकारांस्त
था प्राप्ता यज्ञभागांश्च पूर्ववत् भगवानपि मार्तण्डः स्वाधिकारमथाकरोत् २६ कदम्बपुष्पवद्भा
स्वानधश्चोर्ध्वं च रश्मिभिः वृताग्निपिण्डसदृशो दधे नातिस्फुटं वपुः २७ इति मार्कण्डेयपुराणे मा
र्तण्डमाहात्म्ये मार्तण्डोत्पत्तिर्नाम पञ्चमोऽध्यायः ११५ मार्कण्डेय उवाच प्रणम्य तस्मै दौ कन्यां संज्ञा
नाम विवस्वते प्रसाद्य प्रणतो भूत्वा विश्वकर्मा प्रजापतिः वैवस्वतस्त्वसंश्रितो मनुस्तस्यां विवस्व
तः सर्वमेव तथाख्यातं तस्य रूपं विशेषतः २ त्रीण्यपत्यान्यसौ तस्यां जनयामास गोपतिः द्वौ पुत्रौ
सुमहाभागौ कन्यां च यमुनां मुने ३ मनुर्वैवस्वतो ज्येष्ठः श्राद्धदेवः प्रजापतिः ततो यमो यमी चैव
यमलौ सम्बभूवतुः ४ यत्तेजोऽभ्यधिकं तस्य मार्तण्डस्य विवस्वतः तेनातितापयामास त्रींल्लोकान्स

येत्तौषधीनाम् त्राणः सोमो यतः स प्रकृतिमनुभजेन् नर्पयन्दे वप्राणोऽन्द्याने लोकदीपः शुभनतिममलो योनिदोमादमन्
विश्वकर्मा त्वष्टा प्रजापतिः १ सर्वमेव वैवस्वतमन्वन्तरं निरूपणेन तस्य वैवस्वतस्य वक्ष्यमाणं वंशादि तद्रूपस्य विशेषतः आधि
क्येन २ तदेव संग्रहेण प्रसंगात् आदित्यमहिमावर्णनहेतोराह त्रीणीत्यादिना ३ वैवस्वतानां माहात्म्यवर्णनाय तेषामुत्पत्तिं प्र

अप्रधृष्यं अमितौजा व्यापकमधिकं विश्वस्यापनोदयोग्या दृष्टिप्रतापकरं तदा हरतेनेति ५ गोलाकारं वर्तुलमण्डलाकारं
असहन्ती सोढुमशक्नुवती स्वां छायां देहस्य समवेतां संज्ञया आत्मीयेन नाम्ना आरव्च्छाया चिदाभासः अत एव तत्र तयोरत्यन्तौ साम्यं ते
जस्त्वमसौ विवस्वतः स्वल्पवर्णविशेषेणैव व्यवक्रियमाणयोरनयोर्भिदा दिनता पितयोरेकमेव विद्याविद्यादिवत् ६ नि
र्विकारं स्नावहितं क्रोधादिना गाढं ते अत्रादि अस्सेवारतादिपरम् मच्छासनात् ममाज्ञया ७ मह्यं मदर्थे संभाव्यौ हृतले

गोलाकारं त्वनेनेदं दृष्ट्वा संज्ञा स्वरूपं विवस्वतः । असहन्ती महत्तेजः स्वच्छायामेत्य साब्रवीत् ६ संज्ञोवा
च अहं यास्यामि भद्रं ते स्वमेव भवनं पितुः । निर्विकारं त्वयाप्यत्र स्थेयं मच्छासनाच्छुभे ७ इमौ च
बालकौ मह्यं कन्या च सुवर्चवर्णिनी । संभाव्या नैव चाख्येयमिदं भगवते त्वया ८ छायोवाच आ
केशग्रहणात् देवि आशापाच्चैव कर्हिचित् । आख्यास्यामि मतं तुभ्यं गम्यतां यत्र वाञ्छितं ९ इत्यु
क्ता च्छायया संत्यज्य गामपि तन्मंदिरम् । तत्रावसत्पितुर्गेहे किंचित्कालं शुभेक्षणा १० भर्तुः स
मीपं याहीति पित्रोक्ता सा पुनः पुनः । अगच्छद्वडवा भूत्वा कुरूनुत्तरान्विशोभना ततः ॥

हो पालनभोजनादिना प्रसवे हिमत्या विसर्पः इदं ममगमनं ८ कोपवशात्केशैर्ग्रहणं केशेषु आकर्षणता उत्तमभियाप्य
पवमाशापादाक्रोशातुरीषणाशंसनममिथ्याप्यतभ्यं वदतुरोधार्थे ९ शुभेक्षणेति मार्तण्डाति तेजसोऽसमिथानात्मेवप्रका
शायानतहीनोऽसर्थः १० पित्रा विश्वकर्मणा वडवावामीऽजरान्कुरूनगमदिमन्वयः पुनःपुनरुक्तश्चोदितेत्यर्थः ॥

साध्वीसती भर्तृस्तेजसः स्वस्त्रीभावद्रूपःकामोचतपस्तपने १२ छायायाश्चसमाह पितरिति तस्याःसंज्ञायाश्चपथारिथी १३ अविं
तयदृष्टो तथैवसंज्ञावत् १४ पूर्वजस्यमनोःश्राद्धदेवस्यसंज्ञापुत्रस्य १५ योद्वितीयःसुतोभूत्सोन्योनवसुग्रहेष्वेकतरःशनैश्चरो
ग्रहोभूत् तपतीनदी यस्यकुरुतेत्वयत्तसदनंदेवयजनमभूत्सकुरुर्नामराजा १६ पार्थिवीश्चथियाश्चागतासंज्ञाच्छायो

नचतेपेतपःसाध्वीनिराहारामहामुने १२ पितुःसमीपंयातायाःसंज्ञायावाक्यतत्परा मद्रूपधारि
णीच्छायाभास्करंसमुपास्थिता १३ तस्यांचभगवान्सूर्यःसंज्ञेयमित्यचिंतयत् तथैवजनयामा
सद्वौसुतौकन्यकेनतथा १४ पूर्वजस्यमनोस्तुल्यःसावर्णिस्तेनसोभवत् यस्तयोःप्रथमेजातःपु
त्रयोर्द्विजसत्तम १५ द्वितीयोयोभवत्तस्याःसग्रहोभूच्छनैश्चरः कन्याश्चतपतीयातांवव्रेसंवरणो
नृपः १६ संज्ञातुपार्थिवी यामात्मजानांयथाकरोत् स्नेहंतुपूर्वजातानांतथाकृतवतीसती १७
मनुस्तत्क्षांतवांस्तस्यायमस्यास्यानचक्षमे बहुशोयाच्यमानस्तुपितुःपुत्र्याःसुदुःखितः सेवकोपा
द्वैवाल्याद्भाविनोर्थस्यवैबलात् १८ पदासंतर्जयामासच्छायांसंज्ञांयमोमुने ततःशशापच
यमंसंज्ञासामर्षिणीभृशम् १९

च्छायासंज्ञेत्यर्थःतेषांस्वासमीयानांपूर्वजातानांसंज्ञापुत्राणां १७ क्षांतवान्सोढवान् तद्देषम्यं नचक्षमेसेहे १८ पितुःपु
त्र्याभगिन्यायमुनयाभाविनोदैवस्यार्थस्यद्वयोरन्वयः १८ संतर्जयामासातर्जयत् संज्ञाछायाअमर्षिणीक्रोधवती १९

२॰ पित्रेविवस्वते २१ ज्यायसोज्येष्ठान् कनीयांसःकनीयसःकनिष्ठान् बुभूषतिभवितुमिच्छति २२ २३ २४ २५ २६ २७ प्रतिघातोनि

छायोवाच पदातर्जयसेयस्मात्पितृभार्यांगरीयसीम् तस्मात्तवैषचरणःपतिष्यतिनसंशयः २॰
यमस्तुतेनशापेनभृशंपीडितमानसः मनुनासहधर्मात्मासर्वंपित्रेन्यवेदयत् २१ यमउवाच
स्नेहेनतुल्यमस्मासुमातादेवनविद्यते विसृज्यज्यायसोप्यस्मान्कनीयांसौबुभूषति २२ तस्यांमयो
द्यतःपादोनतुदेहेनिपातितः बाल्याद्वायदिवामोहात्तद्भवान्क्षन्तुमर्हसि २३ शप्तोहंतातकोपेन
जनन्यातनयोयतः ततोनमन्येजननीमितोवैतपतांवर २४ निर्गुणेष्वपिपुत्रेषुमाताशापंनदा
स्यति पादस्तेपततोपुत्रकथमेतद्भविष्यति २५ तवप्रसादाच्चरणोनपतेद्भगवन्यथा मातृशापाद
यंमेद्यतथाचिंत्यगोपते २६ रविरुवाच असंशयंमहत्पुत्रभविष्यत्यत्रकारणम् येनत्वामावि
शत्क्रोधोधर्मज्ञंसत्यवादिनम् २७ सर्वेषामेवशापानांप्रतिघातोहिविद्यते नतुमात्राभिशप्तानां
क्वचिच्छापनिवर्तनं २८ नशक्यमेतन्मिथ्यातुकर्तुंमातुर्वचस्तव किंचित्तेवविधास्यामिपुत्रस्ने
हादनुग्रहं २९ क्रिमयोमांसमादायप्रयास्यंतिमहीतलम् कृतंतस्यावचःसत्यंत्वंचत्रातोभविष्य ३॰

वर्तनं २८ अनुग्रहंकृपां अनेनादिमस्मणापरोगहारित्वस्मातं अन्यजनमतपवारोग्यंभास्करादिच्छेदितिकं ३॰ त्रातोरक्षितः ३॰

354

३१ ३२ परिहरंतीमुपलपंती आत्मानं मनः सरविः समाधाय प्रणिधाय चक्रो वहितस्तत्वं तत्रापश्यत तापश्यत् दिव्यदृष्ट्या
सर्वमालोचितवानितः परं ३३ यथाहृतं हतं संपन्नमनतिक्रम्य ३४ श्वशुरं भार्यायाः पितरं त्वष्टारं ३५ ततो हेतोः ३६ श्व

मार्कण्डेय उवाच आदित्यस्त्वब्रवीच्छायां किमर्थं तनयेषु वै तुल्येष्वभ्यधिकः स्नेह एकत्र क्रियते त्वया
३१ नूनं नैषां त्वं जननी संज्ञा कापि त्वमागता विगुणेष्वपत्येषु कथं माता शपेत्सुतम् ३२ सा तत्परि
हरंती च नाचचक्षे विवस्वतः स चात्मानं समाधाय युक्तस्तत्वमपश्यत ३३ तं शप्तुमुद्यतं दृष्ट्वा छाया
संज्ञा दिवस्पतिम् भयेन कंपती ब्रह्मन्यथावृत्तं न्यवेदयत् ३४ विवस्वांस्तु ततः क्रुद्धः श्रुत्वा श्वशुरमभ्य
गात् स चापि तं यथान्यायमर्चयित्वा दिवाकरम् निर्दग्धुकामं रोषेण सांत्वयामास सत्वतः ३५
विश्वकर्मोवाच तवातितेजसाव्याप्तमिदं रूपं सुदुःसहम् असहंती ततः संज्ञा वने चरति वै तपः ३६
इत्थं तां भवानद्य स्वां भार्यां शुभचारिणीम् रूपार्थं भवतोरण्ये चरंतीं सुमहत्तपः ३७ स्मृतं मे ब्रह्म
णो वाक्यं यदि ते देव रोचते रूपं निर्वर्तयाम्येतत्तव कांतं दिवस्पते ३८ मार्कण्डेय उवाच यतो हि
भास्वतो रूपं प्रागासीत्परिमण्डलम् ततस्त्वेति तं प्राह त्वष्टारं भगवान् रविः ३९

मेनं धर्मेण चारिणीं व्यवहरंती ३७ मे मम ब्रह्मणो वाक्यं स्मृतं चाकिल ब्रह्मणोक्तं त्वया विवस्वतस्तेजसः शातनं विधा
तव्यमिति स्मृतिपथमागतं तेन त्वद्रूपं निर्वर्तयामि साधयामि कांतं रम्यं सद्रूपम् ३८ परिमण्डलं दुर्लक्ष्यम् ३९

८० नाभिर्मध्यमाधारः ८१ आक्षिप्तमासमंतात्क्षिप्तं पर्यस्तं ८२ शीर्णानि शिथिलानि सानूनां प्रस्थानां निबंधनानि संधयो येषां
८३ धिष्ण्यानि स्थानानि नि ध्रुवो मेढीव पश्चान्ना माधारो येषां भेदयोगकालचारास्तोदयास्तयो हि धिष्ण्यानां त्रुटंतो भिद्यंतो रश्मी
नां ध्रुवाश्रितवातरज्जूनां निबंधानि ग्रथयो येषां तानि यदुक्तं मत्स्यपुराणे सर्वे ध्रुवनिबद्धास्ते प्रबद्धा वातरश्मिभिः परिभ्रमंति

विश्वकर्मा ततस्तातः शाकद्वीपे विवस्वता भ्रमिमारोप्य तत्तेजः शातनायोपचक्रमे ८० भ्रमताशे
षजगतां नाभिभूतेन भास्वता समुद्राद्रिवनोपेता समारोह मही नभः ८१ गगनं चाखिलं ब्रह्म
न्सचंद्रग्रहतारकम् अधोगतं महाभाग बभूवाक्षिप्तमाकुलम् ८२ विक्षिप्तसलिलाः सर्वे बभू
वुस्तथाब्धयः व्यभिद्यंत महाशैलाः शीर्णसानुनिबन्धनाः ८३ ध्रुवाधाराण्यशेषाणि धिष्ण्या
नि मुनिसत्तम त्रुटद्रश्मिनिबन्धानि अधो जग्मुः सहस्रशः ८४ वेगभ्रमणसंजातवायूहिताः
समंततः व्यशीर्यंत महामेघा घोरावविराविणः ८५ भास्वद्भ्रमणविभ्रांतभूम्याकाशरसात
ले जगदाकुलमत्यर्थं तदासीन्मुनिसत्तम ८६ त्रैलोक्ये सकले विप्र भ्रममाणे महर्षयः दे
वाश्च ब्रह्मणा सार्धं भास्वंतमभितुष्टुवुः ८७

नक्षत्राः सूर्यचंद्रग्रहादि दिवि भ्रमंतमनुव्रजंति ध्रुवं वै ज्योतिषां गणाः इत्यादि ८४ रवेर्वेगवता भ्रमणेन संजातो वायुस्तेन हिताः
पर्यस्ता महामेघाः पुष्करावर्तकादयो घोरो भयानको य आरावः स्तनितानि तैर्विराविणो निगर्जंतः ८५ ८६ ८७

देवानामादिदेवो मूलकारणं एतद्भवतः सर्वादिमत्वं स्वरूपतः पारमार्थ्येनास्माभिर्ज्ञातं न मम यथा तवैकस्य भ्रमिभ्रमणे कथं
जगतो भ्रमणं भवेद्यं शङ्काया पितन्त्रमं जगत् कथं स्वस्थाने स्थापयितुं न शक्नुमः इत्यर्थः सर्गादिषु त्रिधा हिरण्यगर्भादि
भेदेन त्वमेवादिपुरुषत्वात्तिष्ठसीत्यर्थः ४८ तेन त्वं जगतः स्वस्तिकल्याणमस्तु भवतश्च धर्मादीनामाकार उत्पत्तिस्था

आदिदेवोसि देवानां ज्ञातमेतत्स्वरूपतः सर्गस्थित्यन्तकालेषु त्रिधाभेदेन तिष्ठसि ४८ स्वस्ति ते
स्तु जगन्नाथ धर्मवर्म हिमाकर ज्वषस्य शान्तिर्लोकानां देवदेव दिवाकर ४९ इन्द्रश्चागत्य तं देवं
लिख्यमानमथास्तवत् जय देव जगद्व्यापिन्नयाशेषजगत्पते ५० ऋषयश्च ततः सप्त वसिष्ठात्रि
पुरोगमाः तुष्टुवुर्विविधैः स्तोत्रैः स्वस्ति स्वस्तीतिवादिनः ५१ वेदैर्वाक्याभिरग्र्याभिर्वालखिल्या
श्च तुष्टुवुः ऋग्भिरग्र्याभिर्मोक्षते लिख्यमानं सुदागताः ५२ त्वं नाथ मोक्षिणां मोक्षो ध्येयस्त्वं ध्या
निनां परः त्वं गतिः सर्वभूतानां कर्मकाण्डेप्यवर्तताम् ५३ शं प्रजाभ्योस्तु देवेश शं नोस्तु जगतां
पते शं नोस्तु द्विपदे नित्यं शं नश्चास्तु चतुष्पदे ५४ ततो विद्याधरगणा यक्षराक्षसपन्नगाः कृ
ताञ्जलिपुटाः सर्वे शिरोभिः प्रणता रविम् ५५

नत्वं ते लोकानां शान्तिरुपसवनर्थिं ज्वषस्य स्व सेवस्य ४९ लिख्यमानं शास्यमानं ५० ५१ ५२ मोक्षिणां प्राप्तमोक्षाणां मोक्षो
मुक्तानां प्राप्यं स्थानं ध्यानिनां ध्याननिष्ठानां ध्येयो ध्यानं योग्यः सर्वेषां भूतानां मन्वादिसर्गेण त्वं गतिः परायणं कर्म
काण्डे वर्तिनां सकामानां फलदाता त्वमेव ५३ शं सुखं द्विपदे मनुष्यादिषु चतुष्पदे पशुषु ५४ ५५

एवंविधा वक्ष्यमाणप्रकाराः सद्यः सोऽकुंयोगं ५९ उपगायितुमुपगातुं गान्धर्वे गीतौ निपुणाः कुशलाः ६० षड्जादिग्रामत्रये सुवि
शारदा निपुणाः ग्रामत्रयास्थिताभिः स्वराणां शर्णिताभिर्मूर्च्छनाभिश्च तालैरेकोनपञ्चाशद्भिः तत्सहचारिभिर्लयैश्च प्रयोगैः

भूत्वैवं विधा वाचो मनःश्रोत्रसुखावहाः सद्यो भवन्ति ते तेजोंऽशुतानोऽश्रुतभावन ५९ ततो हा
हाहूहूश्चैव नारदस्तुम्बुरुस्तथा उपगायितुमारब्धा गान्धर्वकुशला रविम् ६० षड्जमध्यम
गान्धारग्रामत्रयविशारदाः मूर्च्छनाभिश्च तालैश्च सुप्रयोगैः सुखप्रदम् ६१ विश्वाची च घृता
ची चोर्वश्यथ तिलोत्तमा मेनका सहजन्या च रम्भा चाप्सरसां वरा ६२ ननृतुर्जगतामीशे लि
ख्यमाने विभावसौ हावभावविलासाढ्यान्कुर्वत्योऽभिनयान्बहून् ६३ प्रावाद्यन्त ततस्तत्र वेणु
वीणादिदर्दुराः पणवाः पुष्कराश्चैव मृदङ्गपटहानकाः ६४ देवदुन्दुभयः शङ्खाः शतशोऽथ
सहस्रशः गायद्भिश्चैव गन्धर्वैर्नृत्यद्भिश्चाप्सरोगणैः तूर्यवादित्रघोषैश्च सर्वं कोलाहलीकृ
तं ६५ ततः कृताञ्जलिपुटा भक्तिनम्रात्ममूर्तयः लिख्यमानं सहस्रांशुं प्रणेमुः सर्वदेवताः ६६
ततः कोलाहले तस्मिन्सर्वदेवसमागमे तक्षमाणं शनैश्चक्रे विश्वकर्मा शनैः शनैः ६७

स्वरादीनां सुप्रयोगैः सुखप्रदमिति क्रियाविशेषणम् ६१ ६२ हावः क्रियागम्यः भावो मानसिकः नटादिभिर्विलासैरभिन
यान्सात्त्विकादीन्कैः व्यञ्जकैरप्सरसां ६३ ६४ महाशब्दान्वितं सर्वं कृतं कोलाहलीकृतं ६५ ६६ शनैः शनैरिति तक्षमाणानस्या

अध्यायमुपसंहरति इतीति हिमसर्जनादीरश्मीनांकालआविर्भावस्तस्यहेतोरग्नीषोमैकमूर्तेरित्यर्थः हरस्यसन्ध्यायांधाम
निधेःसूर्यस्योपस्थानंप्रसिद्धं एवमपरयोरपिब्रह्मविष्ण्वोः सम्यक्त्वात्मैकतयास्तवनस्योत्कर्षितस्य तेषांपरादित्यांशानांतद्
उपासितत्वात् ततोःसकलस्यदुर्निरीक्ष्यस्यतेजसःपरिलिखितं इष्टस्वरूपंनिशम्यालोच्यदिवाकरस्यचिह्नानोर्लोकंप्र
काशानन्दैकघनंप्राप्नुयोजीवनस्यान्तेदेहपातेव्रजतिविदेहकैवल्यंप्राप्नोतीत्यर्थः ९५ आदितोविंशाधिकःशततमो

इतिहिमजलघर्मकालहेतोर्हरकमलासनविष्णुसंस्तुतस्य तनुपरिलिखनंनिशम्यभानोर्व्रजति
दिवाकरलोकमायुषोऽन्ते ९५ इतिमार्कण्डेयपुराणेभानुमाहात्म्येभानुतनुपरिलिखनंनामषष्ठो
ध्यायः ९६ मार्कण्डेयउवाच लिख्यमानेततोभानौविश्वकर्माप्रजापतिः उद्भूतपुलकःस्तोत्रमिदं
चक्रेविवस्वतः १ विवस्वतेप्रणतजनानुकम्पिनेमहात्मनेसप्तजववसप्तसप्तये सुतेजसेकमलक
लावबोधिनेनमस्तमःपटलपटावपाटिने २

ध्यायः योनस्तोत्रैकसम्पत्तिःपरन्नमस्तिमहात्मेतयाम्लिष्टमूर्तिर्यस्यचतुर्नरोत्सिसमाविलनिगमतत्त्वोःषड्गुण्योःस्वगवा द्वीपा
पोभ्रोकलोकाख्यिनगरानिगुरेवामयोथीत्न्यूयानीवाहाः सोयंपरार्कःप्रभवतस्यवोनीलसमात्रयसृष्टिः तन्मयतभावित
सात्विकभावव्यंजनाख्यापनद्रुतचित्तताउद्भूताउद्भूतारोमाञ्चारोमहर्षोयस्य १ विवस्वतेसर्वावासकायप्रणतेषुजनेषु
अनुकंपिनेदयावते नमस्कारमपियोभानुरिष्टकेर्नमस्कृतामतिदयालुर्भगवानित्यर्थः महात्मविश्वव्यापात्मास्वरूपंयस्य

मा पु
टी
३५७

मजवास्तन्मवेगाः समस्तमयोऽस्य यस्य शोभनेन सकलभुवनावभासकेन तेजो यस्य कमलानां वनमवबोधयितुं विकासयितुं शीलमस्य
तमःप्रपटलं नेत्ररोगः सप्रकारकं नाम पटलमवपाटयितुं त्रोटयितुं शीलं यस्य तस्मै नमः २ पावनेभ्यः पवित्रकारिभ्यः सकाशादति
शयं सोत्कर्षं गुणैककर्म यस्य निरतिशयगुणैककर्मफलो भगवानित्यर्थः नैकाश्चनेकाः न समासः कामाः काम्यमानाविशयालाभ्य
कर्षणदातृभक्तेभ्यो यस्य सकामानामपि निरतिशयनिष्ठानिदायी भगवानित्यर्थः भास्वराभासनशीला अमला विशुद्धा मयू
खा रश्मयस्तैः शुभेन ग्राधारत्वेन स्थानं शीलं यस्य सर्वेषां लोकानां भूतभुवनमौतिकानां सर्गस्थित्यादिकारित्वाद्धितका

पावनातिशयगुणैककर्मणेऽनेककामविषयप्रदायिने भास्वरामलमयूखशायिने सर्वलोकहि
तकारिणे नमः ३ अजाय लोकत्रयपावनाय भूतात्मने गोपतये वृषाय नमो महाकारुणिको
त्तमाय सूर्याय वत्सप्रभवालयाय ४ विवस्वते ज्ञानभृदन्तरात्मने जगत्प्रतिष्ठाय जगद्धितैषिणे
स्वयंभुवे लोकसमस्तचक्षुषे सुरोत्तमायामिततेजसे नमः ५

रिणे नमः ३ अजाय निर्विकाराय लोकत्रयाणां स्थूलसूक्ष्माणां पावनाय शोधनाय तमोपहारित्वात् भूतानां ब्रह्मादि
स्थावरान्तानामात्मने स्वरूपाय गवां रश्मीनां पतये स्वामिने वृषाय सर्वबीजाय महाकारुणिकाः प्रतिदयालवो ब्रह्मा
दयस्तेभ्य उत्तमाय ब्रह्मादिभिः स्तुतत्वाद् सोत्कृष्टत्वम् सूर्याय सर्वोद्भवाय वत्सप्रध्यात्मनि प्रभवस्यालयस्याधिदेव
तेन स्थानं यस्य अथवा यपतासिन्मण्डले पुरुषो यस्सैष हिरण्मयः पुरुषः सयोयं दक्षिणेऽक्षन्पुरुष इति श्रुतेः ४ ३५७

विवस्वते प्रभाप्रकरैः सर्वाच्छादकायतस्तानंभ्रलान्मैकं विभर्ति श्रवणादिना धारयति अभ्यासवैराग्यादिना पोषयति चेति तानप्र
त् तानेकयोगतेम प्रवणास्तस्मात्प्रभृति विषयः स्वसंवेदनमंतरात्मा परमात्मा तस्मै जगतोऽष्टच्छादिमायेश्वरांतानां प्रतिष्ठाया
वाल्याधाराय निर्गुणस्यापि गुणपरिग्रहमूर्तिधारणेन जगतो हितेषिणे धर्मतद्विद्वेषिपालननाशनशर्मेच्छास्वभावाय नच
जीवत्वकर्मपारतंत्र्येण विभूर्तनश्वार स्वयंभुवे स्वेच्छया जगत्पालनाया विभूताय लोकानां समस्तं सम्पूर्णं प्रकाशकं च
तारिवस्वरेभ्य उन्नमाय उन्नतं विनष्टं तमो यस्य अमिततेजसे शर्णोवभासायनमः ५ लदंतावकालमात्रे उदयाचलस्य मौलि

तराम्रुदयाचलमौलिमणिः स्वरगणमहितो हितो जगतः त्वमुरुमयूखसहस्रवपुर्जगति विभा
सितमो सिन्दन् ६ भवति तिमिरापयानमदो भवति विलोहितविग्रहता मिहिरविभासियतः
स्वतरो त्रिभुवनभावनभानिकरैः ७ इयमपि हृद्यसमावयवं चारुविकल्पितमतिरुचिरम् सत
मभिन्नमसंभ्रमगवंश्वरसि जगद्धिताया विरतम् ८

मणिर्भूडूत्रत्नमिव स्वरगणैर्गणैर्महितः पूजितः हितः शमे उन्नणिव रिष्टानि मयूखसहस्राणि वपुः स्वरूपं यस्य रश्मिपु
ञ्जात्मकत्वात्म एड्लस्वत्वमेव च तमांसि जगदहितत्वात् दनाशयन् विभासितान्सः कोपीत्यसामान्यमहिमासीत्यर्थः ६ भवति
त्वयि सति अदस्तिमिरस्यापयानं परिचलनं यतो भवति अतो भवति त्वयि विलोहितारक्ता विग्रहता भवति तिमिरात्स्वस्वरूपा
नेनरक्तदेहता भवतीत्यर्थः मिहिरं मिहिरं कासोमरूपेणराति ददातीति मिमहति सिंचति चानस्तस्मै बोधनम् भानिकरैः शुभस्तू
हैः करणैस्त्रिभुवनस्य स्थूलसूक्ष्मात्मकस्य भावस्य प्रकाशकयतः स्वतरां अतिशयेन विभासितो भवतीति सर्वार्थयोज्यम् ७

समोसर्वसमग्राअवयवाअंगानिचक्रकूवरादीनियस्य समाः प्रतिमासंतुल्यावाअवयवानियमिताःसूर्यस्तुनियदारस्तोनागगं
धर्वाप्सरोरूपाःसप्तसप्तकाद्वादशगणायस्य तेचत्वराणांनरैःप्रदर्शिताः प्रपंचमियानंचित्रंतेचात्वयथाभवतितथाविशेषेणाक
ल्पितःसन्नद्धस्यर्थादिभिःसप्तसप्तकैर्द्वादशगणैर्वाकल्पितंरुचिरंस्यंजगद्वर्तितात्दृशरथमतीत्यस्थितमतिरुचिरंअतिशयेन
वारुचिरंसततंनित्यममित्रंभगवतोस्यावरोहहीनंभगवतावानित्यसमवेतं अमुमीदृशंरथमपिरुह्यारुह्यहेभगवन् वि
रतिशयेसूर्यस्तुकजगतेहितायाविरतमविच्छेदंचरसिअस्तोदयौभजसइत्यर्थः हितायइतिपाठेत्रियांकिःतकारप्रत्ययगुणो
दयातेर्हिरादेशः अयमर्थस्त्तमएव ८ अमृतंयत्स्यांशोःरसस्तेनविश्वयान्देवान्पितृनवतर्पयसे आप्याययसे सोमस्त्वद्रश्मिस्थासयोस्ते

अमृतस्यांशुरसेनसमंविश्वपितॄन्पितर्पयसे अरिगणसूदनतेननतवप्रणिपत्यलिखामिज
गद्धितये ९ शुकसमवर्णहयप्रथितंतवपदपांसुपवित्रतनुम् नतजनवत्सलमांप्रणतेत्रिभु
वनपावनपाहिशिवे ९०

सांपानात् समंतत्स्वं अरिगणानांरिपुगणानांसूदनविनाशनतेनजगत्तर्पणोपकरणसोमात्मकतयातवत्वांषष्ठीहितो
यार्थेप्रणिपत्यजगतोहितयेहितायलिखामितेजःशानतयामोस्यर्थः ९ शुकेननीलेनसमःसदृशोवर्णोनीलोयेषांहयानांगगन
गामिनांतेःप्रथितप्रख्यातभगवतोनीलाश्वमिथानस्यातिप्रसिद्धत्वात् सम्वद्धिरियं तवपदयोःपांसुःरजस्तेनपवित्रतनुंमांन
तजनस्यभक्तवर्गस्यवत्सलःनतजनानांवत्सलावल्लभायस्येतिवा त्रिभुवनपावनसूर्यपादेत्रिभुवनपवित्रत्वंप्रसिद्धमेवभुना
